कामनायाः स्वरूपकत्वादिरूपं गुणाकं ब्रह्मज्ञानमिति द्योतनमेव विशेषविधेः प्रयोजनं ॥ तथाच श्रुतिः ॥
अनादौ वसुदानो विंदते वसुपर्णे वेदेति अनमासुमताहं नेडुसंमोदः ॥ वसुनो धनस्य दानं यस्मात्तस्य
वसुदानस्य परमेश्वरस्यैव प्रकारेणायो वेदोपासितत्वं तं च विंदत इति तद्योजः ॥ किंच ॥ अनेका
येन महुतिमंत्रेणाभादेकाम्यवचनेन भयहरणाकामप्रयोगे क्रियमाणो गोणमुख्याधिकरणमे
येन तस्य मंत्रस्य जयः स्वहस्ताभयापहत्वप्रकारक स्मृतिनकतायाः सिद्धवेप्यन्नकामप्रयोगे मु
स्यनुसेवान्नप्रदत्वप्रकारकस्मृतिजनकतया देवताया अपि पिष्टाडिमस्थापसिद्धिरिति तत्प्रसादोपि
रामं०
२१

ज्ञाद्विसृष्टिवस्यादितिविशेषेष्टोनतमपिप्रयोजनं। अतएवकारेस्थतगीतायांनामस्वगौणमुख्यभेदेनफल
भेदः स्मर्यते॥ नामानिहर्वाणितुकलितानिस्वमापपानिमन्त्रत्वात्मकत्वे॥ तथापिमुख्यान्यष्टशिवा
दिशाष्टाभवंतिसंकल्पनमात्रेणशिवस्यामुख्यमाहनृपतोमुनीश्वरः सत्यमेवपरमेश्वरोभवेत्॥ तस्यवक्त्र
कमलेसदापियोनमानिनित्यंपरमेशशास्मसहेतलंवितरेण॥ ॥इदानींछलकृत्सचौक्रमीसेवक्रानि
नामधेयमकृतानीमसचिवाख्याः श्लेषेणागुरुमर्पणति॥ ॥मंत्रोद्योजयतिगुरौनवचरणास्त्रिंश
त्पदीमः। एकोर्थस्त्रयपदेहोमस्मरहारीतसमर्पणहोमः॥ ॥९॥ मंत्राणामघोषमूलकारणं॥ श्रीगुरु
णार्वभौमोजयति॥ एवौकारेणावर्तते॥ मोक्षस्यमूलपद्मानंतस्यमूलमहेश्वरः॥ तस्यपंचाक्ष
रोमंत्रोमंत्रमूलंगुरोर्वचनमितिवचनात्॥ तमेवविशेषणैर्विशिनष्टि। गुणीपरमार्थतोनिर्गुणोपिवि
द्यावतारसिद्ध्यर्थंलीलयातोनेकविग्रहः॥ नवेनितसनूलेचारणेरकोपकलाव्याप्यस्यसः तनुकः॥ ॥वंदे
गुरुपदद्वंद्वमवाङ्मनसगोचरं॥ रक्तशुक्लप्रभामिश्रमतर्क्यंत्रैपुरंमहदिति॥ अथवा॥ पवित्रचर
णंचक्रलोकद्वारंसर्वदर्शनमितिकोशानववक्रात्मकः। त्रैलोक्यमोहनादिसर्वानंदमयांतचक्राणजो
भिन्नइतिपावत्। विशतामर्थपचदशाक्षराणीश्रीविद्यांतर्गतानितरामलस्तुलसलङ्पङ्सर्थः॥ नि
रंजनः परमसाम्यमनुपैतीतिश्रुतावभेदेपितुलसतोर्दिदर्शनात्। एकोमुख्यश्रोसावर्थस्त्रपदेहष्टु
अर्थश्चत्रयंचा। अष्टमितिपावन॥ नाहशीसार्धत्रिवलयाकाराकुंडलिन्येवसर्वदेवतारूपादेहआ

२२

णायस्तत्: कृत्तिवासो महादेवो महापद्मस्य संहरति॥ यद्वा मस्माद्ब्रह्मानंदसंदत्ते ऽ तएव हारीम
नोहर:। ये वै भू मातन्न वेत्ति निश्चते:। सा जटा:। ताभि: सहित:। सत्र: परमशिवस्तस्मा दोलाति
आदत्ते विषयीकरोतीति सत्र पाह्वा शिवपदभक्ति:। इत्या मासा सत्र पाह्वापेन स: अतएव शः
पाक्षित: शिवभक्तिवललब्ध तद्भेद इति समुदितार्थः। ना इत्येकाक्षर एस जटावाचकत्वं सत्राः
सत्रा ष्ठानुग्रा फलाकिरणानिमा: पानविश्वत्रिनेत्र इति प्रयोगप्रसिद्ध॥ आदित्यपुराणात्र सि
द्ध पश्चिमो दक्षिणे तीरस्थ सप्तकोटीश्वर नाम निर्वचन श्लोकेपि। अद्याप्यास्ते दिपश्चितामपि मह
त्संदेह कोटिह्वयपः कस्मात्सप्तकोटीश्वरो निगदित: सदा: किम मोघस:। तत्रेशः प्रथमेव कोटिरि
ति किनि स्थापना पस्कृत नाम्नैव प्रथितो भवसनोशिव: श्रीसप्तकोटीश्वर इति। अत्र सप्ता मश
ह्रो सजट निर्जट वा विनोसंतो शिवविवस्पुपरो। ईदृशा चरितो त्र श्लोकानामपि प्रकृतो: प्र
कृतो वार्थो वर्णयितु शक्योपि ग्रंथविस्तारभयात्संक्षिप्ते हितं शाक्यत्वाच्च निष्प्रयोजनत्वाच्च त
मुपेक्ष्य नामविभागपरत्वेनैव व्याख्यातं प्रक्रम्यते॥ मंत्राद्योजपति॥ मंत्राणामादावुच्चारणी
य: प्रणवो जपति॥ ओंकारविनैव व्याख्यातं प्रक्रम्यते॥ मंत्राद्योजपति॥ नोवर्तुलत्वेनो रोमं त्र्याद्य :एम०
प्रणवो ॐ वदिति मातृकाकोशात्॥ कालिकापुराणे॥ सवत्सनोक्तं तत्पूर्वं परत्वाच्च विशीर्यतइ २२

मनेनादौ वैतिचोच्चार्यत्वेन प्रणवस्य विधानात्॥ अतस्वधाग्पायनः दानयज्ञतपः स्वाध्यायजपध्या
नसंध्योपासनप्राणायामहोमदेवपित्र्यमंत्रोच्चारणब्रह्मारंभादीनि प्रणवमुच्चार्य प्रवर्त्तयेदिति
।कात्यायनोपि। प्रणवं प्रक्षिप्य ब्रह्मारंभविरामे च यागहोमादिषु शांतिपुष्टिकर्मसु चास्येष्वपि का
म्यनैमित्तिकादिषु सर्वेषु विनियोगोऽस्येति। हारीतपरिशिष्टेपि। ब्रह्मयज्ञो जपो होमो देवर्षिपितृ
कर्मसु च। अनोंकृत्य कृतं सर्वं न भवेत्सिद्धिकारकमिति। अत एवोंकारेण सर्वो मंत्र एषोऽतिक्रांतिः
।सर्वो मंत्रः संपुटितश्चेदनर्थः।उत्तादि[illegible]हिंसानादरयोः प्रतिपत्तोः समुपस्थितेत्र भयमेव तुना
र्थकता यादीर्घसोमेसंत्वाधादितिविधानेन सततगामसंतत्रोहिहव इति निषेधेपि प्रयोगदर्शना
त्॥ ननु सहस्रनामहोमस्य मंत्रे प्रणवपुटितत्वपुरेता तदेव तु न संभवति॥ मानाभावात्॥ अ
त एव निशासामंत्रत्वस्वाहान्तविधिः केवलेनामबुद्धिलेन काम्येषु कुंभजामंत्रात्मकत्वेमतेषां नाम्नां ना
मात्मतापि नेति चेत्। न तच्छोदकेषु मंत्रात्होमशिकरणोमत्र[illegible]सिद्धिविषयत्वस्यैव मंत्रलक्षणत्वोक्ते
ः। अत्र च तां त्रिकाण्डमालामंत्रत्वे भात्रं॥ केवलेनामबुद्धिस्तेइजिनीह[illegible]संदर्भस्य परिसंख्यापकेन
पुनः सहस्रनामसमाख्यातस्य। अत एव सहस्रनाममंत्रोपजपितमः शुभात्मपद्मादिवचना निर्माणो
[illegible]शिवहूपमधुनाशिवपदेन[illegible]तपोः तत एवाघोऽवधिष्णुषस्य कालिकापु
राणे सोमेश्वरशतनामि[illegible]जातीनां[illegible]स्वनुदानकः। प्रचितश्चोहजातामनसापि तथा स्मरेत्। चतुर्द
४१

२३ शः स्वरोपोसौ पो व ओकौर संज्ञकः। स चानुस्वार चंद्राभ्यां शृङ्गाणां सेत्र रुच्यते॥ शृङ्गाणामदिसे
त्तु वा द्विस्तु वर्णावं बह्वृचा॥ द्विसेतवः समाख्याताः सर्व एव द्विजातयः इति॥ द्विजातीनां ब्राह्मणानां
ब्राह्मणानां राज्ञां क्षत्रियाणां तु रुजातानां वैश्यानां मनसापीति वैश्यमात्रान्वयि॥ चंद्रो नादः
सेतुः प्रणव॥ द्विसेतवः आद्यं नमणावोच्चारणशीलाः॥ द्विजातयः त्रैवर्णिका इति तदर्थः
। यत्वाथर्ववणा ब्राह्मणो वेदभेदे न स्वस्ववद्धा श्रूयते॥ सरितो दात्त एकाकृत ठंकारकम्वेदे त्रैस्व
र्ये दात्त एकाकृत ठंकारो यजुर्वेदे दीर्घप्लुतो दात्त एकाकृतः सामवेदे ह्रस्वोदात्त एकाकृत उंकारो
ऽथर्ववेदे तो वेदविषयिणं प्रवेति नात्रोपयुज्यते। एवं प्रणवं प्रदर्श्य श्रीमाते सादीनि त्रिष
ष्टि नामानि विभजते॥ पुराणीमाह्निनापद्य पत्रमष्टलकारैः स्वशास्त्रोप पुष्कप णिभाषाम्नाय
मूलत्वेन विद्रुमालभाइ स्नानश्रयेनेकीकृतमदर्शितास्तेषां पृथिविष्वानुजिद्भुक्तयाः स्माभि
रत्र कथ्यंते॥ कटपयवर्गभवैरिति इ वीकश्लोके नकार जकारयोः शून्यसंकेतः श्रोतः इह
तु दशात्व संख्यो पांक्रियते न स्मात एवापे कृ णान्त॥ पूर्वस्थानपेक्षणाद्या ककारादि भिर्द्योति
त संख्या पा श्राश्रयात्स्वेकेकनामान्तर्गताक्षराणि स्वरस्पाणि च त्रयस्त्रिंशत्ताबाद्य कृत्लो राम०
पश्लोति पाणिनि सूत्रेण एषवै सप्तदशः प्रजापतिरित्यादिश्रुति षु च संख्यायाः स्वरमात्रा त्प्र
यत्नदर्शनात्॥ एकद्वित्रिमादि संख्यावाचकपदानि त्रयपत्रपादोर्ध्वं वा विशेषभावेन निर्दि २३

परार्द्धांतिमकनामसंख्यापना ॥१॥ यत्र च विशेष्यनिर्देशमंतरेणैव प्रयुज्यते तत्र सप्तसंख्याकाहर
नामसंख्यापराणि ॥ तत्राष्ट धेसार्धयोरर्धानां वा समासे पर्यंतं यानि नामानि तत्स्थानेष्वेव ॥
न पुनः क्वि पादपंचपादार्धे तन्नामपराणि ॥ एकद्वित्रिचतुः पादाद्यंतर्गतत्वरणानां लक्षाकेति
कार्ये मयेत्यादि इति एतदुदाहरणं ॥ विन्याख्यावृत्ताव सरए वक्ष्यामि विष्यंति ॥ गुणी ॥ गकारणकारो
कतिभिर् ... कैकं नामे साकां ख्याय आनिराने ... विधानं ज्ञाप इति सोमवमेनेष्ट धि
के रावनादश्वः स्कसनाम स्त्रीणपवाहर ॥ इत्यादि रेवार्थः सिध्यति ॥ चतुरूनां तर्गता
इ यच संख्या हरनिष्टा ॥ हलमि एकासंख्यातनाम निष्टा ॥ तत्रष्व प्यिइत्यकरूएकं नामत्र करमि
सर्वे इति ... नो निरसे ॥ इहतेषांकत्वादेवैकं नामेष्वर्थे सलाभाग प्रथमं नामेति त्रुवर्णप्राय
स्पादेवापित्रनेर्निं ... क्रम स्त्रेष्ट आदि समानं ॥ नव चरणाय स्मिवाक्ये महेस नव चरणाः ॥ तस्य
न व धाति ... निर्देशव लाद्देकैकस्य चरणस्यैकैक ... नामकतं स्वमते ॥ तथा च नवपश ष्टोदि
गासंख्या ... नेवा ने तिना हो षु ॥ अत्र नवशाष्टा नवतस संख्यायाइव नकारवका दोदि तरष्ठे

२४ चतुःसंख्यमोऽष्टाविति न प्रतीतिः। अतः प्रतीतिशेषमाप्य पर्यायसंख्यावाचकपदाहरणमि
हसंभूयैकार्थप्रमायकमेव वा एकत्र चरणादिष्वाष्टसमवधानमहिम्नात्संख्यावाचकशब्दा
नानामधेयान्वितस्वार्थकत्वमेव नाहरणान्वितस्वार्थकत्वमिति सिद्धे चरणादिविशेषसमर्पके
पदाभावेऽपि नामान्वितस्वार्थकत्वं कुतो न दृष्टं न परगणयुक्तो। एकत्र निरीतिः शास्त्रार्थेऽसति
बाधके नस्त्रापत्तिन्याप्यात्॥ आदितः प्रयरणीयपयसि चरहरिनि विधेरच्छलीवच्चनस्यापि
चरणाष्टस्यादिति मोदनेनेति वाक्यशेषवशादोदनार्थकत्वे निर्णीते सौर्यं चरुमित्यादौ वाक्यशे
षाभावेऽप्योदनार्थकत्वामपायात्॥ इदं शास्त्रार्थसिद्ध्यर्थमेव वाहुसंख्यापायान्यायगु
णादिष्वाष्टान्तनामेव प्रयोगो न पुनरेव दशादिसंख्यापदाहरणमिति न च [illegible] विशिष्य
ति। त्रिंशत्पदार्थीः। समासस्यापि शब्दमात्र विवक्षायाम नियतलिङ्गो ऽर्धशब्दः। अर्धं नपुंसका
मिति सूत्रे कः पुनः पुल्लिङ्गइतिभाष्यस्यानियतलिङ्गपरत्वे नैवकैयटेन व्याख्यानात्। वा पुंस्य
र्ध इति कोशाच्च। तेन षोडश षोडशाक्षराणि त्रेशब्दाभानीत्यर्थः। भकारस्य चतुरक्षरा
त्मकमेकं नामेति। एकपदस्य तदुत्तरमेकं नामेत्यर्थे सिद्धे मापाद्याहशाक्षरमिति सिद्ध
ति। एकस्मिन् वैतावतपवपरिशेषात्॥ अर्धी तरतोऽर्धजिरयहणोन तन्मध्ये नाम सतमास्यपो राम॰
गान्त॥ यतिर्विच्छेद इति पिङ्गलसूत्रे॥ यतिः अवसानं विधानात्। अवसानस्य च परस्य २४

माशिवाप्यवात्। न चार्थान्तरमेव नाम समाप्यतामिति वाच्यं। तथात्वे पेकपदत्वे पपत्तेः। रू
पपदे न द्वादशार्णं स्याद्यात्क्रपरिभाषानुसारेण वक्तुं शक्यते पि द्वाक्षरैकाक्षरे द्वे नामनी
इति भ्रमो मा प्रसंजीति तथा नोक्तं। अत एव द्वादशाधिकार्णस्यापारिभाषिकाने काक्षरसाध्यत्वा
न्नेह परिभाषया निर्देशस्तत्क्रमपि नियमो दृष्टव्यः। ततोर्धत्र्यंशत्रीणिनामानि। ततो ष्टभिर
ष्टभिरक्षरैर्द्वे। ततश्चतुर्भिः पंचभिः षड्भिर्वा म्यां षड्भिर्वाक्षरैः षण्णामानि। ततः सप्तभि
स्वरैः सप्तातन्त्रिभिः पंचभिर्द्वे नामनी। इत्येवं श्लोकार्थः॥ १॥ अथ नाम्नामर्थः प्रस्तू
यते॥ तत्रादौ प्रणवस्य समस्तस्य ब्रह्मैवार्थः॥ ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृ
त इति भगवद्वचनात्॥ अकारोकारमकारनादबिंदुमिलिते ब्रह्मविष्णुरुद्रेश्वरसदाशि
वानां कथनात् तत्स्वरूपमिति वा॥ ॥ तदुक्तं बृहन्नारदीये॥ अकारं ब्रह्मणो रूपमुकारं विष्णु
रूपवत्॥ मकारं रुद्ररूपस्यादर्धमात्रं परात्मकं॥ वाच्यं तत्परमं ब्रह्म वाचकः प्रणवः स्मृतः
॥ वाच्यवाचकसंबंधस्तयोस्यादौपचारिक इति॥ रूपपदं वाच्यवाचकयोरभेदाभिप्रायेण
मिन्नपरं॥ अत एव भेदघटितो वाच्यवाचकभावसंबंधश्चौपचारिकः॥ अमुख्यः॥ व्यावहा
रिक इत्यर्थः॥ अनेनैवाशयेन पुष्पदंतोप्याह॥ समस्तं व्यस्तं त्वां शरणद गृणात्योमिति
पदमिति॥ यद्वैवमन्यत्रैव तन्नानाविधाः अर्था वर्णिताः॥ ज्ञाताज्ञातमित्येवं वक्ष्ये

२५ सति। तद्विना॥ ॐमिति प्राह लोकोयं तेन ज्ञातस्य वाचकः॥ अज्ञातार्थे तथाज्ञातमिति प्राप्ते तु वाचके॥ ॐमि
ति प्राह लोकोयं तेनाज्ञातस्य वाचकः॥ संदिग्धार्थे तु संदिग्धमिति प्राप्ते तु वाचके॥ ॐमिति प्राह लोकोयं
तेन संदिग्धवाचकः॥ आकाशादिपदार्थानां येन शब्दा वाचकास्मृति॥ विना ज्ञानखिलान प्रश्नान् लोक ॐ
मिति भाषते॥ अतः प्रयोगबाहुल्यादस्यात्कुड्यादिशब्दवत्॥ आकाशादिपदार्थानां वाचकः प्रणवः स्मृ
तः। सर्वविभासकत्वेन ब्रह्मणा सदृशः स्मृतः॥ सर्वविभासकं मंत्रमिमं जपति यो द्विजः॥ सर्वमंत्रजप
स्योक्तफलं स लभते चिरादिति॥ ॥ इहत्पराशरस्मृतिः॥ प्रणवो हि परं तत्त्वं त्रिवेदं त्रिगुणात्मकं
॥ त्रिदैवतं त्रिधामं च त्रिप्रज्ञं त्रिस्वरं स्थितं॥ त्रिमंत्रं च त्रिकालं गं कवयो विदुः॥ सर्वमेतत्त्रिरूपेण प्राप्तं
हि प्रणवेन तु॥ अग्निः सोमश्च सूर्यश्च त्रिधामेति प्रकीर्तितं॥ अंतःप्रज्ञं बहिःप्रज्ञं घनप्रज्ञमुदाहृतं
त्वकंठ तालुके चेति त्रिस्थानमिति कीर्तितं॥ अकारश्च उकारश्च मकारश्च त्रिमात्रकः अंते स्मृतः॥ कर्मीरमेषु स
र्वे श्रुतिमात्रं तं प्रकीर्तितं। त्रिकुक्षाब्देषु सर्वेषु पुर्वं प्रणवेन हि॥ न तेन हि विना किंचिद्वक्तुं प्रा
तिगिरा पतत इति॥ गोपथब्राह्मणेपि॥ ॥ ॐकारं पृच्छामः को धातुः किं प्रातिपदिकं किं नामाख्या
तं किं लिंगं का विभक्तिकः स्वरइत्यादिना महता खंडेन तत्स्वरूपनिरूपणं॥ ॥ प्रपंचसारे प्रणवपट राम०
ले आख्यातृभिः पद्मपादाचार्यैरपि प्रणवार्थदीपिकादिग्रंथांतरे च कृतो भूमानस्तु विस्तरेणैश्चतः २५
श्रीमान् श्रीमहाराज्ञी श्रीमल्लिहासनेश्वरी॥ ॥ विदग्धकुंडसम्भूतादवकार्यसमुद्यता॥ ५१॥ श्रियो

ल ह्मी माता ॥ श्री रिति गीह पलक्षणं ॥ तथा च श्री गीतं नव का जन्म यंतत्समान कोटि भूता हृद्ध राशी किं
तु न क्रित पजन पित्री वर शिव महिषी प्राम ह्वा रिकेस्तु कं भवति ॥ यद्वा ॥ श्रियं लक्ष्मीं माति परि
छिनत्ति परिछेद्यापेक्षया पाछिदक स्याधिक्या वर्णं भावादनवधिक श्री ल्लसो मो कृष्ट स्यार्थः ॥ श्रियं
विषं माति कंठे स्थापयती ति वा ॥ अनयोः पक्षयोर्नाम पुल्लिंगं भवति ॥ शिव शक्त्योरभेदान्न काश्चो
विमर्शो वा विशेषः ॥ श्रीमात्रे नम इति मंत्रे विशेषणाभावेप्यानुरां येन विशेषः ॥ अथवा ॥ श्रीमि
तु कानां नाम श्रीपद पूर्वं प्रयुजीत श्री चक्र श्री शैल श्री विद्या श्री फलादिकवदित्यभियुक्तमसि द्धे
र्माते तिपद मात्रा स्यो मादि केत्येवार्थः ॥ विनिगमनाविरहात्सर्वेषामितिनाभव ॥ यतो वाइमा नि
भूता निजायंत इत्यविशेषश्रुतेश्च ॥ अत एवानिरूपण्या एवेश्वरे शामादिशब्दाः य शिववाचकाः
अत श्रेष्ठ या नो भूत भूत्यस्य ना हावि वर्जनाम्नाते निकवित्य ति संबधी निर्देशो पिमात्र पद मात्र स्य
त्रिपुरसुंदरी वाचकत्वेन विह मेते ॥ यद्वा ॥ हसकलरडें ति अंजनषट्क स्य बालायाः स्वरत्रये णांते
योजनेकूटत्रयात्मको जायमानो मंत्रो मातेत्युच्यते ॥ मायाकुंडलिनी क्रियामधुमती तिमंत्रपारा
यणोत्थारे श्लोके मातृप रस्यैतना हृस्थेन्याख्यानादिति मंत्रोद्धारपरा मारख्याऽ वगंतव्या ॥ ॥ शि
वायनमः ॥ राजशब्दात्रां तत्ता न्डी पिकते पक्षे त्र्यम्बह छन्दे मसमासे आन्य हत इ मात्वेश्री सुकाम
हाराज्ञीति मध्यमपदलोपसमासे रूपं न तु महाराजशब्दो टित्वान्ङीप् ॥ तथा त्वे महाराजी स्यात्

२६ तेः॥ सकलप्रपंचजातपालनेऽधिकृते त्वार्थः॥ राजशब्दश्शक्यतावच्छेदकन्तपत्रकोटौपालनस्पनि
विष्टत्वात्॥ तथाच श्रुतिः॥ येनजातानिजीवंतीतिश्च श्रीविद्यायांनिगूढसाकूतत्रयस्योद्धारः॥ त
त्रैकंतावत्सोऽहं शीतलेत्युच्यते॥ सच्छिष्यायोपदेष्टव्यागुरुणाक्रपयसाकलेतिवचनात्मायेपाशुनिर्के
बैकृभिर्गुरुमुखाद्ज्ञातं॥ तत्रशिवःशक्तिःकामइतिविद्योद्धारश्लोकेसौंदर्यलहरीव्याख्यानेलल्ल
नप्रकटीकृतं॥ चतुर्लक्षीमनुष्ठाप्यमार्कोमंत्रइति॥ इत्यर्हृर्थंप्रकाशविमर्शरूपंतदुक्तंसंके
तपद्धतौ॥ अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः॥ हकारोंत्यः कलारूपोविमर्शाख्यः प्रकी
र्तितइति॥ अनयोरपिरहस्यत्वादेवमथ्यविंदुविसर्गांतः समाख्यानमयेपरे॥ कुटिलारूपकेत
स्याः प्रतिरूपंवियत्कलेइत्यादिभिर्ग्रंटार्थैरेवश्लोकेयोगिनीहृदयेस्वरूपनिष्कर्षः कृतः॥ तत्प्र
काशानंदात्माभिर्वरिवस्यारहस्यएवद्रष्टव्यमितिनेहप्रतन्यते॥ राज्ञीत्यंशेनमायाराज्ञीमंत्रोद्धा
रः॥ अतएवनटचक्रमयांतत्तलेनप्रयोगः॥ नृपाधिष्ठितमासनंसिंहासनमुच्यते॥ आसनेषुसिं
हः श्रेष्ठामितमर्थेराजदंतादित्वात्पूर्वनिपातः॥ श्रीमत्प्रपंचसाम्राज्यलक्ष्मीवन्नतासिंहासनंचत ष्म०
स्येश्वरीइंशित्रीसिंहाभिश्चासनमितिवा॥ देव्याः सिंहारूढत्वात्॥ तदुक्तंदेवीपुराणेनामनि २६
र्वचनाध्याये॥ सिंहमारुह्यकन्यातेनिहतोमहिषोनया॥ महिषघ्नीततोदेवीतयासिंहासनेश्व

री॥ यद्वा सिंहशब्दो हिंसार्थकः॥ तदुक्तं वैयाकरणैः हिंसिधातोः सिंहशब्दो वशकान्तौ शिवस्मृतः॥
वर्णव्यत्ययतः सिद्धौ पश्यकः कश्यपो यथेति तेन सिंहेन हिंसयाऽसनं क्षेपणं निरास इति यावत्॥
अत्र केचित् परा इति धातोर्ल्युट्॥ सिंहार इति समुदायार्थः॥ तत्रेश्वरी समर्था तथा च श्रुतिः॥ यत्रासे
मे भिसं विशन्तीति॥ यद्वा मकारः पंचसंख्यापरः॥ संति सिंहासनसमाख्याता श्चेतमभैरवादिसंप
त्प्रदाने रक्षेतार्थ श्रेष्ठी मंत्राः॥ तेषु त्रयं युग्मरूपं द्वयमेकैकरूपमित्येवं पंचेव वाद्यसाध्यभेदेन सिं
हासनानि ज्ञानार्णवे कथितानि पंचसिंहासनगता कथ्यते सा त्रिपुरा परा॥ कथयस्व महेशान कथं
सिंहासनं भवेदिति दृष्टे प्रथमं प्रणु देवेशि ब्रह्मास्त्रं पूर्विकोऽयदा॥ निष्ठो तनोपि देवेशि तदा त्रि
पुरसुंदरी॥ समाराध्या भवत्कर्ता सृष्टेस्तु परमेश्वरी॥ ब्रह्मा तांतसमाराध्य तपसा महता प्रिये॥
शक्रो भूदेवराजो यं पूर्वं पूर्वस्यां दिशि पालकः॥ तदा प्रसन्ना त्रिपुरा पूर्वसिंहासनस्थिता स्मृता दिना॥
तेषां पंचानां सिंहासनानामीश्वरी तेन न मंत्रोद्धारः॥ एवं त्रिभिर्नामभिः सृष्टिस्थितिः संकल्पत्वेन ब्र
ह्मलक्ष्य यित्वा प्रकृतपुराणोक्तमात्रमातृभावादिकथाक्रमं प्रायेणाश्रयन्त्रेव निरोधानानुग्र
हो परपर्याय एवं क्रमो क्रमद् तेनापि सर्गपंचकं लक्ष्ययित्तु सपक्रमते॥ विदृश्रीता दिना शिवशक्ते
क्यरूपेणाति संतेना। चितैव वलब्रह्म तदेवाग्निकुंडं॥ अविद्यालक्षणानमो विरोधित्वात्॥ अंतर्निरंत
रनिरिंधनमेधमाने मोहांधकारपरिपंथिनी संविदग्नौ विभावो चिद्वन्योत्यक प्रयोगदर्शनात्॥

२७ शक्तिरूपमपि ॥ चिद्वह्निरिखरोऽहप्रदेहेष्वन्तोपि चिन्मात्रपरमेयमनुमुष्पतीति ॥ तदुक्तं च ॥ चितिरेव
विश्वग्रसनशीलत्वाद्वह्निरितितत्रसम्यक्कुक्तभेदेनभूताह्निता ॥ चेतनामात्मधर्मरूपेणावस्थिता ॥
नतुजाता ॥ तत्रजातः तत्रभवइतिपाणिनीनाभूज्ञनिधानोभेदेनकीर्तनात् ॥ शक्तिशक्तिमतो
रभेदाच्च ॥ तदुक्तं संकेपशास्त्राकाचार्यैः ॥ चिद्वह्निः ॥ परमेश्वरस्यविमलाचैतन्यमेवोच्यतइति
॥ यद्वा प्रसिद्धमग्निकुंडमेव चित् रूपवह्निरग्निपदयोरेवोपमितसमासः ॥ ज्ञानाग्निः सर्वकर्माणिभ
स्मसात्कुरुतेर्जुनेत्यादौ रूपकदर्शनात् ॥ तस्मात्कुंडात्संभूताप्रादुर्भूता उत्पन्नेत्यर्थः ॥ धुंधुमा
रसंततोऽभवद्दिमादौ भवतेरुत्पत्तावपि प्रयोगात् ॥ तदुक्तं रेणुकापुराणे ॥ रेणुनामाभवत्सुत्र
हृत्साकुलवर्धनइत्यारभ्यतस्यतपोदेवीवरचक्रवर्तीप्रियाया नतस्मिन्नंतरेयद्गेवह्निकुंडाछनैर्द्धि
जा ॥ दिव्यरूपान्विताना रीदिव्याभरणभूषितेत्यारभ्यवज्रेः शीतांशुबिंबाभासहसानिर्गत्यब
हिः ॥ एकैवतत्रजगद्धात्री द्वितीयानास्तिकाचनेत्यंतेनब्रह्मांडपुराणेपि ॥ भंडासुरपीडितेशक्रे
निर्वाणकुंडं योजनविस्तारं सम्यक्कृत्वा तिष्ठोपमनमित्यादिना चिदग्निकुंडे देवैः कृतं स्वस्वमांस
होममनुक्त्वोक्तं होतुमिच्छत्सु देवेषु कलेवरमशेषतः ॥ प्रादुर्बभूवपरमं तेजःपुंजमयं महत् ॥ राम०
कोटिसूर्यप्रतीकाशं चंद्रकोटिसुशीतलं ॥ तन्मध्यतः समुद्भूच्चक्राकारमनौपमं ॥ तन्मध्यतो २७

महादेवी मुख्याकसामग्रमामित्याग्रमपतां विलोमा महादेवी देवाः सर्वे सवासवाः । अरोमुर्मुदिता
ग्नौ नोभूयोभूयो खिलात्मिकामित्यंतं निषाया तत्तत्सभवमाशंक्य समाधत्ते ॥ देवकार्येति ॥ देवा
नां कार्यं त्रिभंडासुरमहिषासुरवधादि निमित्तं दर्थं समुद्यता ॥ आविर्भूता । प्रकृतिविकृतिभावाभा
वेन तादर्थ्यं चतुर्थ्यंते न सह समासाप्योगे पि शेषषष्ठ्या समासः । तदुक्तं मार्कंडेयपुराणे ॥ देवानां
कार्यसिद्ध्यर्थमाविर्भवति सा यदा तदोत्पन्नेति तदा लोके सा नित्याप्यभिधीयते इति । कूर्मपुराणेपि हि
मवंतं प्रति भगवत्योक्तं ॥ अहं वै याचिता देवैः संभूता कार्यगौरवात् । विनिंद्य दक्षं पितरं महेश्वर
विनिंदकं धर्मसंस्थापनार्थायतया राधनकारणात् । मेनादेहसमुत्पन्ना त्वामेव पितरं श्रितेत्या
दि ५२ ॥ उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता । रागस्वरूपपाशाढ्या क्रोधाकारांकुशोज्ज्वला
॥ ५३ ॥ एवं चिद्रूपत्वेन प्रकाशात्मकतामुक्त्वा विमृशात्मकं रूपपाशाढ्या क्रोधाकारांकुशोज्वला
॥ ५३ ॥ माह ॥ उद्यदिति ॥ भानूनां किरणानां सहस्रं यस्य स भानुः सहस्रांशुः सूर्यः । न सोद्यत्वं विशेषणं
। वर्तमानकालिकोदयत्वं वक्तव्यं वर्तमाने लटः शतृशानचोर्विधानात् । तेन लौहित्यं लभ्यते । उद्यतां
भानूनां रक्तस्फीतीनां यत्स्वरूपं मानं सृतेन तत्त्वमिति वा । अतिलोहितेति फलितोर्थः । उक्तं हि स्वतंत्रतंत्रे
॥ स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहा । लौहित्यं तद्विमर्शः स्यादुपास्तिरिति भावनेति । वामकेश्वर
तंत्रेपि ॥ ॥ स्वयं हि त्रिपुरादेवी लौहित्यं तद्विमर्शनमिति । ईदृशप्रकाशप्रकाशविमर्शसामरस्यापन्ना

१८ पादे व्याख्या॥ तद्रूपाणि॥ स्थूलं सूक्ष्मं परं चेति। करचरणादिविशिष्टं स्थूलं। मंत्रमयं सूक्ष्मं। वासनाम
यं परं तत्तु त्रैपोगवासिष्ठेत्युगहृता। सा मा नं परमं चेति हृद्ध्येह विधिमेन घरापदियुक्तं सामा
न्यं यत्तु मुद्रा रूपा स्मृते॥ परं रूपमनाद्यन्तं यन्मे कममनामयं॥ ब्रह्मात्मपरमात्मादिशब्दैर्नेतहृदी
28 पतइत्य। हि सामान्येन त्रिविधं प्रोक्तं स्थूलसूक्ष्मविभेदतः इत्यन्यत्रापि॥ यत्तु गंगादीनां तेलादि मपह
पं ततस्थूलतरं चतुर्थं। तेषु स्थूलं निर्दिशति॥ चतुरिति॥ ध्यानोक्तावयवमात्रोपलक्षणमेतत्।
बाहमात्रपरमेववा। बाह्मप्रसंगादायुधानां त्रिविधं रूपमाह। रागेति चतुर्भिः। नागो नुरक्ति
श्चित्तवृत्तिविशेषः इच्छैव वा। राग एव सं वासनामयं परूपं पपस्य स्थूलस्य पाशस्य तेनाद्या वामाधः
के रे पुक्ता। क्रोधो द्वेषाख्या चित्तवृत्तिः। आकाशश्चादर्श आद्यं वि आकारं सविषयकं ज्ञानमिस
यं। घंगोपमित्याकारकं ज्ञानमित्यादौ विषयपरस्तेनाकारपदं प्रयोव्यात। द्वेषज्ञानोभयात्मके
नं कुप्राणोत्वलाशोभमानंदक्रोधः फरा॥ तथा चोक्तं पूर्वं चतुःशती शास्त्रे॥ पाशांकुशौ तदीयो
वु रागद्वेषात्मकौ स्मृताविति॥ तत्र राजेपि वासनापटले॥ मनोभवेदिक्षुधनुः पाशो राग उ
दीरितः। द्वेषस्यादंकुशः पंचतन्मात्राः पुष्पसायकाः इति। तत्र चतुःशतीशास्त्रे तु॥ इच्छाश
क्तिमयं पाशमंकुशं ज्ञानरूपिणं। क्रियाशक्तिमयं बाणधनुर्दंडज्वलान्मिस्कं॥ ५३ रामं०
मनोरूपेक्षुकोदंडा पंचतन्मात्रसायका। निजारुणप्रभापूरमज्जद्ब्रह्मांडमंडला ॥५४ संकल्प १८

विकल्पात्मकमित्याहुः रूपं मनस्तत्त्वं यस्मादिदं शामिकं तु रूपं दृष्टे यो मध्यं कोदंडे धनुर्पस्तः वामो ध्वंक
रे स्मात तथोक्तानां च संख्यानि तन्मात्राणि शब्दादीनि विषया ॥ तद्देवं तितन्मात्रं पंचकं तानामेतदेव
रूपमित्यर्थः ॥ तदुक्तं महास्वच्छंदसंग्रहे ॥ सूक्ष्मं तन्मात्रमसहस्पोर्थविशेषाणां निरूपकः ॥ शब्दस्तु
शब्दतन्मात्रमन्त्र सूक्ष्मकविनिश्चयः ॥ विशिष्टस्पर्शो रूपस्य स्पर्शतन्मात्रसंज्ञकः ॥ नीलपीतसमु
ज्वलत्वविशिष्टरूपमेव च ॥ रूपतन्मात्रमित्युक्तं मधुरत्वाम्लतायुतं ॥ रसतन्मात्रसंज्ञं तु सौरभ्या
दिविशेषितः ॥ गंधस्तन्मात्रं तन्मात्र तेभ्यो वै भूतपंचकमिति ॥ एतानि तन्मात्राणि पंच सायकाः बा
णाः यस्मात् कोदंडकेन तथोक्ता ॥ तदुक्तं वामकेश्वरतंत्रे ॥ शब्दस्पर्शादयो बाणा मनस्तस्याभ
वेद्धनुरिति कादिमतेपि ॥ बाणास्तु त्रिविधाः प्रोक्ताः स्थूलसूक्ष्मपरत्वतः ॥ स्थूलाः पुष्पमयाः सू
क्ष्मा मंत्रात्मानः समीरिताः ॥ परास्तु वासनाप्रोक्ताः स्थूलान् शृणु प्रिये ॥ कमलं कैरवं रक्तक
ल्हारेंदीवरे तथा सहकारकमित्युक्तं पुष्पपंचकमीश्वरीति ॥ तेषां नामानि तु कालिकापुराणे ॥
हर्षणं रोचनाख्यं च मोहनं शोषणं तथा मारणं चेत्यमी बाणा मुनीनामपि मोहदा इति ॥ ज्ञानार्ण
वे ॥ क्षोभणं द्रावणं तद्वदाकर्षणसुसंज्ञकं ॥ वश्योन्मादौ क्रमेणैव नामानि परमेश्वरीति ॥
तत्र रागे तु ॥ मदनोन्मादनौ पश्चात्तथा मोहनदीपनौ ॥ शोषणं चेति कथिता बाणाः पंच पुरोदिताः ॥

इति॥ अंथात्रुधमंत्रोद्धारः॥ स्वश्च अगश्च स्वं च तेषां समाहारो रागस्वं॥ अगशब्देन स्थाणुर्हकारः॥ हः शिवोग
गनेस्थाणुरिति कोशात्॥ स्वं सविंदुकईकारः॥ तेन रेफहकारेकारविंदुसमाहारो रूपत्र्यक्षरं यस्य पाश
स्येत्यादि॥ हकारो नर्मिहिरे फो वगनलः॥ संप्रदायात्॥ कोचवस्य आच्च कोधाः॥ तदुपरि भ्रूयमाणाः का
रत्नरूपो ह्रं ह्रां नलान प्रतेक संबध्नाति॥ कोकारधकाराकारा द्युत्यर्थः॥ तेन नंकुशेनोज्वलाः॥ अनुस्वारेरा
शोभमानाः॥ कौशे। न इति कुशाः॥ अकाराभिन्नः कुशो कुशः मन इति थकारस्य संज्ञा॥ थकाराधिका
रे रूदेन। साधिपो मन इति कोशात्॥ कोदंडो नुस्वारः॥ अकारश्च चुको दंड इति कोशात्॥ मनो रूपः कोदं
डः थकाराभिन्नो कार/ कोधाकोरेत्यादि नाम ह्रदकार रेफ ककार लकार यकार सकार वकार आ ई ऊ स्वराः
स बिंदुका विवक्षिता॥ इतर द्विविवक्षितं॥ तेषांच च्यासं प्रत्येकप्रयोगे बाराबीजानि सिध्यंतीति॥ आयु
ध बीज विभाग स्तु गुरुमुखादवगंतव्यः॥ निजः स्वकीयो यो ऽरुणाप्रभाया रक्तिम कांतिः पुरः प्रवाहस्तस्मि
न्मज्जंति॥ तद्भेदेन भासमानानि ब्रह्मांडानां मंडलानि यस्याः सा॥ प्रातःकाले सौभाग्यादिमासवि
शेषेषु याहक्षाध्यानं विहितं मस्ति ताह्रश रूपवतीत्यर्थः॥ ५४॥ चंपकाशोकपुन्नागसौगंधिकलस
त्कचा॥ कुरुविंदमणि श्रेणीकनत्कोटीरमंडिता॥ ॥५५॥ इदानीं अग्निकुंडात्प्रादानकस्थूलरूपमा
हमावेशीर्षस्य प्रथमतात्देवी मुखाभिन्नवाग्भवकूटस्य पंचदसां प्रथमतां च शीर्षमाभ्येवी पादपमा

तं वर्णयितुमारभते ।। चंपकादि शब्दास्तद्देशत्वात्पतितत्पुष्पेष्वपि निरूढलाक्षणिकाः ।। द्विहीनं प्रसू
वे सर्वं स्मितं अग्निपुराणकोशात् ।। चंपकानि चेत्यादि द्वंद्वः ।। सौगंधिकानि ।। कल्हाराणि तैः पुष्पैर्लसं
तः शोभमानाः कचाः शिरोरुहा यस्याः सा ।। कुरुविंदमणयः पद्मरागाख्याः शोणाः कामानुरागा
दिवर्द्धकगुणशालिरत्नविशेषाः ।। तदुक्तं गरुडपुराणे सौगन्ध्यायो ।। तस्याश्चैव पुज्वलचारुरागा भवं
ति तोयेषु च पद्मरागाः ।। सौगंधिकोत्थाः कुरुविंदजाश्च महागुणाः स्फाटिकसंप्रसूताः ।। बंधुकगु
ञ्जाशकलेन्द्रगोपजपाशशास्रक्सम वर्णशोभाः ।। भ्राजिष्णवो दाडिमबीजवर्णास्तथापरे किंशुकव
र्णभास इति ।। अत्र तत्स्याद्भुतस्य रावणगंगापार्श्वमार्धः ।। येन रावणगंगायां जायंते कुरुविंदक
ः ।। पद्मरागाद्भूनाकारं बिभ्राणाः स्तब्धस्फुटा विषइत्तु पक्रमातः ।। गुणातिशयोपित त्रैव ।। कामानुरा
गाः ।। कुरुविंदजेषु शानैर्नताहकूस्फटिकोद्भवेषु ।। मागल्यपुत्राहरि भक्तिदास्यूहद्विप्रदासे स्मरणा
द्भवंतीति ।। ईदृशानां श्रेणी पंक्तिस्तया कनता दीप्यमानेन कोटीरेण मुकुटेन मंडिता ।। ईदृश विशे
षणविशिष्टां देवीं ध्यायतां ममन्नपायं मिहद्धिर्भवतीति ध्वनिः ।। अष्टमीचंद्रविभ्राजदलिकस्थलशो
भिता ।।।। मुखचंद्रकलंकाभमृगनाभिविशेषका ।। ५६ ।। शिवा ।। चंद्रस्याष्टमी कला यस्यां तिथौ वर्द्ध
ते ह्रसति वा सा तिथिरष्टमी त्युच्यते ।। तत्संबंधीय श्चंद्रो ऽष्टकलायुक्तः समचंद्रार्धमिति यावत् ।।
तद्वद्विभ्राजता विराजमानेनालिकस्थलेन ललाटदेशेन शोभिता ।। ललाटमलिकं गोधिरित्यम

३० पुराणी॥ यकोशात्॥ मुखमेव चंद्र इति रूपकं॥ तत्कलंकेन तु सो मृगनाभेः कस्तूर्या विशेषकस्तिल
कोयस्यास्तयोक्ता॥ कलंकतिलकयोरुपमानोपमेयभावः॥ ५६ वदनस्मरमांगल्यगृहतोर
णावलिका॥ वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचना॥ इति रूपकं॥ चिल्लिकेति तु आर्वाचीनः
॥५७ वदनमेव स्मरस्य कामराजस्य मांगल्यगृहं हतस्य तोरणो बहिर्द्वारमेव वल्लिको भ्रूलता यस्याः॥
॥ परंपरितरूपकं॥ चिल्लिकेति तु प्राचीनः पाठः॥ आभुग्नमिसृष्टा चिल्लीतिललितास्तवरले
खपोग्रा चिल्लीशब्द एव भ्रूपर्यायः॥ वक्त्रलक्ष्म्या मुखकांतेः परीवाहे जलप्रवाहे चलद्भ्यां चंचलाभ्यां
मीनाभ्यां तुल्ये लोचने यस्याः॥ ॥५७॥ नवचंपकपुष्पाभनासादंडविराजिता॥ ताराकांतितिरस्का
रिनासाभरणभासुरा॥ ५८॥ नवं नूतनं यच्चंपकस्य पुष्पं न तु केवलकलिका॥ ईषद्विकसिता गंध
फलीति यावत्॥ तेन तुल्यो येन नासादंडस्तेन विराजिता॥ तारा॥ मंगला बाभ्रुकाख्या च तारका॥ दे
वी विशेषो वा॥ तस्याः कांतितिरस्कारिणी तिजयतीति तथा॥ तादृशेन नासाभरणेन माणिक्यमौ
क्तिकाभ्यां घटितेन भासुरा शोभमाना॥ ५८ कदंबमंजरीक्लृप्तकर्णपूरमनोहरा॥ ताटंकयुगली
भूततपनोडुपमंडला॥ ५९ कदंबमंजर्या नीपवल्लर्या क्लृप्तः कल्पितः कर्णपूरः कर्णोपरिभाग आ
बध्यमानः शेखरस्तेन मनोहरा रमणीया॥ ताटंकयुगलं कर्णाभरणद्वयं॥ तत्स्वरूपीभि राम०
भूतेस्य प्रकृतेः भावात्॥ अभूततद्भावे च्विः॥ तथा संपद्यमाने तपनस्य सूर्यस्योडुपस्य चंद्रस्य ३०

चंद्रस्य च मंडले यस्याः ॥ तदुक्तं ॥ सूर्यचंद्रौ स्मृतौ देव्यास्तावेव नयने स्मृते ॥ उभौ ताटंकयुगलमित्ये
षा वैदिकी श्रुतिरिति ॥ ५९ ॥ ॥ पद्मरागशिलादर्शपरिभाविकपोलभूः ॥ नवविद्रुमबिंबश्रीन्यक्का
रिरदशनच्छदा ॥ ६० पद्मरागशिलेवातिनिर्मलः त्वात्प्रतिबिंबग्राहित्वाच्चादर्शो दर्पणस्तं परिभवत्य
वजानाति ॥ ततोप्यतिशयेन कामेश्वरस्यातिबिंबग्राहित्वशोभाशालित्वात् ॥ ईदृशी कपोलभूर्गंडभित्ति
र्यस्याः ॥ नवौ नूतनौ विद्रुमबिंबयोः पक्वप्रवालतुंडीफलयोः श्रियं कांतिं न्यक्कुरुतोऽधःकुरुतस्त
तोप्याधिक्येनोन्नतात् ॥ तादृशौ रदनच्छदावोष्ठौ यस्याः सा ॥ ६० ॥ ॥ शुद्धविद्यांकुराकारद्विजपंक्तिद्व
योज्ज्वला ॥ कर्पूरवीटिकामोदसमाकर्षिदिगंतरा ॥ ६१ ॥ शुद्धा पापाद्यविद्यामलप्रतिस्पर्धिनी या विद्या
याः षोडशीरूपायाः अंकुराणामिवाकारः स्वरूपं यस्य तेन द्विजपंक्तिद्वयेन दंतपंक्तियुगलेनोज्ज्वला
शोभमाना ॥ श्रीमातृका हि मूलाधारादिस्थः परापश्यंत्यादिक्रमेण वैखर्यात्मना मुखान्निःसृत्य सती बा
हशी विद्यापश्चात्करणीकरणोपदेशेन वितन्वताम् ॥ तत्र शब्दब्रह्मरूपस्य बीजस्योच्छूनतावस्था परा ॥
स्फुटितावस्था पश्यंती ॥ मुकुलितावस्था दलद्वयं मध्यमा सम्यग्विकासमनप्राप्तं तेमिथः संसृष्टमूल
दलद्वयं वैखरी ॥ तदेवांकुरपदवाच्यं ॥ तादृशी यादंतैः साम्यमप्यस्त्येव ॥ षोडशाक्षर्यां कुराणाम
त्रं कुरदलद्वयेन द्वात्रिंशदंतसंख्यासंपत्तिरपि ॥ अतस्तान्यंकुराण्येव मूर्तिमंति दंतरूपाणीति तात्पर्यं ॥
द्विजशब्दश्लेषेण समासोक्त्यलंकारेणार्थांतरमपि ॥ वेदादयो विद्या हि ब्राह्मणेष्वेव प्रतितिष्ठंति ॥

३१ विद्याहृदैब्राह्मणाम्भोजगामेभिःश्रुतेः॥११॥ तेनोपदिष्टाः सप्तोऽत्र विस्तरं प्राप्नुवंति॥ अतो हेतोर्ब्रा
ह्मणा एवंविधाः कुरुरूपाः॥ ततः श्रुद्धा निर्मला सती विद्यांकुरकारणं च सती या हि ज्ञानं ब्राह्मण
नां पंक्तिस्ताद्दृये लोजना॥ आह्मणानाम पंबामुखान्धिः स्नतत्वेन एतव मूर्तिमंतो दंता इमिताम
ये॥ यद्वा श्रुद्धविद्या चबाला वद्वादशार्धा पञ्जगिनीत्याहिक्रमेण ग्नानुत्तरपर्यंताद्वात्रिंशद्दीह्मालं
त्रेषु प्रसिद्धा स्त्रा द्विजपंक्तिपदेनोच्यंते दीक्षायां प्रियजन्मरूपत्वात्॥ तपनयनापेक्षया द्वितीयत्वा
त्व॥ दीक्षाजन्मतृतीयं स्यादिति इतिवचनसमात्रुरुत्रयाजन्मनेलनाभिप्रायकत्वेना विरोधात्॥
श्रुद्धविद्यात्र्यकुरीसेवांकुरमारंभोपस्यामाता श्रुद्धविद्यांकुरा। आकारे सत्राऽङ. परतोऽकारप्रश्ले
षणाऽङ.कारयोरभिविध्यनुत्तरवाचकत्वेनानुत्तरपर्यंततेमध्यैः। शुद्धविद्यांकुराचसाऽत्राऽकाराचसा
द्विजपंक्तिश्चेतिकर्मधारयोऽतरं तस्याद्दपोनोज्वलाभासमानेतिविग्रहः संप्रदायक्रमापातद्वा
त्रिंशद्दीक्षादीक्षितोतः कर्तोः पुरुषधौरेयैरेवलभ्यानाम्नैरितिभावः॥ तेयेकालवंगकर्पूरक
स्तूरीकेशरादिभिः जातीफलदलैः प्रगेलंगिलक्ष्वणनागरैः। इत्तोः खदिरसारैः स्वयुक्ताकर्दे
रवीटिकेतिलक्षणालक्षित स्तांबूलस्यामोदं परिमलं समाकर्षतिस्वस्वाभिमुख्येनप्रसारयंति राम०
यादृशः प्राच्यादौदेशदेवतान्तरवांतरं परिधानं यस्यास्ता॥ ताभिर्देवताभिरलाभु मुखकमलवि ३१

गलतां भूलबूबलनापेक्षिणी गिरपि तदलामात्रमयमनिमतपरिमलएवाहं पूर्विकमायोगपद्येन
समाकृष्य सर्वा गिर्गृह्यते। तत्रिक्षप्येवाहिंता आहंतपरितोऽ हष्पपचेषेण। स्थितार्इ तिता सर्वगम्य
न्ये क्वाण्वननादिहवल्लुनालंकारध्वनिः॥ २५॥ निजसल्लापमाधुर्यविनिर्भर्त्सितकच्छपी। मंदस्मि
तप्रभापूरमज्जत्कामेशमानसा॥ २६ निजसखीयस्य स्वतंशो भनस्यत्रस्त्रविषयकस्य वाला
पस्य वर्णात्मकशाब्दस्य माधुर्येणामंजुलतया विशिष्यनिःशेषेण भर्त्सिता तिरस्कृता कच्छपी
वीणा यया सा। लोके हि वर्णाभिव्यक्तेरभावेपि षड्जादिस्वराभिव्यक्तिमात्रेणाज्ञातचेरानेवव र्णातन्त्री
यमंजुलमात्रं लिङ्गयेवीणाभादेहविरित्यनुभवेः। स्पष्टतरवर्णाभिव्यक्तितदधिकमाधुर्यशालिनः स
ल्लापस्य तु सर्वातिशायित्वेनाविवाद इति। स्मितमीषद्धासः। सोपि मंदः। तस्य प्रभा कान्ते लावण्य
प्रवाहे मज्जतीति मज्जन्तनन्तमानुमेएकत्र मयस्यावयवान्तरसंचारविलोपपत्तेः। इदंसवयवान्तरसं
चारणंथ्यपतने चनस्मात्रिःसन्तु नामिवांछन्ति चेति वर्त्तमाननिर्देशेन ध्वनितं॥ कामः कामकला
शरीरस्थूलकोबिन्दुरग्रीषमार्कोर्विः। तदुक्तं कामकलाविलासे॥ बिंदुरहंकारात्मा रविरेतन्मि
थुनसमरसाकारः। कामः कमनीयतया कलाचदहनेंदुविग्रहौ बिंदू इति। स एव सर्वेश्वरो राजरा
जेश्वरसमस्तसमानसंपन्नाः सा तथोक्ता। मीमांसकमते विभुनोपि मनसो मज्जनकथनेन प्रभापूर
स्य निरवधिकाधिकावेवसूच्यते॥ २७॥ ॥ अनाकलितसादृश्यचिबुकश्रीविराजिता॥ कामेशब

३१ ह्रु मांगल्यसूत्रशोभितकंधरा॥ ६३॥ वाग्देवतामारभ्योद्द्यावद्वर्णयिष्यत्प्रद्वैः काश्चिभिरन्यकालि
तै आसमंताद्दिभिर्व्याप्य नकलितं समस्तकनलब्धं॥ स्र सोपमानस्यालाभात॥ अपितु मुखमुकु
रहत्तत्स्यपत्किंचिदुपमानेनलब्धं प्रायं यस्माहृश्यमोपमं यस्मान्माहृश्यपाचित्तु काश्रियाविरात्ति
॥ कामेशेनपरमशिवेनबद्धंयन्मांगल्यसूत्रं कामोज्जीवनहेतुभूतं सौभाग्याभरणं तेन शोभिता
कंधरा ग्रीवा यस्याः॥ ६३ कनकांगदकेयूरकमनीयभुजान्विता। लग्रैवेयचिंताकलोलमुक्ताफ
लान्विता॥ ६४॥ अंगदस्तातीतिअंगदंशरीरयष्टिकमित्यर्थः॥ कनकमेवांगदं येषां तैः सुवर्णोकशरी
रकैः केयूरैर्दोर्भूषणैः चतुर्भिः कमनीयाः रमणीयाः ये भुजाः तैरन्विता युक्ता॥ ॥ अंगदकेयूरयोराकृति
वैलक्षण्यमाश्रित्याभरणद्वयपरं वा व्याख्येयं तत एव ब्रह्मोत्तरखंडे सप्तमेध्याये शिवध्यानप्रकार
णप्रयोगः॥ ॥ दधानं नागवलयकेयूरांगदमुद्रिकाइति॥ अन्यत्रापि केयूरांगदहारकंकण
मुखालंकारविभ्राजितामिति॥ केयूरमंगदं दोर्भूषे सग्रिपुराणांतु भुजभूषणत्वेनानुगमप्यक
र्थं न परं॥ नहनु सारित्वादमरसिंहोपि तत्र एवमदोषः॥ रत्नखचितग्रैवेयमेग्रीवाभरणेन चिं
ताकेनान्यादोलोवर्णो न लोलेश्चंचलैः हारभावमापन्नैः मुक्ताफलैश्चान्विता॥ रत्नमयग्रीवासू
त्रबधीचयच्चिंताकं तदधसिर्यक्मंडितलंबमाने मुक्ताफलेरितिकाभरणपरं वा॥ ग्रीवायामेव चिं एम०
तादानं एयातेग्रैवेयचिंताका॥ ॥ उपर्युपर्यापततएव ध्यानं ये कुर्वंतिनपुनर्देहनकुहरांतर्देवता ३१

पिक्षुट पितं क्रमात्तेमध्यमाधिकारिणाइत्यर्थः॥ लोलाःस तत्क्षात्र्यवमाधिकारिणः॥ लोलश्चलस
त्त्वहृपयोरित्याद्धिपुराणागानुयायमरः मुक्ताऽन्नमाधिकारिणः। एते पांत्रयाणामपियानिरलभू
तान्या फलानि॥ अग्र फलानामधिकफलानिच॥ आडीषदर्थेऽभिव्याप्तावितिकोशात॥ तेन विद्यानन्द
नेनसरइतिप्रकृतोमयविषयकक्षेपः॥ ६४॥ ॥ कामेश्वरप्रेमरत्नमणिप्रतिपणस्तनी॥ ॥ नाभ्याल
वालरोमालितनलताफलकुचद्वयी॥ ६६॥ कामेश्वरस्य प्रेमैवरत्नमणिः रत्नोत्तमः॥ तत्पणनविषये प्रति
पणभूतोस्तनौयस्याः सेतिशेषः तत्परः स्तनयोर्विशेषणं वा॥ स्तनरत्नेविक्रीयप्रेमरत्नक्रीत
वतीतिभावः॥ तेनदृढगुणभूतस्तेनेनरूपविक्रयाभावच्चतुर्णांपरस्परत्वतापायेनप्रेमपूर्णहृत्वभावः
॥ पातिव्रत्यातिशयश्चध्वनितिविनिमयालंकारेणावस्तुध्वनिः॥ नाभिरेवालवालो लतावापस्थ्यं ओयस्याः रोमा
त्पिन्निलतायास्तस्याः फलभूता कुचद्वयीयस्याः सेतिपरंपरितरूपकमुत्प्रेक्षा संबंधातिशयोक्तिश्चे
तिसंकरः॥ ६६॥ लक्ष्यरोमलताधारतासमुन्नेयमध्यमा॥ स्तनभारदलन्मध्यपट्टबंधवलित्रया॥ ६६
॥॥ लक्ष्यस्थितुयोगाल क्षज्ञापमानेतियावत्॥ ज्ञाप्यमानसेवलिंगस्यानुमितंप्रतिकारणत्वात॥ लिं
गंज्ञानमात्रस्यकारणतावादेऽपिलिंगज्ञानयोर्विशेष्यविशेषणभावेविनिगमनाविरहेणोभयप्या
ऽपकारणतायाद्धुर्निवारत्वात॥ अनागतादेरपिवोद्धाकारसत्त्वात॥ तथाचगोतमसूत्रं॥ बुद्धि
सिद्धंतद्सदिति॥ लक्ष्यापारोमलताधारतालेमात्ररलिहत्पवत्वावापद्धानतं॥ आधारतासंबंधेनरो

३३ मलत्वैव लिंगमिति पादपपववान्॥ रोम[illegible]तावत्यादिति प्रयोगः॥ मध्यमस्य रोमलतया सामर्थ्यात् काव्यलिं
गालंकारः॥ यद्यपि निराधारो हारो [illegible]थपकस्याद्यपुरतः इत्यादाविव स्थानान्तर भागानेकवर्णापाः
पदमध्ययतेः साधुतायाः समुन्नाद्यतस्मात् परत्वेनैव अस्थित्वात् पातादंतयतेः अगामत्तमववं धक्रे श्लाना
शायनारायणावैरणसरोजद्वंद्वमानंददायी मादाविवाधार तेम्यस्य मध्येन साधुत्वं॥ तथापि गतमं
डव्यादिमुनीनां छंदः शास्त्रप्रवरमिति प्रदर्शितं छंदोभास्करे स्माभिः॥ ता न यो भीरेणागौरवेणादल
नइवमध्यस्य दार्ढ्यार्थं कृतः पट्टबंधः कनकपट्टिकाभिः बंधरवलित्रयं यस्याः सेतु त्रिवल्यातिशयो
क्ति॥ ६६॥ अरुणारुणकौसुम्भवस्त्रभास्वत्कटीतटी॥ रत्नकिंकिणिकारम्यरशनादामभूषिता॥ ६७॥
॥ अतिशयेनारुणामरुणासरा॥ कांतायाः क[illegible]ग रक्ता तु इति वदतिशयस्वीकृपाद्योतनार्थ॥
कुसुम्भेनरक्तं कौसुम्भं च यद्वस्त्रं तेन भास्वती भासुरा कटौ यातटी यस्याः॥ रत्नमयीभिः किंकिणीकाभिः
क्षुद्रघंटिकाभीरम्यरशनाः भिन्नेन दाम्ना मौर्वी मेखला सूत्रेण भूषिता॥ ६७ कामेशज्ञातसौ
भाग्यमार्दवोरुद्वयान्विता॥ माणिक्यमुकुटाकारजानुद्वयविराजिता॥ ६८॥ कामेशेनैव ज्ञाते तदे
कसाक्षिके सौभाग्यमार्दवे लावण्यकोमलत्वे ययोस्तयोरुर्वोर्द्वये नान्विता॥ माणिक्यमुकुटं अखंड
माणिक्येन निर्मितं मुकुटं टोपिका नाम कन्नु आभरणं मावरणं पत्रस्वाकारो ययोस्तयोर्जानुनोरूरु राम०
पर्वणोर्द्वयेन विराजिता॥ ६८॥॥ इंद्रगोपपरिक्षिप्तस्मरतूणाभजंघिका॥ गूढगुल्फा कूर्मपृष्ठजयिष्णु ३३

प्रपदान्विता॥ इत्यर्थः॥ इन्द्रगोपकः ॥ रक्तवर्णा कृमिविशेषाः॥ ते परितः क्षितौ खचितौ यो स्मर
सकामशास्त्र सूत्र रोगेन पंगोता भ्रांतु ल्लेनं श्रेस्म जं धिक्के यशाः॥ यदिनैः खचितौ स्यातां तदोपमा संभा वे
नेत्थु पमा या मभृ जानां शङ्कनि॥ गृ हीं मांस लोलु लोौ पालीय स्याः कूर्म योः दृष्टे जय न इति जयिष्णुनी ये
प्रपंदे पाश्रे ता भ्यां मन्विताज यिष्णु पद मिराग्रह स्यानें॥ नत्वस्याजि। स्वस्व स्तु रिति लुप्त मस्यानं जिष्णु
रिमापतेः इस्तु चेविधानं तमु वक्तुति स्तत्रोष्ठकाः स्यानुकामत्तु वर्यार्थं तकेन हृदि कृताख्यानान्नत
लूत्रे छ दसीत्य इत्ति सुन कार्या म स्नुर्मितिहम नितंसंम क्तोऽपि प्रयोगात्। यमोगभारणावे पाक
रणा इति माघात् तस्मात् कृयिष्णु भ्राजि स्नु वज्रादि सुर पिसा चुरेव दीधिति सद्गन्न नमज्ञान तमो गुणा
पदं हृ प्रभाजा लपराहोत सरोरुहा॥ ७० ॥॥ न दत्ता न पादन्नू रव चंद्राणां दीधितिभिः। किंरागैः स
म्य क्कृ छन्नो लोपितो न मतो ब्रह्म विस्मादिजनानां तमो गुणोः ज्ञानं न यशाः। पादध्यानेना ज्ञान नाशः इतिभा
वः॥ यद्वा अस्या श्लगलस्येन खवंदे पुनमज्ञान कीटम रोग राग छाया प्रतिबिंब बाकृत्ये न दीधि
तीनां विशेषमानाभावे नेता सात मोनाशा ध नमज्ञान हृदयान्तः प्रवेशा उत्ते उत्ते कविभिरिति भावः॥ तथा
च मत्स्य पुराण पद्म पुराणयो॥॥ यावेस्ताः ता मुह्निकलह्रूणा मिह श्वतोनोरदस्य वाक्यं॥ नजातो स्मा
प ति मे ह्रे लक्षणौ च विवर्जिता॥ उन्ना नहसा स्त त्तेव रांगैर्म मि चाभिः॥ सद्भावपाप विश्वेषं किमन्य
वृद्ध भाषते इति मे नाम स्तुकेनल्लक्षणा मे दे मा निकथितानीति धामया हिम वता सह तः संदृष्टो नारदः

३५ वाच॥ हर्षेणाधिक्येनेऽपि महति त्वयापाङ्गः स्वंनिवेद्यते॥ अपरिछिन्नधीःकवामार्थेर्मोहं पासि महागिरे॥
इन्द्रादिनां नज्ञातीस्याः पतिरिन्द्रादिवाक्यानामर्थं निर्वर्तनेन कल्पितं। प्रोक्तं न्तु कं मया पादौ स्वच्छा
याव्यभिचारिणौ॥ आस्याः शृणु मम माता पिता वो यद्युक्तो लसन्तम्॥ चरणौ पद्मसंकाशावस्यास्वच्छ
नखोज्वलौ॥ सुरासुराणां नमतां किरीटमणिकांतिभिः विचित्रवर्णौ हीं स्यति स्वच्छायां प्रतिबिंबितैः
त्र विभूषणाशयिष्यंति तेषां हार्दं न मे गुरणामिति॥ ॥ पदद्वयस्य चरणयुगलस्य प्रभाजालेन सौष्टवा
दिगुणासमूहेन पराकृते निरस्तसरोरुहे कमले यस्याः सा॥ ७० सिंजानमणिमंजीरमंडितश्रीपदांबुजा
॥मरालीमंदगमना महालावण्यशेवधिः॥ ७१॥ ॥सिंजाना भूषणाजन्यशब्दविशेषं कुर्वाणा मणयो ययो
स्ताभ्यां मंजीराभ्यां पादकटकाभ्यां मंडिताश्रीर्ययोस्ताहशे पादांबुजे यस्याः॥ नद्यृतश्चेत्यविकल्पितोऽपि
कप्रत्ययः समासांतविधेरनित्यत्वान्नेह भवति॥ मंडिते श्रीयुक्ते पदांबुजे यस्या इति त्रिपदबहुव्रीहिर्वा॥
मरालो हंसः स्वभावतो देवमंदगतिः॥ तत्रापि स्त्रीजातीया विशेषत इति मराल्येवोपात्ता॥ तस्या इव मंद
गमनं यस्याः॥ महतो लावण्यस्यातिशयितसौंदर्यस्य शेवधिर्निधिः॥ निधिर्ना शेवधिरित्यमरः पुराणा तु॥
अतएव परवल्लिंगं द्वंद्वतत्पुरुषयोरिति पाणिनिस्मृत्वात्तु ल्लिंगमिदं नाम॥ तेन शेवधेपेन महदृत्येव प्रयोगे
नपाक्षिकः शेवध्येनमहदिति॥ ७२ सर्वारुणानवद्यांगी सर्वाभरणभूषिता॥ शिवकामेश्वरांकस्थाशि राम०
वास्वाधीनवल्लभा॥ ७३॥ ॥वसनाभरणकुसुमाकामादिकं सर्वमेवारुणं यस्याः॥ अवद्यानिंद्यानि ३५

न्भवंतीत्यनवद्यानि सलक्षणान्यंगानि अवयवा यस्याः॥ सर्वैः श्रृंगारमणिप्रभृतिपादांगुलीयकांतैः
कालिकापुराणोक्तैश्चत्वारिंशद्भिरलंकारैः पितांबराणैर्भूषिता॥ एवं स्थूलं रूपमुक्त्वा इते वक्ष्यति
स्थानामाह॥॥ शिवकामेशांकिता॥ कमनीयत्वात्कामः॥ कामः कमनीयतयेत्युक्तेः॥ कामं यथे
च्छं रूपमस्येति वा कामः॥ ईदृशशम्भुमन्मथैवमन्मथेकामदत्रज्ञाते॥ कालिकामः कमनीयतयेत्यु
क्तेः॥ कामं यथेच्छं रूपमस्येति वा कामः॥ ईदृशशम्भुमनसैवमन्मथेकामदप्रसिद्धे॥ कालिकापुराणो
मदर्शनात्॥ जगन्तु कामरूपत्वेन तत्समो नैव विद्यते॥ अतस्तं कामनाम्नापि ख्यातो मन्मथनामभवेति॥
प्रज्ञानमेव वा कामः॥ तथा च श्रुतिः॥ यदेतद्धृदयं मनश्चैतत्संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टि
र्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधे
यानि भवंतीति॥ अत्र प्रज्ञानशब्देन शिव एवोच्यते॥ स्कांदे ब्रह्मगीतायां तथैवोपबृंहणादर्शनात्॥
शंकराख्यं तु विज्ञानं बहुधा शास्त्रकोविदैः केचित्त्वदयमित्याहुरात्मत्ववशाइ मास्तिकाः केचित्सर्वाण्ये
तानि संततं॥ प्रज्ञानस्य शिवस्यास्य नामधेयान्यसंशयमिति तत॥ जगन्नियंत्रा भवानीश्वरः कामपद
वाच्यः॥ तथा च बृहदारण्यके श्रूयते॥ आत्मैवेदमग्र आसीदेक एव सोकामयत स्याद्येतावान्वै का
मइसंतं॥ शिवश्चासौ कामश्चासौ वा ईश्वरश्चेति कर्मधारयः॥ गुणिरूद्धमदनयोर्निरासायपदत्रयी
॥ तस्यांके वामोत्संगे तिष्ठतीति निषण्णा अत एवाह॥ शिवा॥ वशकांतो शिवः स्मृतः॥ कांतिरिछाप

३५ परिशिवे द्वारूपेणार्थः ॥ इच्छारूपायाः शक्तेः शिवाधारकत्वादिति भाव ॥ शिवाभेदाद्व्हा शिवा ॥ तत्र
शिवपदं न हि किंतु शैवागमो हेतुः साक्षितपाद त्रिप्रागभावस्यैव स्थितः ॥ बुभुत्सायास्त्वथ्याज्ञोऽस्मी
त्यायात ज्ञानवस्तुनः ॥ असत्त्वालंबनत्वेन सतः सर्वजडस्यच ॥ साधकत्वेन चिद्रूपः सदाऽऽत्मा सद
नतः ॥ आनंदरूपः सर्वार्थसाधकत्वेन हेतुना ॥ सर्वसंबंधवत्वेन संपूर्णः शिव संज्ञितः ॥ जीवे
शत्वादिरहितः स्वप्रभः केवलः शिव इति ॥ तदभेदस्य प्रवृत्तिनिमित्तत्वाच लिंगपुराणोदर्शिता ॥ य
था शिव न तथा देवी यथा देवी तथा शिवः ॥ तस्मादभेदबुद्ध्यैव शिवेति कथ्यं त्वमामिति ॥ तत्रैव
स्थलांतरे ॥ उमा शंकरयोर्भेदो नास्त्येव परमार्थतः ॥ द्विधासौ रूपमास्थाय स्थितस्त्वेको न संशयः
॥ इतिः ॥ परमात्मा शिवः प्रोक्तः शिवा सैव प्रकीर्तितेति च ॥ पद्मे वै भपर्वखंडेऽपि ॥ चिन्मात्राश्रयमायाया
याः शक्त्याकारे द्विजोत्तमाः ॥ अनुप्रविश्य या सविन्निर्विकल्पा स्वयं प्रभा ॥ सदाकारा परानंदा स
संसारोच्छेदकारिणी ॥ सा शिवा परमा देवी शिवाभिन्ना शिवंकरी ॥ त्रारभ्यकरुणामामराभूतायः प्र
तापः प्रजयति शंकरी ॥ किं न सिध्यति तस्येह तस्याएव प्रसादतः इसंत ॥ अथवा ॥ वायो भार्या शि
वा नाम्नी ॥ उक्तं च लैंगेः ॥ समस्तभुवनव्यापी भर्त्ता सर्वशरीरिणां ॥ पवनाख्या बुधैर्देव ईशान इति
कीर्त्यते ॥ ईशानस्य जगत्कर्तुर्देवस्य परमात्मनः ॥ शिवा भार्या बुधैः प्रोक्ता पुत्रश्चास्य मनोजव इति ॥
वासं तु शोखरो वायुः शिवाशिव मनोरमेति च ॥ वायुपुराणेऽपि ॥ ईशानस्य मनोजव इति ॥ चेत् राम० ३५

धीयात्तत्त्वं वायुरिति स्मृतः ॥ तस्य पत्नी शिवा नाम पुत्रश्चास्य मनोजव इति ॥ यद्वा शिवं मोक्षं ददातीति
शिवा ॥ तदुक्तं देवीपुराणे ॥ शिवा मुक्तिः समाख्याता योगिनां मोक्षदायिनी ॥ शिवाय यजते देवी
ततो लोके शिवा स्मृता ॥ ॥ आगमे तु ॥ पावके सोष्णतेवेयं भास्करस्येव दीधितिः ॥ चंद्रस्य चंद्रि
केवेयं शिवस्य सहजा शिवेति ॥ एवमिच्छादिधर्मरूपापि न धर्मिणां प्रतियुता भूजेत्याह ॥ स्वा
धीनेति ॥ स्वस्यात्मनोऽधीन आयत्तो वल्लभो भर्त्ता कामेश्वराख्यः ॥ शिवस्य शक्त्यधीनात्मलाभकत्वा
द्धर्म्यैव धर्माधीन इत्यर्थः ॥ तदुक्तं कालिकापुराणे ॥ नित्यं वसति तत्रापि पार्श्वस्था सह नर्मकृत ॥ मध्ये
देवीगृहे नत्वत्र तदधीनस्तु शंकरः ॥ इति ॥ आगमेपि ॥ शक्तो यया स शंभुर्भुक्तौ मुक्तौ च पशुगणस्या
स । तामेतामपि चिद्रूपामाद्यां सर्वात्मना स्मि नत इति ॥ स्कांदेपि ॥ जगत्कारणतामाप्तः शिवो यो मुनिसत्त
मः ॥ तस्यापि सा भवेच्छक्तिस्तया हीनो निरर्थकः इति ॥ श्रीमदाचार्यभगवत्पादैरप्युक्तं ॥ शिवः श
क्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पंदितुमपीति ॥ स्वाधीनो वल्ल
भो यस्येति वा ॥ शर्यातिकन्यायाः सुकन्यायाः पतिरश्विभ्यां सह समानरूपः कृत इति तद्विशिष्टा जानता
न पायं भगवत्या भेदं स्वाधीनीकृत इति देवीभागवते सप्तमस्कंधे कथा स्मर्यते ॥ शरणांते जगन्मातः
पाह्यस्मिन् भक्तं खिन्ना ॥ रक्ष मे स्वसतीधर्मं नमामि चरणौ तव मा दिशार्थनोत्तरं एवं स्तुता तदा देवी
तपा त्रिपुरसुंदरी हृदि तस्या ददौ ज्ञानं येनाधीनः पतिर्भवेदित्याद्युक्तेः ॥ एवं शा आद्यं हृत्रिपिषष्टस्कं

३६ पीठे होदाहर्तव्या ॥ ७१ ॥ ॥ यद्यपि मन्त्रिमी [illegible] पीठवदिति सत्त्रेग होतिष्ठति
पीठे तिष्ठती ति यच्छगविप्रो प्राङ्गणयोर [illegible] लानलमाकाशंर पासंबंधाधिरू
प नारनाम्पीठमभागसाधिगज्ञातंगतत्वादि [illegible] पिठहेकति ष्टती तिवत्सी ठेकतिष्ठ
ती त्याका काणुदयामी ठमूपे ब्रह्मरे पामधिकरणा [illegible] मनुभवसि त्यमस्त्वेव। तेनमाये
न मु [illegible] त्वा त्वामेश्वरवामोत्तमप्रथमपू [illegible] हमेरुम ध्ये मादि ना ॥ सुमेरु
मध्य शृंगमध्ये श्रीमन्नगरनायिका ॥ चिंतामणि [illegible] नाश्चिता। सुमेरोहेंमाद्रे
र्मध्य शृंगे तिष्ठतीति तत्रस्था ॥ श्रीमन्नेमरुमध्य शृंगे [illegible] उर्द्धे तेहि शिवत्रिकोणा व श्रीणि
शृंगा णि जे षाम ध्ये चतुर्थ शृंग म स्ति। तद् क्तं ललिता [illegible] सममहामुनिभिः सजपति
सुवर्णशीलाः सकलजगद्धेकसंघटित मूर्तिः। [illegible] कुंजवाटीकंदलदमरीप्रपंचसंगीत
॥ हरिहयनैरृत मारुत हरितामंतेष्ववस्थितं तस्य ॥ विनुमः सानुत्रितयविधिहरिगौरीशविष्ट
पाधारं ॥ मध्ये पुनर्मनोहररत्नचितनलवकरं [illegible] तदिगतं ॥ उपरि चतुःशतयोजनमुत्तुंगंश्रृं
गंपुंगवमुपासे इति ॥ श्रीमत्सूची वघनं [illegible] रूपपद्मवलनगरपदं विद्यानगरवाचकं वकं
तस्य नायिका त्र्याधिपतिः तद्धनगरं द्वितीयं [illegible] कांतावनैर्मध्यगतः ॥ तदुक्तं ललितास्त
वराजे ॥ तत्र चतुःशतयोजनपरिणाहं देवशिल्पिना रचितं ॥ नानासालमनोज्ञं नमामहं नगर राम० ३६

मादिविद्यापाइति॥ तत्रमध्यशृंगे॥ चत्वारिंशत्तानीतिविग्रहः॥ ननुचतुःशतमुक्तमितिरितिपिंगल
सूत्रेइवचतुरधिकंशतमिति॥ तत्रश्लोकेप्रथमप्राकारस्यप्रथमंसहस्रपूर्वकषट्शतसंख्याक
योजनेपरिनइतिपरिमाणोक्तिविरोधात्॥ नानासालैः पंचविंशतिभिः॥ प्राकारैरितितदर्थः॥
अपरंसकलब्रह्मांडेबहिर्ब्रह्मागेसुधासागरमध्यगतरत्नद्वीपस्थं॥ तदुक्तंरुद्रयामले॥ अ
नेककोटिब्रह्मांडकोटीनांबहिरूर्ध्वतः॥ सहस्रकोटिविस्तीर्णसुधासिंधोस्तुमध्यमे॥ रत्नद्वीपे
जगद्दीपेशतकोटिप्रविस्तरे॥ पंचविंशतितत्वात्मपंचविंशतिवप्रकैः॥ त्रिलक्षयोजनोत्तुंगैश्रीविद्या
याःपरंपुरमित्यादि॥ विद्यारत्नभाष्येतु॥ क्षीरसमुद्रमध्येएकंपुरमस्तीत्युक्तं॥ परंतुतस्यचतुर्विंशतिः
प्राकाराइत्यस्तुक्तं॥ नत्वेकस्यप्राकारस्यन्यूनतायाम्लेगचेषणीयं॥ श्रीमन्नगरशब्दः श्रीचक्रप
रोवा॥ चक्रंपुरंचसदनमगारंनगरंगृहेतिविश्वाभ्योक्तेः॥ कगजदशारेत्यादिगौडपादीयसूत्रेश्री
पुरपदस्यचक्रेपरत्वेनतद्भाष्येव्याख्यानाच्च॥ नैतनमर्षिविदित्वानगरंप्रविशेतत॥ देवानांहृदयोप्रा
मृतेनाहृतांपुरीमित्यादिश्रुतिपुनगरादिपदानांचक्रेप्रयोगदर्शनाच्च॥ नगरचक्रयोरभेदाच्च॥ त
स्यनामिनीलयोः॥ चिंतितार्थप्रदाश्चिंतामणिनामकालविशेषास्तेरेवरचितस्यगृहस्यांतस्ति
ष्ठति॥ तद्गृहंहिब्रह्मांडेसहस्रयोजनं॥ सहस्रयोजनायामंचिंतामणिमयंगृहेइतिरुद्रया
मलात॥ नेयंतस्यपरिमाणं॥ श्रृंगारवर्णनायेसोत्तस्ततः सकलविबुधसंसेव्यं॥ चिंतामणिग

॥ ॥ चिंतावितांहरीकरोतु मे सदनमिति ललितालयस्य लाजा॥ गौडपादीयसूत्रभाष्येतु सर्वं चिं-
तितार्थं उत्र मंत्रार्थं निर्माणस्थानं तद्देवेति तत्र चिंतामणिगृहस्य सिद्धकान्तं निर्माणप्रकारो विस्ते-
रेण च लिखितः॥ पंचभिर्ब्रह्मभिः निर्मितमासनं मंचकरूपं तत्र संस्थितम्॥ तदुक्तं बहुरूपाष्टकतंत्रे
मे रत्नद्वीपमलं तत्रेच॥ तत्र चिंतामणिमयं देव्या मंदिरमुत्तमं॥ शिवात्मके महामंचे महेशानो-
पबर्हणे॥ अतिरम्यतले तत्र कशिपुश्च सदाशिवः॥ भूतकाश्च चत्वारः पादा मुहेशं च पतद्ग्रहः
॥ तत्रोपरि परमेशानी महात्रिपुरसुंदरीति॥ भूतकाः स्तासु हिणहारिरुद्रेश्वर ईश्वराः॥७३
महापद्माटवी संस्था कदंबवनवासिनी॥ ॥ सुधासागरमध्यस्था कामाक्षी कामदायिनी॥ ॥७४
महीति पद्मानि यस्या मी ह प्रणामेत भावने सप्तकिरणति॥ पद्माटवीस्वरूपे महत्त्रिलक्षयोजना
यामं महापद्मवनं नाहत इतिरुद्रयामले लोकमेकं॥ ललितालयलोकमध्यं तु॥ मणिसहस्रस्तालयो-
रधिमध्यं सुधाजलभूमिरुहदीर्घैः पर्णैः पयोदपूरैः कुंकुमाकांडैः च योजनोत्तुंगैः मिलितैस्तालैः
पंचकमालिभिर्मिलितां च केसरैकंदैर्वैः संततगलितमरंदस्त्रोतोनिर्मलिलिंदसंदोहां॥ पाटीरपवनबाल-
धाटीनिर्[illegible]पिंजरितां॥ पद्माटवीमजस्रं महः परिमलकल्लोलपल्लवोपांतामिति॥ ब्रह्मांडस्थि-
तसहस्रदलपद्ममपि पद्माटवीसु स्यते॥ उक्तं च [illegible] दंतच्छे॥ तस्मोहर्षकुलं पद्मं सहस्रारं स धीमुख राम०
खमिति भक्तैः ममहापद्मवनं चेदं समनान्तस्य चोपरीति॥ ब्रह्मांडपिंडांडयोरेकरूपात्वं॥ इदं चाहरो ३७

१निषङ्गाख्ये श्रोडीमवजमामुङ्करीतिवा क्वचाख्यानावसरे स्पष्टीकृतं॥ कदंबानां नीपानां वने वसती
ति तथा॥ चिंतामणिगृहं परितो मणिमंडपं तत्परितः कदंबवनं॥ तदुक्तं भैरवयामले॥ बिंदुस्थानं
सुधासिंधुः पंचयोन्यः सुरद्रुमाः॥ तत्रैव नीपश्रेणी च तन्मध्ये मणिमंटपं॥ तत्र चिंतामणिमयं
यमिमादि॥ सुधासागरः पीयूषार्णवः॥ स चोर्द्धस्थ एकः पिंडांडे बिंदुस्थाने सहस्रारकर्णिकाचं
द्रमध्येन्यः॥ अपराजिताख्ये सगुणब्रह्मोपासनाप्राप्ये नगरे अरण्यनामकौ द्वौ सुधाहृदौ साग
रप्रतिमौ शारीरकभाष्ये, नावृत्तिः शब्दादिति सूत्रे कथितावमौ॥ अविशेषात्सर्वे यहि गृह्यंते॥
तेषां मध्ये तिष्ठतीति तथा॥ कामेकमनीये॥ अक्षिणी यस्याः समासांतष्टच्॥ कामेश्वरस्य नेत्रे य
स्या इति वा॥ नेत्रविषयत्वान्नेत्रत्वमुपचर्यते॥ कांचीपीठाधिष्ठात्र्या इदमसाधारणं नाम॥ कामा
न्मनोरथान्ददातीति कामदायिनी॥ कामेश्वरमेव वा भक्तेभ्यो वितरति शिवाभेदज्ञानाभिप्रायेण वा का
मदायिनी॥ कामं मन्मथं यच्छति स्वधयतीति वा कामदः शिवस्तेन अयिनी शुभावहविधिमती॥ अ
यः शुभावहो विधिरित्यमरः॥ अथवा॥ दायो नाम पित्र्यादिपरंपरार्जितं स्वं॥ ततश्च कामेश्वरे
ण दायवती॥ तदभिन्नानादिसिद्धस्ववती सेधीः॥७८॥॥ अथ परिभाषायां चतुःषष्टिनामानि
विभज्यंते॥ अर्द्धं च तुर्विंशतितनु द्रोहोहुवगुणागणोदशपात्॥ इभाचेह सोमे सभावे हि चतुर्गु
णा गलैर्गिरा॥॥१०॥॥ अर्धानां चतुर्विंशतिः ततस्तकारात्षडक्षरमेकं नाम॥ ततो नकाराद्दशाक्ष

३८ रां॥ नकारः समृत्येसंदेहे तितत्वेपितावन्मात्रस॰ ॰ ॰ संख्यात्वायोगादेकांतरस्ताहित्यापेक्षापांप्रथ
38 मोपास्थिति न्यायेनैकांतस्मानेदशदशसंख्यावाचकत्वसिद्धेः॥ टवर्गेरिशमत्वादेपिनसिध्येः॥ द
शपा॥ इति तत्रैकादशानांपादानांक्रमोन्यासत्वेपि छंदोनुरोधात्त्वदुमान्यथैकादशःपादः प्रथ
गुत्तरार्धदिकारोक्तानिदिष्टः चत्वारि॥ चत्वारिनामानीत्यर्थः॥ ननु चतुरक्षरमेकंनामेतितत्रयात्वे
ए केनैव चत्वारिकारा ग्रहणेरोसिद्धेऽधिकंकेवैयर्थ्यात्॥ एकाद्यादि संख्यावाचकपद
संबंधिभिन्नेरेनवरौरसंख्याप्रवक्तारस्मात्संकर्षार्थमंगीकारस्योक्तत्वाच्च॥ ततश्चत्वारि
नामानि किंत्विकारहरस्तासाकांक्षामापरस्सराकृरसंख्यावेपमेमानाभावात्संमस्साहश्रु
तत्वादितिमायेन समसंख्याकाकृरस्तीतिसिद्धेर्थसाध्यपारथीनांवामध्यएव त्वपिनियमोत्र
त्वारिचत्वार्यष्टावष्टोवाकृताप्येतिसिध्यतिनतन्नवनवेत्यादि॥ अर्धासिरतो द्वितीयनामस
माप्तामतेः॥ छंदःस्वविरोधेन नत्वानिष्टता॥ चतुरष्टसंख्ययोरन्यतरन्निय मस्तुभक्तिपि
यामुक्तिं गम्यो भक्तिवश्यपाम पापहेत्वर्थ॥ पालोचनेष्टतोस्तु प्रतिमतोचतस्र ज्ञानएव॥ न
ह्ययंपञ्चमः सहस्रनामाकृरस्तारमगुरुरचयितोः कृतः॥ किंतुज्ञातहृरानप्रतिविभाताम॰
गसूक्ष्मीनापा श्रुतश्लोककृतज्ञानमार्गे कृतानन्तनेष्वतु चतुरक्षराणीतिज्ञातंनशक्यमेवा॥ ३८
नचैतेरन्यत्राप्येवमेवज्ञाता अन्यत्राकृरैवैयर्थ्य॥ कुम्रनानामपिसंदेहहस्यप्रचुरप्रद

शंपि स्वमात्मतादन्यथा ब्रह्मलाकात्सत्वाणामपि विषयपर्यापत्तेः ॥ अथापि यद्यदनुष्ठोऽरेद्वे नामनी विमले
तेन दत्तगुरोरिति गकारेणाशरवंद्र विभानने सवेशरवमिति स्म कुंदस्वामिन्नामत्वापतिः ॥ तत्रापि स्व
मादिष्टापलिंवंदनस्तु नात्राधिकारिणः ॥ तत्कथं योगवासिष्ठे ॥ नामानमन्नोनोस्तं तुः सोस्मिन् शास्त्रेधि
कारवानिति ॥ तेष्मात्विमो पर्यनुयोग समाधी सर्वशास्त्रेष्वपीति ॥ १० ॥ अथ यदे मा स्वरूपस्यका
यौणिस्य छतमानदन्नेवरहस्यभूतं परंहन्यं परहस्यां कि मिरेववर्णौ पितृमारे मेत ॥ देवधीमादि
ना ॥ देवादिगणसंघातस्वरूपमानात्मवैभवा ॥ मंडलस्य बहिर्युक्तो शिक्षिसेनासमन्विता ॥ ७५
॥ ॥ देवगणरूपाविगणानां स्वरूपसमयोः संघातेन महासमुदायेन स्वरूपमानं आत्मा स्वरूपं यस्य ता
दृशो वैभवं यस्याः ॥ स्वरूपमानमात्मावैभवमात्मनो यासां पक्वेस्वपस्य वासां ॥ अथवा देवदिगणो
: संघातस्तु स्वरूपमानं बहुप्रकारेण स्वरूपमानमित्यर्थः ॥ यद्वा संघातो नरकविशेषस्तन्निरासार्थं
स्वरूपमानमित्यादि ॥ पापस्यप्रायश्चित्तमित्यादौ पक्षानाशनाशकभावसंबंधार्थकत्वदर्शनादिहा
पि षष्ठीसमासः ॥ यद्वा सत्यकुद्यातो मंडलस्य बहुवत्सडुहेमा न स्वरूपमानमित्यादि ॥ अतएवोत्तर
नामनि तत्तु त्ररभावितद्धयोद्योगकथने अतएव प्रस्मोड पुराणे मंडलस्य रपीडितेर्देवैः स्तनजयदे
विजगन्मातरित्यादिना देवीस्तवं निर्वर्त्यैव यावत्स्वराणुस्वमिमकेदे वानां वाक्यं । यदिन्तु शासिकस्य

३९ णिवपंदेतेदं पीतागदुर्लभजीवितं चापितेवांगताः शरणार्थिन इत्यादि। अमृत्वापि ततः कदाचिदागत्य ना
रहो भुवनं [illegible] यापरमं दासं किं मुधा चरिन आनित इत्याह भ्रांत्यापंमंडाखुरीहे विवाधतेजगतां त्र
यं। [illegible] मेवदेवो [illegible] लपरैः स्तुरैर्सिद्धिः [illegible] स्तुत [illegible]॥ देवा ब्रह्मादयः॥ सषयो वसिष्ठादयः
॥ देवर्षयो नारदादयः॥ देवर्ष [illegible] देव [illegible] तिगणाः [illegible] गणाः आदित्यादयः॥ आदित्यवि श्वव
सवस्तुषिताभास्वरानलाः॥ महाराजिकमा [illegible] देवताः इत्याग्निपुराणात्॥ तेषां संघा
तः समुदायः॥ अनेककोटि [illegible] कोटि [illegible] दिरूपा मूलोकं स्वेनरूपमानाम
न्यैः॥ तेनव्यराशां ध्यातारो भ्यापो [illegible] शंभुनीयः॥ अथ पूर्वरूपपरत्वपके देवादिरूपमा
नत्वविशेषणात् रविलासुमतेऽखिलपारि [illegible] दिल [illegible] देचेतन्यमेवात्मेति शैवशास्त्रोक्तेः स्वरू
पं ध्वनितं॥ आद्यिपुरोलिपि॥ तस्य चेतन्यस्य [illegible] प्रथमं स्वरूपमाहितं॥ ज्ञानं बंधइतीदं तु ह्रितीयंस्व
त्रमीशिवसूरिति। ततः सर्वादिमितरूपमात्मै [illegible] नमात्मनः स्वात्मैव देवताप्रोक्ता ललिता वि
श्वविग्रहेति वंगराजोक्ता पाशा [illegible] मि त्वदे [illegible] भवं विभुत्वमनंतशक्तिसंयुतं तव रूपं प्रभवं परस्याः
सेतिवर्णितो नीयं [illegible] देवकार्यसमुद्यते [illegible] रूपस्य कार्यमुक्तं तत्प्रपंचयति॥ मंडनामकोऽ राम०
सुरलघुत्यादिके [illegible] तत्र [illegible] सिद्धांतरत्ने उक्तं तत्रैव ब्रह्मांडपुराणे। मन्मथदा ३९

हं त्रक्रमं। अथ तद्रस्य संवीक्ष्य विक्रकर्मा गतो ऽभूत्। तद्रस्य नातपुरुषं चित्राकारं चकार सद्यस्मार
म्यैत दृष्ट्वा उद्गरितं धाता भंडि तिभंडिति। यद्वा वाचतं तो नाम्नां भंडो लोकेषु कथ्यत इत्यंतेन तस्यास्त्वरत्न
मपितत्रैवोक्तं। रुद्रकोपानलाज्जातो यस्माद्भंडो महाबलः। तस्माद्भंडस्वभावश्च दानवश्चाभवत्ततः इति।
तस्य दैत्यस्य वधे हननेन उद्युक्ता नाशकीनां श्रीदेवतानां सेनाभिः सैन्यैः सम्यक् कृत्वा हननिर्माणेन नाविता
युक्ता॥ सम्यग्भेदेना विनिता वा॥ तथा च गौडपादीयसूत्रे॥ भंडासुरहननार्थमेकैवानेका इति॥॥
यद्वा भंडो निर्लज्जः। स च सकलजीवभावापन्नो देहीति दाक्षः॥ सच्चित्सुखात्मापि जडो ऽहं दुःखा
दिभिः क्लिष्टो ऽस्मि भंडिमाय मिति॥ तस्यास्तु स्वप्रकाशानन्दात्मा देनेतत्सर्वं स्वतन्त्रतो यस्मिन् भंडिमेति याव
त॥ ज्ञानं बंध इति सूत्रोक्तो बंध इति भावः। अस्याकारस्य शाश्वतोपाध्यामात्ममात्मतत्त्वज्ञानाभावो ना
त्मन्यात्मतत्त्वज्ञानं च आणवमलपदवाच्यं तेन प्रसिद्धो बंध इत्यर्थः॥ तस्य वधोपस्मात्तद्युक्तमुद्योग
उद्यम इति यावत्॥ तस्याः शक्तिरूपः सामर्थ्यनितास सेनयास्मृ हेन समन्विते ति रहस्यार्थः॥ तथा च
शिवसूत्राणि॥ उद्यमो भैरवः। शक्तिचक्रानुसंधाने विश्वसंहारः॥ शक्तिसंधाने शरीरोत्पत्तिः॥ भूतसंधा
नभूतपृथक्त्वविश्वसंघट्टाः इत्यादीनि॥ तद्वार्तिकानि यथा॥ योयं विमर्शरूपायाः प्रसरंत्याः स्वसंवि
दः॥ स्फुटित्सुच्छलनाकारप्रतिमोन्मज्जनात्मकः॥ उद्यमोतः परिस्पंदः स्फुराहंभावनात्मकः॥ स एव स

४० विशालीनां समरसास्वादोपमः ॥ दिग्व्रजो भरितत्वेनेति कल्पानां विभेदिनां ॥ अलं कवलनेनापि स्वप्नवर्षा
देवभैरवः ॥ ...यसुक्ष्मसंस्थितेन्दुयोगो भैरवात्मकः ॥ अस्यास्ति महती शक्तिः पातित्वात्क्रमाक्रमा
॥ निःशेषविनिर्जयाच्छक्तिर्नाक्रमणालयः ॥ क्रमाक्रमक्रमप्राकारशेषेनैतदूर्ध्वलीयते ॥
तथैव स्वात्मविश्रान्तो भैरवो ह्यात्मादिनः ॥ परमात्मावि...र्पतसंदर्शया ॥ सृष्टिच्छिन्नि लया
नां स्वाभासाधाक्रिप्रसरणात् ॥ ...वपुर्विमर्शवचसत्वच्छतां प्रपंचितं ॥ तया प्रसारितस्यास्य शक्तिच
क्रस्य पञ्चसुम ॥ संधानमत्र ...मकम्मरि...णः ॥ तस्मिन्समरसस्यविश्वस्य कालग्रासादिक
लाविधेः ॥ संहारस्यात्मसंवित्तिवह्निसद्भावलक्षणः ॥ इच्छाशक्तिरूपमेतादृक्सद्बोधाशक्तिरस्य
या ॥ संधाने योगिनस्तस्या जन्मयेभावेन सः ॥ तद्वशात्तदिच्छार्हशरीरसन्निरिष्यते ॥ भूतानां दे
हधीप्राणशून्यानां ग्राहकात्मनां ॥ आत्मत्वाभिमानात्संधानं परिपोषतां ॥ एषत्क्रमप्रविश्ले
षोव्याध्यादिक्लेशबंधनाते ॥ विश्वसारे शक्तालादिविभ्रक्रूपस्य पसुनः ॥ संघट्टमुद्राद्यक्रमसरू
पसदीकरणादिकं ॥ एतत्सर्वमवेद्यक्रिलत्वानेसातियोगिनाइत्यादि ॥ पुंसशक्तिर्बाल्ये तिरोहिता
पि यौवने ॥ यथाससमुल्लसति तथाविविधा शक्तिसमूहाजीवे विद्यमाना अपज्ञानवशान्तिरोहितापुन
उद्योगे सति तु सर्वाश्रिपिताः समुल्लसन्तीति तु समुदायार्थः ॥ ७५ ॥ संपत्करी समारूढ सिंधुरव ४०

नसेविता॥ अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृता॥ ७६॥ अस्ति संपत्करीनामकाचिद्देव
ता॥ या तावत्स्वतंत्रे संपत्करीतिकाप्याख्या त्रिविधा सा ऽचिंत्यवैभवेतारम्पे वंत्रिवर्णा सा विद्या
विधानं चाथ कथ्यते इयं तेन चरीति॥ साहि त्रिपुरसुंदर्या गजे बुद्धिकृते नित्यक्लिन्नाया व्याख्याने प्र
सिद्धा॥ ललितापरमेश्वर्या अंकुशास्त्रात्समुद्भूता संपत्करीनाम्नी देवी सा रभसा कोलाहलं ना
म साहरोहमतंगजप्रमुखादिकेसुक्यानाम नगायमुः कोटिसंख्याकाः कुंजरास्तन्मादयंतेन
या सम्यग्गजशास्त्रकथितोपायैरारूढानामारोहणादिना नियमितानां सिंधुराणां भद्र
मंदमृगादिभेदभिन्नगजानां गजेन्द्रहास्तिकेन सेविता॥ अथवा तु त्वसंपन्मयी चित्रहस्ति
संपत्करी समुत्पन्ने॥ तस्यां समाहृदैर्विषयीभूतैः सिंधुरव्रजैः शब्दादिविषयसमूहैः सेविता॥
तध्यायकादिमते॥ ॥ इति प्रार्थनिगजानां पूर्वेन त्रामेव समर्चयेदिति॥ एकस्मिन्नज्ञानेवि
पयीभूतायास्त्रिपुटयाविविच्यतेवं षड्ज्ञानरूपा चित्रहस्तिः सुखसंपत्करी॥ तदुक्तं प्रत्यभि
ज्ञायां॥ ग्राह्यग्राहकसंवित्तिः सामान्या सर्वदेहिनां॥ योगिनां तु विशेषोयं संबंधे सावधान
तेति॥ तदिदं लोकानंदः समाधिसुखमिति शिवसूत्रव्याख्यायां स्पष्टं॥ मात्रास्वप्रत्ययानु
संधाने नष्टस्य पुनरुत्थानमिति सूत्रेऽवरदराजेनोक्तं॥ मात्राः पदार्थरूपा ग्रासेषे मिथ्यकृ

४१ यादिभिः [illegible]के [illegible] नामतात्व [illegible]थर्वे [illegible]मंत्रसमलंतदहमित्यनुसंहितिः॥
अनुमिनस [illegible] सहस्रा [illegible]गि [illegible]त्यानं भूमनेन्मज्जनं भवेत॥ए
कस्य सं [illegible] समीगांड्ठ्[illegible] तिष्ठि [illegible] स्त्वाच्छेका विद्धेवतातंत्रे प्रसिद्ध
॥ यस्मात्स्वयो [illegible] ग्रा [illegible] सामात् [illegible] नालङ्केनब्रह्मांडपुराणे। अथश्री
ललिता [illegible] पाशायुध [illegible] कांतिरश्वारूढा। चलस्तुरङ्गमारूपा
परा [illegible] नामा [illegible] पंश्च [illegible] नावाजिनस्तां समनपुरिसंतं अ
न्तः [illegible] सिद्धांते नामानि [illegible]॥ [illegible] सा अश्वारूढेति गीयत इति॥
तथाऽ [illegible] नां स्वाय [illegible] नाम [illegible] कोटिगुणितकोटिभिर्जेलाधिसंख्याभिर्ब
हीभि [illegible]॥ यद्वाइंद्रियाण्य [illegible] तत्र [illegible] मनो [illegible] कादिमनेव चनाद
[illegible] [illegible] पदेनोद्रिया [illegible] कथ्यते॥ तदारूढमनः॥ मनम इंद्रियद्वारे वृत्तिनिर्गमात् [illegible]
केन मनसा संख्याता नीद्रियाण [illegible] निष्ठनक्षत्रस्थः॥ अश्वारूढेति त्रिवक्त्र
वचनातेन [illegible] पदं [illegible] द्रिया [illegible] त्रीस्वर्थः॥ आत्माख्य देवतारूपो
योगी [illegible] त्रिणा सर्वशरीराभिमानीभवतीति भावः॥ तथा एम
च [illegible] वहूत्रा [illegible]॥ विस्मयो [illegible] का॥ इच्छाशक्तिरुमाकुमारी॥ इयं [illegible] ४१

पचतो देवानां महिमानमित्यनेन सोको स्मादि अयं ब्राह्मणो विद्वानित्यनेन ब्रह्मज्ञान
वांस्तु एतौ कर्मोपासने ... सूर्याचंद्रमसो महिमानौ सातिशय ... वादि ... एवं तौ बुद्ध्वा
ऽभिजय समितिः परा करोति तस्मादधिकं निरतिशयं ब्रह्मणो महिमानमाप्नोतीत्यर्थः
तदिदमुपदिष्टं हितं ॥ ... ओं मनु ... अनीकेनमात्स्व ... पेहं विधं ॥ कर्मणो
विभजन्मातः केवलपदमप्युक्तमिति ॥ निहस्य भोमूर्तिभ्यः पुराणनतात्रिपुरा । तदुक्तं ॥
मूर्तित्रयस्यापि ... त्वं ... काय त्रिपुरेति नामेति ॥ गौडपादीयसूत्रमपि ॥ त
त्त्वत्रयेणाभिरे ... एकमेवब्रह्म तत्त्वत्रयेणाभिधीयते इत्यर्थः ॥ तद्भाष्ये तु ॥ तत्त्वपदं गुण
मूर्तिलीजजगेली ठं ... त्वेन बहुधाभासात्मि ... गुणादिभ्यः पुरेत्यर्थः ॥ का
पुरं ... ॥ त्रिकोणमंडलं चास्याभूम्यादिप्रस्तुतं सर्वतंत्रं यत्रं पर्य स्मात्तस्मात्तु त्रिपुराम
ते ... मर्थ पटले ... त्रिपुरापरमा शक्तिरिमाख्या त्रिपुरा ख्याति मायातेन
तेन ग्रंथेना ... त्रीमनिर्वचनामुक्तानामानि तु नही कायामे वास्माभि र्व्यस्य
तइति तत्रैव ... या नित्रिभिर्जगद्भिर्विधात्रयो जगद्धेयास्मात् ॥ ऐवर्णिककन्मात्त

१२४ पत्वात्त्रिमूर्तितत्वं॥ त्रिमूर्तिस्तु त्रिवर्षा स्यादिति कन्या प्रकरणे बोधवचनात्॥ यद्वा॥ ब्रह्मा॥
दिमूर्तित्रयं वन्दे मां दि त्र्यम्बि छाद्दिमूर्तित्रयं चास्या एव रूपमिति त्रिमूर्तितं॥ तदुक्तं वाराह
पुराणे॥ एवमुक्त्वा स्वयं ब्रह्मा वीक्ष्यांचक्रे पिनाकिनं॥ नारायणं च मनसा सस्मार परमेश्वरः॥
ततो नारायणो देवो ध्यात्वा तन्मध्ये ऽवस्थितः॥ एकीभूय तु तत्तेजो ब्रह्मविष्णुमहेश्वराः॥ पर
स्परं तु ज्ञ दृष्ट्वा वीक्ष्यां चक्रुर्मुदान्विताः॥ ततस्तेषां त्रिधा दृष्टिर्भूतावेसमजायत॥ तस्यां
दृष्टौ समुत्पन्ना कुमारी दिव्यरूपिणी॥ सा दिना तां वर्णायित्वा त्र्यधीं तां वीक्ष्य कमं तु ब्रह्म
विष्णुमहेश्वराः॥ ऊचुः कासि महि ब्रूहि किं वा कार्यं शुचिस्मिते इति प्रश्ने त्रिवर्णा च कु
मारी सा कृष्णा शुक्ला च पीतिका॥ उवाच भगवद्दृष्टेर्मेन जाता ऽस्मि सत्तमाः॥ किं मां न वेत्य
हु श्रोणां स्वशक्तिं परमेश्वरीमित्युन्नेरिते॥ ततो ब्रह्मादयस्तस्यै त्रयस्तुष्टा वरं ददुः॥ नाम्ना
सि त्रिकल्या देवी पाहि विश्वं च सर्वदा॥ अपराणि च नामानि भविष्यंति तवानघे॥ गुणो
त्थानि महाभागे सर्वसिद्धिकराणि ते सोऽप्युक्ते॥ अन्यच्चकारणं देवि पद्य स्माभिः प्रप
श्यत॥ सितरक्तकृष्णवर्णा त्रिवर्णासि वरानने॥ मूर्तित्रयं पंचभिर्वर्णा [illegible] कुरु देवि स्वावि
ग्रहे॥ एवमुक्ता तदा देवी चकार त्रिविधां तनुं॥ सितां रक्तां तथा कृष्णां त्रिमूर्तित्वं जगाम हे राम०
नाघु स्त्रीऽ ब्राह्मी वैष्णवी रौद्री तां श्वेतमंदरनीलपर्वतेषु तपश्चर्यादिकमुक्तं॥ अन्यात्रापि १२४

एषा त्रिमूर्तिरुद्दिष्टा नपसि ध्वांतगामिनी॥ एषा स्तुता पराशक्तिः सात्त्विकी ब्रह्मसंस्थितिः॥
एषैव रक्ता रजासि वैष्णवी परिकीर्तिता॥ एषैव कृष्णा तमसि रौद्री देवी प्रकीर्तिता॥ परमात्मा
यथा देव एक एव त्रिधा स्थितः॥ प्रयोजनवशाच्छक्तिरेकैव त्रिविधा भवेदिति॥ गौडपादीयं
सूत्रमपि॥ शांभवी विद्या श्यामा इति॥ देवीभागवतेपि॥ शांभवी सु कृष्णरूपा च श्रीविद्या रक्तरू
पिका॥ श्यामला शुभ्ररूपा सा इत्येता गुणशक्तय इति॥ त्रिदशानां देवानां जित्वरीणां वाद
शानामवस्थानां त्रिपुर्कदशानां त्रयोदशानां विष्णुपां देवानां वा त्रिगुणात्तदशानां त्रिपुरां
लंकृणयात्र यस्त्रिंशकृशानां वेश्वरी स्वामिनी॥ १७६॥ अर्कहरी दिमगं धाटयासिं हुरजिल
कांचिता॥ उमा शैलेंद्रतनया गौरी गंधर्वसेविता॥ १७७॥ अपाणाम हृएणां वा कामश
क्तिबीजात्मकानां समाहारः॥ उक्तं च वामकेश्वरतंत्रे॥ वागीश्वरी ज्ञानशक्तिर्वाग्भवे मो
क्षरूपिणी॥ कामराजे क्रियाशक्तिः कामेशी कामरूपिणी॥ शक्तिबीजे पराशक्तिरिच्छैव शि
वरूपिणी॥ एवं देवी त्र्यक्षरी तु महात्रिपुरसुंदरीति॥ शुद्धविद्या कुमारी मंत्ररूपा वा॥ तथा
च गौडपादीये॥ अक्षरी शुद्धविद्या कुमारी चेति॥ हृदयरूपा मन्त्ररूपा वा॥ तदेतदक्ष
रं हृदयमिति तदेतदक्षरं सत्यमिति बृहदारण्यकात्॥ आर्ई पद्ध विनयुगाहरमा सा दे

१२५ रनि शाकृत्स्य [illegible] हारोवा ॥ अथ परिभाषायां पंचत्रिंशन्नामानि विभज्यन्ते ॥ मंदिर चर तो
वि भव भूदेवे [illegible] गौमोक्षानहितेषु [illegible] ॥ गौः शिलायां कोलाद्री भावार्थे विभेरामवेदे
व ॥ संख्यः ॥ २६ ॥ दिवि भवा दिव्या दैवोदय ष्ठोतनाचेतनात्मकपदार्थसमूहाः ॥ ते
षां गृहैः संबंधैः [illegible] ॥ परिहर्षाः ॥ [illegible] जाः दिव्य भोमैः पदार्थैः परिहृते ति पावन ॥
दि [illegible] योह रिचं दिव [illegible] परि [illegible] लोवा ते [illegible] ठया ॥ अथवा ॥ श्रोत्राकाशयोः संबंधे संय
मा [illegible] इस म ति योगसूत्रे श्रवणो [illegible] काशयोः संबंधे कृते संयमस्य योगिनो दिव्यं
श्रो [illegible] भवति तेन दिव्यश [illegible] श्रवणो [illegible] तीयुक्ते ॥ तुल्यम्याये [illegible] वेङ्कि पाणामुपल
क्ष [illegible] नेमा [illegible] गधा [illegible] ठया [illegible] पत्रा म पाप [illegible] ॥ सिंहरस्य रक्तचूर्णस्य
गो [illegible] नाया वा तिलके न चित्रके [illegible] ॥ तिलकालक पत्रे वा तिलकशब्दः ॥ तस्य
हे सिंदूरतिलकस्याधाम ति विग्रहः ॥ [illegible] सिंदूरं लोचना [illegible] चूर्णो धातु [illegible] तिरहस्यः ॥ तिल
के [illegible] तिलकालके इति विश्वः ॥ नागे [illegible] परिहृते ति वा ॥ सिंदूर तिलको ना
गे सिंदूर तिलकाह्वयामिति विश्वः ॥ सिंदूरतिलको हस्ती सिंदूरतिलकां गने ति हेमचंद्रः ॥ गज राम०
गामिनी [illegible] तिते मिल ॥ उकारः शिववाचकस्तस्य माल स्त्रीः ते परा शिवमाति परि [illegible] का १२५

125

ष्ठितेती तिवा॥ अतसीकुसुमसुमसंकाशत्वादभेदोपचाराद्रुमा वा॥ हरिद्रावर्णा वन्ता इत्ये
वं वा॥ कीर्तिकांतिस्वरूपत्वाद्वा॥ यदेवी सर्वभूतेषु कांतिरूपेतो स्थादिवचनात्॥ उमा तसी हे
मवती हरिद्रा कीर्तिकांतिस्त्विति विष्णुः॥ उ इत्यामंत्रणे॥ मेति निषेधे॥ बाल्ये तपस्यंती भ
गवती मात्रा मेनया निषिद्धेत्युमा वा॥ तदुक्तं कालिकापुराणे॥ यतो जननी रमा तपसे वनं गं
तुं मेनया॥ उमेति तेन सा मेति नाम प्राप तदा सतीति॥ ब्रह्मपुराणेपि॥ अपर्णा तु नि
राहारा तां माता प्रत्यभाषत॥ उ मा इति निषेधंती उमेत्येव तदा ऽभवत्॥ सा तथोक्ता त
या मात्रा देवी दुश्चरचारिणी॥ तेनैव नाम्ना लोकेषु विख्याता सुरपूजितेति॥ पद्मपुराणे
पि पुष्करखंडे॥ ततोंतरिक्षाद्दिव्या वागब्रवीद्भुवनत्रये॥ उमेति तव या मेने यदुक्तं तनया
प्रति॥ उमेति नाम ते नाम्ना भुवनेषु भविष्यतीति॥ उः उत्तमा च सा सा चित्रहृत्रिश्रुतिवा
तदुक्तं सूतसंहितायां॥ परानुभूतिर्भवपाशनाशनी सदाशिवस्याप्यतिशोभनाटयां॥
उमाभिधामुत्तमचित्तहृत्तिं नमामि नानाविधलोकवैभवामिति॥ अथवा॥ प्रणव खंड
केरकारोकारमकारैर्विष्णुशिवब्रह्मवाचकैर्घटितत्वात्त्रिमूर्त्यात्मिकेत्यादयः प्रणवाख्यो
हयोज्यो॥ अत एवास्य पदस्य देवी प्रणवइति संज्ञेति रहस्यविदः॥ उक्तं च लैंगे॥ भगव

१२६ तीप्रतिपरशिवेनैव ॥ अकारोकारमकारा मदीये प्रणवे स्थिताः ॥ उकारं च मकारं च त्वका
रं चक्रमेरितं ॥ त्वदीयं प्रणवं विद्धि त्रिमात्रं प्लुतमुत्तममिति ॥ यद्वा इच्छाशक्तिरुमाकुमा
री ति शिवसूत्रे योगिनामिच्छा या उमेति संज्ञोक्ता ॥ तद्रूपा वा ॥ उक्तं च भगवता क्षेमराजेन
परभैरवनाम्नो ऽस्य समानस्य शाश्वतीम् ॥ तस्यैव योगिनो येच्छाशक्तिः सा निगद्यते
मामिति ॥ इयं च विनायकपीठाधिष्ठात्री ॥ उमा देवी विनायके इति पाद्मात् ॥ उमा सिं
धुवने नाम्नेमपि पाद्म एव समर्थते ॥ षाड्वार्षिक कन्यारूपा वा ॥ उमा षाड्वर्षिकी मतेति कु
मारकरणाक्षौम्यवचनात् ॥ शैलेंद्रस्य पर्वतराजस्य हिमवतस्तनया पुत्री ॥ जाता शैले
न्द्रगेहे सा शैलराजसुता ततः इति देवीपुराणोक्तनिर्वचनं च गौरवर्णा वर्णा वा गौरी ॥ षिद्गौरा
दिभ्यश्चेति ङीष् ॥ वरुणस्य स्त्रिया गौरीति पाद्मे नदीभेदे पि गौरी स्याद् दृष्टैवा पार्वत्या पि बिती
ति कोशाच्च ॥ नेनग्नत्वस्वरूपेति वा ॥ देवीपुराणे हि ॥ योगाग्निना तया दग्ध्वा पुनर्जाता हिमा
लयात् ॥ शरत्कुन्देन्दुवर्णाभा विस्मितो गौरीति सा स्मृतेत्युक्तं ॥ इयं च कान्यकुब्जपीठाधिष्ठा
त्री ॥ कान्यकुब्जे तथा गौरीति पाद्मात् ॥ गंधर्वैर्विद्याधरप्रभृतिभिः सेविता ॥ गंधर्वैरप्सरोभिर्वा राम॰
सेविता ॥ श्वहाहासादीवी वा ॥ दिव्यगानमेव वा गंधर्वः ॥ ११७१ ॥ विश्वगर्भा स्वर्णगर्भा १२६

126

वरदावागधीश्वरी। ध्यानगम्यापरिछेद्याज्ञानदाज्ञानविग्रहा॥ १७८ विश्वंप्रपंचजा-
तं गर्भे यस्याः॥ स्वर्णगर्भा वरदा वागधीश्वरी॥ ध्यानगम्यापरिछेद्या ज्ञानदा ज्ञान-
दा ज्ञानविग्रहा॥ १७८ विश्वप्रपंचजातं गर्भे यस्याः॥ स्वर्णं हिरण्यं गर्भे यस्याः स्वर्ण-
स्य गर्भो वा वा॥ तदुक्तं वायुपुराणे॥ हिरण्यमस्य गर्भोऽभूद्धिरण्यस्यापि गर्भजा यस्माद्धि-
रण्यगर्भः स पुराणेष्विति निरुच्यत इति॥ यद्वा स्वर्णानां वर्णानां मातृकाणां गर्भः शोभ-
नो यस्याः सा॥ मातृका अतियाक्षुतियादवः॥ बन्धे गर्भे तः शब्द इति प्रयोगात्॥ स्वर्णाः
शोभनार्णा मंत्रा गर्भे यस्या इति वा॥ अवरदेति चतुरक्षरं नाम॥ अवरान्कार्यानस्तु-
रान्दधाति खंडयतीति वा॥ अवंतीत्यवाः कांतिमंतो रदा दंता यस्या वा॥ कामर्थकादव-
तेः पचाद्यच्॥ वाचामधीश्वरी स्वामिनी॥ ध्यानेन नवभावनेन गम्या ज्ञेया॥ अभावप्रतियो-
गित्वं परिछेद्यत्वं॥ तदभावादपरिछेद्या॥ देशतः परिछेदो व्याप्त्या तत्ताभाव एव॥ कालतस्तु
ध्वंसप्रागभावो॥ वस्तुतस्त्वन्योन्याभाव इति स्थितिः॥ ज्ञानं कैवल्यप्रदं तेनाभिमतं ददातीति
ज्ञानदा॥ तथा चोक्तं॥ तलवकारोपनिषदि॥ तस्मिन्नाकाशे स्त्रियमाजगाम बहुशोभमाना-
मुमां हैमवतीं तां होवाच किमेतद्यक्षमिति ब्रह्मेति होवाचेत्यादि॥ स्कांदेपि॥ ईदृशीप

१२७ रमाविद्याशांकरी भवनाशिनी ॥ प्रमादादेवजंतूनां शंके रेव हि जायत इति ॥ सूतसंहिताया
म पि । विद्यारूपा या शिवा वेदवेद्या समानंदानंतसंवित्स्वरूपा ॥ तस्या वाचः सर्वलोकैक
मातुर्भक्त्यैव स्यादहं विकायाः प्रसादादिति ॥ ज्ञानं ददाति खंडयतीति वा ॥ ज्ञानं बंध इति
तु शिवसूत्रे प्रथमोन्मेषे सूत्रमेकं ॥ तत्र लकारस्य प्रश्लेषोप्यस्तीत्युक्तं ॥ चैतन्यमात्मे
127 ति पूर्वसूत्रे शांकरसंहितापाठे तथा समावात ॥ द्वितीयोन्मेषे पि तादृशमेव सूत्रमपरं तत्र
तु तत्र श्लेषः संभाव्यते ॥ आत्मा चित्तमिति पूर्वसूत्रात् ॥ तद्व्याख्याते वार्तिके ॥ अंतः
स्ववोहि संवेद्य अवसायादि हन्निमतं ॥ बहिःस्त्वाग्रपनीलादि देहादि विषयोन्मुखं ॥ भेदा
भासात्मकं चापि ज्ञानं बंधोनुरूपिणः ॥ तस्माच्छिवत्वादेवासौ वराकः संसरति ध्रुवमिति ।
तदिदं संसारितापादकं ज्ञानं नाशयतीत्यर्थः ॥ अत एव द्वितीयोन्मेषसूत्रांतरं ॥ ज्ञान
मन्नमिति ॥ वार्तिकं च ॥ ज्ञानं बंध इति प्रोक्तं यत्प्राक्तस्य योगिनः ॥ अनात्मन्यात्मताज्ञा
नमेव परं व्रज ज्ञानं बंधाय चेष्यते ॥ ज्ञानात्मकमिदं विश्वं न ज्ञानाद्विद्यते परं ॥ विद्या राम०
विद्येति मैत्रेय ज्ञानमेवोपधारयेति ॥ ज्ञानस्य विग्रहो विस्तारो यस्याः सकाशादिति वा ॥ १२७
१२८ ॥ सर्ववेदांतसंवेद्या ॥ सममानंदस्वस्वरूपमस्याः ॥ अत्र सत्येति मैत्रेय पदमाश्रि मा

मेयात्मेत्येकंपदंकर्त्तृयाक्यं॥ सचसच्चाभवदितिश्रुतेः सत्याआमान्नादित्रिरूपावा॥ सदितिआता
त्मासत्त्वंयमित्यसत्त्वादिसदितिश्रुतेः॥ सन्निधत्तिविकर्षेणात्रइत्यत्रतेषुव्यारात्मेलनेनपृच्छ
स्येवतिज्ञेयं॥ इदंचइत्यादिषष्ठ्यंतइतिच्छेदः स्त्रेआत्मानावसरेछंदोभास्करेप्रपंचितम
स्माभिः। सत्त्वसाधुरीतिवासमा॥ सत्तमामामात्स्वरूपेतिवा॥ आनंदस्वरूपमस्याः इत्यानंदस्व
रूपिणी॥ अतएवोत्तरमीमांसायामानंदादयः प्रधानस्येतितार्तीयिकाधिकरणेआनंदादि
धर्मीणांस्वरूपत्वादेवविद्यांतरेषुपसंहारः साधितः॥ लोपामुद्रयागस्त्यपत्न्याकआर्चितोपा
सिता॥ नडंकेब्रह्मांडपुराणे॥ पत्न्यस्यलोपामुद्राख्यामामुपास्तेतिभक्तितइति॥ त्रिपुरसिद्धां
तेपि॥ अगस्त्यपत्नीलोपाख्यमुद्रायाः परमेश्वरी॥ प्रसन्नत्वादियंदेवीलोपामुद्रेतिगीयत
इति॥ त्रिपुरसिद्धांतेपि॥ अगस्त्यपत्नीलोपाख्यमुद्रायाः परमेश्वरी॥ प्रसन्नत्वादियंदेवीलो
पामुद्रेतिगीयतइति॥ अतएवलोपामुद्राचासावर्चिताचेत्यपरस्तुवंचं॥ लोपामुद्राख्यविद्य
याकरणेनवाप्रजिताविद्यात्तनीयखंडेनकुर्यात्सर्वोपचारकानितिकादिमत॥ लीलामात्र

१२८

त्रेणानायोसेनक्षणानिब्रह्मांडानांमंडलानियस्याः॥ तदुक्तमस्माभिर्देवीस्तवे॥ विधिविष्णुमुखामरोदयस्थितिनाशे
बुद्धिवोप्यनीश्वरः॥ जगदंबतवत्वयंक्रमः कृपामुद्दालकपुष्पभंडिकेति॥ उद्दालकेत्यादिनयाकुरंजीडाविशेषस्य
नम॥ शक्तिस्तत्रमपिस्वेच्छयास्वमित्रौविश्वमुन्मीलयतीति॥ १७९॥॥ अदृश्यादृश्यरहिताविज्ञात्रीवेद्यवर्जिता॥
योगिनीयोगदायोग्यायोगानंदायुगंधरा॥॥ १८०॥ दृश्यविलक्षणात्वादृश्या॥ चक्षुरादीन्द्रियायोग्यावा॥ नदृष्ट
र्द्रष्टारं पश्येदितिश्रुतेः॥ उक्तंचदेवीभागवतेस्तुतायसंवादे॥ निर्गुणास्यसुनेरूपंनभवेदृष्टिगोचरमितित्रकम्यानि
र्गुणादुर्गमाशक्तिर्निर्गुणश्चपरः पुमानितिमतं॥ दृश्यस्यव्यावहारिकस्यपारमार्थिकाभाववत्वादृश्यरहितानि
र्विषयापूर्यासंविद्वा विशेषेणजानातीतिविज्ञात्री॥ विज्ञातारमरेकेनविजानीयादितिश्रुतेः॥ वेद्यस्यपदार्थान्त
राणांनवश्लेषेणसर्वज्ञत्वाद्वेद्यवर्जिता॥ वेद्यस्यपारमार्थिकाभाववतीवा॥ योगएकत्वभावना॥ तद्वत्वात्तत्सद
त्वान्नयोग्यत्वायोगिनीयोगदयोचा॥ तदुक्तं॥ ज्ञानेंद्रियाणांयोगंसंविज्ञतमितिमिताद्य॥ योगश्चित्तवृत्तिनिरोधइतिपातंजल
सूत्रंच॥ यद्वामंगलादिसकंठांताअष्टौयोगिनः षाड्ंशाङ्गिर्वर्षैः पुनःपुनः परिवर्तमानाज्योतिःशास्त्रेडाकिन्या
दयस्तस्त्रमंत्रशास्त्रप्रसिद्धास्तद्रूपा॥ अथवायोगोविषयसंयोगोभोगइतियावत्॥ तेनभोक्तभोगयत्वंदृश्यो
गप्रदभोग्यप्रितिनपरूपेतिनामत्रयार्थः॥ तदुक्तं श्वेताश्वतरोपनिषदि॥ भोक्ताभोग्यंप्रेरितारंचमत्वासर्वंप्रोक्तं राम०
त्रिविधंब्रह्मैतदिति॥ अत्रैवदेवीम्ना॥ मायामधानुस्यंतत्रमितिसांख्यः॥ शिवस्यप्राणाक्तिरेवेतिवेदांतिनः॥ १२८
॥ प्राकृतिरिमिनेनपरंतत्रतोऽमहालि [illegible] वरणाचार्यैः॥ सात्विगुणागुणाश्चयस्याभिभावका॥ रजस्तमश्चो

मिमूपसत्वं भवतिमात्ररजः संतत्तमश्चैवतमः सत्वं रजस्तथेतिगीतोक्तेः तेनसात्रिविधापर्यवस्यति॥ रजस्तम
सो रहितातिभवाद्विमुखप्रसन्नात्मिकैका॥ ईषद्रजस्तमोयोगेनमलिनसत्वाद्वितीया॥ अत्यंताभिभूत
रजःसत्वाभ्यामसत्त्वमायाकेवलतमोमयीतृतीयेति॥ तासुआद्यावच्छिन्नाचिदीश्वरनाम्नीभोगप्रदायोगदेत्यु
च्यते॥ द्वितीयावच्छिन्नाजीवनाम्नीभोक्त्रीयोगिनी॥ तृतीयावच्छिन्नाजडवस्तुजातनाम्नीभोग्यायोग्येत्युच्यते
इति। विवेकः॥ योगः शिवशक्तिसामरस्यमेवानंदोयस्याः॥ योगानंदाख्योनृसिंहस्तद्रूपावा॥ मोहिनी
मुख्यैस्तैकपदंस्त्रीकृतमेदं अयोगानंदीतिनामस्वरूपमुक्तं च॥ योगः संगोनविद्यतेयस्याः असंगोनहि सज्ज
त इति॥ श्रुतेः॥ अथवा पर्वतरूपावा॥ अपेद्येतितात्पर्यार्थः॥ अयेनस्वभावेनहाविधिनाउंपरशिवंगच्छती
ति वा॥ नंदाअलकनंदात्मकगंगारूपा॥ प्रतिपत्षष्ठ्येकादशीरूपावा। नंदाभगवतीनामयामविष्यति
ष्य ति नंदजेतिमार्कंडेयपुराणोक्तमूर्तिविशेषरूपावा॥ सरस्वत्याएव स्थानविशेषयोगान्नंदेति संज्ञावा
नंदाहिमवतः पृष्ठे इति पाद्मात्॥ पुष्करप्रांतस्थनदीविशेषरूपावा॥ तदुक्तं पाद्मे एवपुष्करमाहा
त्म्ये पुरापपुराजनोपेतानरीयंब्रह्मणाः स्तुता॥ नंदानामातिविपुलाप्रहृष्टाद्रक्षिणामुखी॥ अगच्छ
न्नेपिपस्तस्यानामगृह्णातिमानवः॥ सजीवन् सुखमाप्नोतिमृतोभवतिखेचर इति॥ नामनिरुक्तिस्तुवा
राहपुराणे॥ यस्मात्गतेजगत्सुदेवीस्थाप्यहिमगिरौ॥ संस्थाप्यंनंदितापस्मात्तस्मान्नंदांतुमाभवदिति॥ देवी
पुराणेतु॥ नंदतेसुरलोकेषुनंदनेवसनेऽथवा॥ हिमाचलेमहापुण्येनंदादेवीततःस्मृतेति॥ तत्स्वरूपमपिवा
राहे॥ गायत्र्यष्टसुत्नायात्तेचैत्राहरमयोधयत॥ सेवनंदाभवेद्देवीदेवकार्यचिकीर्षया॥ स्वायंभुवेहतोदैत्यो
वेत्रवामंदरेगिरौ। महिषाख्योसुरः पश्चात्तस्वैचैत्राहरोमयत॥ नंदयानिहतोविंध्येमहाबलपराक्रमः॥

ज्ञाना[illegible]न्ति[illegible]स्मादेवं महेश्वरो [illegible]नमूर्तिमान॥ अज्ञानं ज्ञाननाशं तु भवत्येव न संशय इति॥ सुगं ह
त्वा चतुर्थके पि [illegible] किमस्मादेवं महे[illegible] ज्ञानमूर्तिमान॥ अज्ञानं ज्ञाननाशं तु भवमेव न
संशय इति॥ सुगंह[illegible]त्व चतुर्थके [illegible]ज्ञानी रोगयोर्युगः॥ सुगं कृता दौ युगले वृद्धिनामौ षधे पि चे
ति विष्व[illegible] का[illegible] ह्रो[illegible]न्मारध्य [illegible] सम्प्रति[illegible] स्थूत्पषमारांशध्यसौ[illegible] निर्वाहक त्वदर्शनादिहस
कलजन[illegible]विश[illegible]॥ त्रयौ सुगंधे[illegible] व्यते॥ प्रि[illegible]शक्तियुगलस्य कृता देवी धारणा द्युगेव
[illegible]। २८॥ इ[illegible]सा[illegible] न शक्ति ज्ञानशक्ति क्रियाशक्तिस्वरूपिणी॥ सर्वाधारा स्वतन्त्रा तिष्ठास
[illegible]पकारिणी॥ २८॥ इ[illegible]ज्ञानि पलगुणा[illegible]त्रय स्वरूपमस्याः॥ उक्तं च संकेतपद्यतो
॥ इच्छा पुरः [illegible]प्रदेशा[illegible] ज्ञान[illegible]॥ क्रियापद[illegible]तः [illegible]स्या एवं शक्तित्रयं वपुरिति॥ वा
मकेश्वरतंत्रे पि॥ त्रिपुरा[illegible]रूपिणी॥ ज्ञानशक्तिः क्रियाशक्तिरिच्छा
शक्त्यात्मिका प्रियोइति॥ अत्र ज्ञाने च्छा यलानां[illegible]पूर्वस्योत्तरोत्तरं प्रति कारणत्वस्य क्रमस्य
[illegible]शक्तित्रयस्य निर्देशाभावे पि केरोत्ते पलेशक्तत्वा देवक्रियाशब्दोपलपरः॥ उक्तं च लैंगे॥ प्र
ति[illegible]दिष्टा ज्ञानशक्तिः कृतिर्मता॥ इच्छारूपा तथा ज्ञाना देवि विद्धि च न संशय इति॥ चलनात्म
[illegible]क्रिया[illegible]था॥ सा च पंचविधेत्युक्तं॥ पद्मैवे भवखंडे॥ स्पंदश्चैव परिस्पंदः प्रक्रमः परिशीलनः राम०
॥ अथा[illegible]सर्वेषां तर्पी[illegible]ताधापास्थितेतियावत्॥ सर्वेषामाधाररूपेतिवा॥ तदुक्तं मार्कंडेयपुरा १२९

रो॥ येषां निरूपणे विनश्यंतीत्यर्थे येषां स्वलोपे च सत्त्वाश्चासत्त्वाः॥ यच्चामूर्तं यच्च मूर्तं समस्तं यद्य
ह्मनैषैकमेकं च किंचित्॥ ये धीभूमो यें तरिक्षे मतो वा तेषां देवि त्वं तत्र सर्वोपलब्धिरिति॥ नचास्मि
न्पक्षे स्त्रीलिंगानुपपत्तिः॥ परवल्लिंगं द्वंद्वतत्पुरुषयोरिति सूत्रात्॥ आधारोधिकरणमिति सूत्र
त्रानुसारेणाधारपदस्य पुल्लिंगत्वनिश्चयादिति वाच्यं॥ निर्गुणं ब्रह्म॥ णाकथनीयेप्यस्तु तत्स्यैव यु
क्तत्वात्॥ तथाहि॥ सत्त्वादिगुणत्रयस्योपचयः पुंस्त्वं॥ अपचयः स्त्रीत्वं॥ साम्यं नपुंसकत्वं॥ लिं
गं यो नितडुमपाभावस्थाराणां तु तेषां मचेतनेष्व व्याप्तिः॥ सर्वस्यापि जगतस्त्रिगुणात्मकतायाः
देवीभागवतादौ प्रतिपादितत्वे न तेषां सर्वत्र संभवात्॥ उपचयादेः सर्वाधिकत्वेन प्रतिपादार्थं
किंचिदपेक्षोपचयादयः सत्त्वेति लिंगत्रयस्यापि केवलान्वयित्वाद्यवस्थया विवक्षानु
सारेण प्रयोगः॥ सर्वमेतदपि प्रमोक्तं महाभाष्ये॥ संस्त्यानप्रसवौ लिंगमास्थेयौ स्वकृ
तांतत इति॥ संस्त्यानस्त्यायतेर्ड्ट्स्त्रीसृजेः सप्रसवस्तु मानः॥ उभयोरंतरं यच्च तदभावे नपुंस
कमिति च॥ लिंगमशिष्यमिति च॥ कोसावनुमानोनामेति प्रयोगाच्च॥ बंधुनि बंधुश्री हावितिसो
त्र प्रयोगाच्च॥ एवं सत्यपवन्हुत्वामा प्रमांही दिति लिंगानुशासनप्रवृत्तिर्नियमादृष्टमात्रप्रयोज
निकाचेतनेषु तन्न्यप्रविधलिंगसमुच्चयविवक्षयेवाजाद्यतष्टा वितादयः॥ तेनपष्ठ्येकत्वलिंगम
पि विवक्षितमिति साधयतान्तथा च लिंगमित्यधिकरणस्यानविरोधः॥ ततश्चत्रिगुणातीतायांत्व

१३० चिच्छक्तेः सर्वजगन्मातुरीश्वरत्रिपुरसुन्दर्या द्विविधस्यापि स्त्रीलिंगस्य सत्त्वाच्चेतनानां तदपेक्षा संकुचित
तदृष्टित्वेन निरर्गलत्वम् अपि अचेतनवागेव ताभिः स्त्रीलिंगमेव प्रयुज्यते। नियममाह शान्तस्ये
त्यादिना पद्यान्तर्गतत्रिलिंगानुशासनानुगुणमस्माभिः प्रदर्शितेन पुनरपशब्दत्वं निराकार्यमिति दिक्॥
॥ शोभना प्रतिष्ठा जगतः [illegible] ॥ सुप्रतिष्ठा स्वविश्रामस्थानं देविपौ [illegible] ॥ सद्ब्रह्म॥
आसन्नद्वितं जगत्॥ अनिर्वचनीयस्य जगतः सज्जायेतेत्यादिश्रुतिसंमतत्ववैलक्षण्यात्तेपि
सद्विलक्षणात् [illegible] शस्तपदेन ग्रहणं॥ असद्वा इदमग्र आसीत्कथमसतः सज्जायेतेत्या
दिश्रुतिसंमतत्ववैलक्षण्येन प्रयोगदर्शनात्॥ तयोः रूपे धारयतीति तथा॥ अथवा स्तनपा
वहारिकं सत्यं पारमार्थिकं वा॥ असत्तुच्छं॥ ते एव रूपे विषयौ धारयति मासयति॥ सदस
द्विषयकज्ञानद्वयस्वरूपेत्यर्थः॥ शब्दमात्रविषयकं च रमहत्त्विषदस्मात्रविषयिका यात्र
पित्रैर्विकल्पाख्याः सत्यात्॥ तथा च पातंजलसूत्रं शब्दमात्रानुपाती वस्तुशून्यो विकल्प
इति॥ गोत्वमस्त्वमपि॥ बुद्धिविशिष्टं तदस्तीति॥ यद्वा भावाभावपरौ सदसच्छब्दौ॥ तौ च
यो न्यूनतया सत्ताविच्छेदाभावानादिहेतोर्द्यौ॥ सत्तयनादेर्धर्मिणोः पृथक्त्वात्। अथवाध्यासादेरधिष्ठा
नरूपधर्मस्याधिकरणत्वस्वरूपत्वात्॥ भावाभावमात्रस्याधिष्ठानमिति वा॥ तदुक्तं स्कांदे यज्ञवै राम०
भवखंडे॥ यच्चदृश्यमिति तथाभाति यच्चनाभाति तथापि च॥ तत्सर्वं महादेवमात्रस्याधिष्ठानमिति १३०

वा॥ तदुक्तं स्कांदे यद्वै मवेलंडे॥ यथा दक्षिणया माति यद्यन्नाक्षिणयापि च। तत्तत्सर्वं महादे
वमायया परिकल्पितमिति॥२८२॥ अष्टमूर्तिरजाजेत्री लोकयात्राविधायिनी॥ एकाकिनी भू
मरूपा निर्द्वैताद्वैतवर्जिता॥२८३॥ पंचमहाभूतानि सूर्याचंद्रमसौ जीवात्मस्वर्गदीक्षिता
नाम यजमान एकइत्यष्टसंख्याकमूर्तयो यस्याः॥ भूतानि पुष्पवंतौ स्वरिति देवमष्टमूर्तयइति
शाकिरस्मात॥ विष्णुपुराणेपि॥ प्रथमे शे॥ सूर्योजलं मही वह्निर्वायुराकाशएव च॥ दीक्षि
तो ब्राह्मणः सोमइत्यष्टौ मूर्तयो मताः॥ पत्न्यः सुवर्चला चोमा सुकेशी चापरा शिवा॥ स्वा
हा दिक्तस्तथा दीक्षा रोहिणी च यथाक्रमं॥ शनैश्चरस्तथा शुक्रो लोहितांगो मनोजवः॥ स्कं
दस्वर्गोथ संतानो बुधश्चानुक्रमात्सुताइति॥ लैंगेतूक्तं॥ अष्टौ प्रकृतयो देव्या मूर्तयः प
रिकीर्तिताः॥ तथा विकृतयस्तस्या देहबंधविमूर्तयइति॥ कुलाष्टकस्वरूपेण मर्यादा॥ त
च्च सममपास्मारस्मृतौ॥ गणिकाशौंडिकी चैव कैवर्ती रजकी तथा॥ तत्रकारी चर्मकारी मातंगी
पुंश्चली तथेति॥ अथवा॥ खल्सांगी दीर्घकेशी या मानेग कुसुमा मते स्यादिना हृदया
मले॥ अष्टानां लक्षणान्युक्तानि॥ लक्षणानि तुत्जीया वरवोरो प्रसिद्धानि॥ तदष्टकरूपा॥
ब्राह्म्यादि वशित्वादि स्वरूपेति वा॥ अजामेकां लोहितशुक्लकृष्णामित्यादिश्रुतिप्रसिद्धाया
अविद्यारूपाया अजाया जेत्री॥ ज्ञानरूपता दर्शनेनाशिकेति यावत॥ लोकानां च तुर्दश

संख्यानां यावत्तां संरक्षणां विधत्ते ॥ एकाकिनी द्वितीया तु हि मातः एकाकी हि काकिनि त्वास हाय इतिश्रुस
यः ॥ सोऽबिभेत्तस्मादेकाकी बिभेति स हायमीक्षांचक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत
एवास्य भयं वीयायेति बृहदारण्यकश्रुतेः ॥ देवीपुराणेऽपि एकैव लोकान्ग्रसति एकैवा स्था
पयत्यपि ॥ एकैव सृजते विश्वं तस्मादेकाकिनी मतेति ॥ अथ परिभाषायां च तत्त्रिशत्त्वा मा
नि विभजते ॥ भृङ्गीणां बलत्वे दार्लब्धं भावि भावे देह्नावं ॥ हस्ती द्विवेकं वा भजते वा तत्वमंद
मृगान् ॥ एकमित्यस्य द्वादशाक्षरमेकं नाम मृत्यर्थः ॥ १५ यत्र नीन मृत्यभूपाति नाम द्वाणोनी
ती मादिनाथो वै भूमा तत्सुखमित्यं तेन श्रुतौ प्रतिपादितो भूमात्र हैवैति भूमाधिकरणो
निर्णीतरूपव त्वाङ्गमहत्पः ॥ यद्वा वहीर्णो पिभूत्वबहोरिति निष्पन्नो बहुर्थको भूमशब्द
: तत तश्च काकिन्यपि बहुरूपमर्थः ॥ तदुक्तं देवीपुराणे ॥ एकाप्युपाधितो भूमाछि वास
सर्वत्र विश्रुता ॥ यथानुरञ्जनं वर्णैर्विचित्रैः स्फटिको मणिः ॥ तथा गुणवशाद्देवी भूमा ना
मेति वर्ण्यते ॥ एकोऽप्यात्मा यथा भ स्तः स्वकीयोऽन च तिष्ठति ॥ वर्णतो रूपतश्चैव तथा गुण
वशाद्भूमा ॥ नभसः पतितं तोयं पयान्तारसंभवेत् ॥ भूमेरसविशेषेण तथा गुणवशाद्भूमा
यथा द्रव्यविशेषेण वायुरेकः पृथग्भवेत् ॥ दुर्गन्धो वा सुगन्धो वा तथा गुणवशाद्भूमा ॥ य ए.न.
था वा गार्हपत्योऽग्निरसंज्ञान्तरं व्रजेत् ॥ दक्षिणाहवनीयादि ब्रह्मादिषु तथैव सा ॥ एके १३१

तेन च भूस्वान[illegible] निरस्तौ नैः॥ तस्माद्भक्तिः परा कार्या सर्ववर्गप्रसिध्दय इति॥ कूर्मपुराणेपि॥
एव[illegible] कामेष्व[illegible] [illegible]धा[illegible]तः॥ परावरेणात्मनात्मा क्रीडते नन्यसस्त्रिधा विति॥ यत्रात्म
[illegible] तत्र मर्त्सि [illegible] अनुतो हि तदर्शनस्यानित्याविषयकता प्रतिपाद
नेनतस्पहे यत्वाभिगतं हि तं य स्यांश्मा निर्दिष्टा॥ नपुनर्द्वैतं पूर्वं छिन्नं पश्चाद्विगतं॥ मूलत
एव तु नास्तीत्याह॥ द्वैतवार्त्ता[illegible] भेदस्यानात्मकत्वेन सार्वकालिकात्वेदभावादिति भावः॥
॥ १८४॥ अत्र[illegible] अस्मात्[illegible] पिरा॥ दहनी ब्राह्मणी ब्राह्मी ब्रह्मानंदावलि
प्रिया॥ १८५॥ अ[illegible] ब्रह्म[illegible] दहतीति॥ तथा च दह हदा[illegible]के॥ स
वाएषमहान[illegible] दृढ[illegible] तेव[illegible] वेदेति॥ अत्रान्नमासमंताद्दहताति
[illegible] दायके॥ २ ब्राह्मणश्च ब्रह्म[illegible] नवंचसीति श्रुतेः॥ वेदसिगछसी
[illegible]॥ सर्व[illegible] सहश्वतादाहध्या॥ ब्रह्मणा वै तन्मेन सह ब्रह्मनो जीवा
[illegible] नित्तेन[illegible]॥ यद्वा ब्रह्मात्मनोः शिवजीवयोरैक्यमेव स्वं सर्वस्वं प्रतिपाद्यं
यस्य सहं समत्रो[illegible]मस्या इति॥ तदुक्तं[illegible]खंडे॥ अथ गाजीवमंत्रो यं जीवात्म
प्रतिपादकः॥ अहंशब्दस्य[illegible] जीवात्मवस्तुनि॥ शक्तिमंत्रः सकाराख्यः परमेश्व
रवाचकः॥ प्रक[illegible]तो[illegible] परमेश्वर॥ महादाद्यणुपर्यंतं जगत्सर्गं चराच

१३२ चरं॥ जायते विवर्ततिचैवलीयते परमेश्वरे॥ समाश्रितेन मातेहं स एव परमेश्वरः सोहमेवं न संदेहः
सोहमेवं न संदेहः स्वानुभूतिप्रमाणात इति॥ एतेन त्रिंशत्सोहसमंत्रार्थरूपिणीति नामव्याख्या-
तं॥ महतो महीयस्त्वाद्बृहती॥ षट्त्रिंशदक्षरछंदोविशेषरूपा वा॥ न च गायत्री छंदसामसी-
सीतिकौर्मवचनविरोधः॥ उभयात्मत्वांगीकारे तदभावात्॥ अत एव बृहत्साम तथा सा-
म्नामिति भगवतो वासुदेवस्य विभूतिरूपवर्णने गीतावचनस्य भगवत्या विभूतिरूपवर्णना-
र्थस्य ज्येष्ठं साम च सामस्विति कौर्मवचनेन विरोधः॥ तलवकारिशाखायां मुडसंचि-
त्रमितं चित्रमिमनयोर्व्येचोभीयमानं सामज्येष्ठसामेत्युज्वलायां हरदत्तोक्तेः॥ बृहत्सा-
मत्वसत्वं नश्विश्वेत्यस्यापि विभीयमानं प्रसिद्धमेव॥ बृहज्ज्येष्ठशब्दयोः पर्यायत्वस्य संम-
वाच्च॥ तेन ज्येष्ठसामरूपेति वा बृहत्सामरूपेति वा व्याख्या॥ ब्रह्माणी कंजिकास्यक्वादि-
जयंतीषु गिरिश्रुतेति विष्णुकोशादौ षधिविशेषरूपा द्विजस्त्रीमात्ररूपा वा॥ संविद्विशेष-
रूपा वा॥ उक्तं च समयाचारस्मृतौ॥ ब्राह्मणी श्वेतपुष्पाढ्या संवित्सा देवतात्मिकेति॥ अ-
थवा शिवस्य ब्राह्मणावज्ञातिमत्वाद्ब्राह्मणी॥ तथा च छांदोग्ये श्रूयते॥ ॥ विरूपाक्षो एम०
सिदंता विरते शिवं ब्रह्मन्॥ त्वं देवेषु ब्राह्मणोस्य हं मनुष्येषु ब्राह्मणो ब्राह्मणानुपधावस्व॥ १३२

132

पत्या धावामीति ॥ पर[illegible]राद्दिसके र्मेवाद्युमा[illegible]वीतिनमे र्मे मिमं ब्रह्मनिष्ठा विना शिव ॥ को
पादि भ्रमादिज्ञानस्य आत्मत्वं ज्ञानी केवलमिति त्वं शिवनत्वा[illegible]वेकेन्द्र इष्टव्य ॥ अविद्यानिरिक्ताजडज
निसद्भावेनाभावत्वमत आह ॥ प्राप्तीप्राप्तोजाताविति निपातनात्साधुः ॥ नागात्मिकाया ब्रह्मैवानं
दो यस्याः ॥ सगुणस्यायाः मनवर्थी[illegible] ब्रह्मानंदवती[illegible] । वलिनोः विद्यानितासमर्थाः कामादि
शत्रुजेतारः प्रियाद्यापात्रं यस्याः [illegible]लि[illegible]केरात्रौ प्रियो[illegible]स्यवामनसत्तरमिनावाय्कजोपहारः प्रि
यायस्या वा ॥ २८३ ॥ मान्या [illegible] सेनानामाभावद्विवर्जित[illegible] सुखाराध्या शुभकरी शोभना सुलभा
गतिः ॥ २८४ ॥ संस्कृत प्राकृतादिभाषाः [illegible] भा[illegible]र्निरूप्यत इति वा ॥ तदुक्तं ॥ संस्कृतेनैव
केप्याहुः केचिल्लेन्द्रादिभाषया ॥ साधारणं पनकैविंत्रा[illegible]कृतेनैव केचनेति । हरहती अपार सेनाच
तुरंगवलं यस्याः ॥ हरहसेनाप्त्यराज्ञविशेषरूपा वा ॥ भावा द्रव्यगुणादयो भावाः प्रागभावादयस्तै
रुभयैरपि विवर्जिता ॥ ननु सदेवाभावस्याप्यभाव[illegible]तत्त्वे कथमभाव विवर्जितत्वं ॥ किंच
प्रागभावध्वंसाभावा[illegible]भावादयो [illegible]द्व्याश्रिता इति यो [illegible]काल[illegible]ववक्ता आग । अकंशत[illegible]योगात्त
ध्वंस[illegible]भावाभावे[illegible]भवन्ते[illegible]भावे[illegible]भावत्वं भवापद्यत इति कथं भावाभाव विवर्जित
त्वमिति चेत ॥ न आह [illegible]दे[illegible]त्वात् ॥ तदुक्तं[illegible]देयद्वैवमवत्वंडे ॥ अधिष्ठानावशेषो हि
नाः [illegible]कल्पित वस्तुनः ॥ भावस्येव [illegible]भावत्वं नाशो भावसमावता ॥ भावाभावस्वरूपाभ्यामन्यः

१३३ वृत्तिकल्पितः॥ अधिष्ठानस्य नो शोभनसमस्तवादेषु सर्वदेति॥ अधिष्ठानसमसत्ताकपदार्थ
प्रतियोगिकाभावस्य तदभावस्याधिष्ठानाद्भेदेन तत्र इति तात्॥ अधिष्ठानविषमसत्ताकस्या
भावस्त्वधिष्ठानस्वरूप एव न भिन्नः॥ अधिष्ठानं तु समसत्वादेव न नश्यतीति समुदायार्थः
॥ दुःखेनोपवासादिक्लेशं कृत्वा केऽपि जन्मसहस्रं नियमनिमादिनो नरोत्तरेखलभ्य प्रकारोपदे
शः॥ न चैतावता पापमात्रं कर्नीयमित्याह॥ शुभकरी॥ शुभं पुण्यमेव करोति॥ मा क्रादि
पुरुषार्थस्य तत्त्वनाशात् शोभनानां सुलोपात् मात्रात् सुलभा गतिः॥ आत्मप्राप्तान्नं॥ गम्यतामिति गतिः॥
फलं ज्ञानमुपायो वा॥ गतिर्मार्गे दशायां च ज्ञाने यात्राभ्युपाययोरिति विश्वः॥ एषैव सर्व
भूतानां गतीनामुत्तमा गतिरिति कौमोरी॥ शोभनायेत्सुलभायेगमेनन मह इति चतुर्थी त्रयेणा
त्रयोगः॥ अत्र पूणां नामतिः सुलभा गतिरिति गतिपदानुषंगेणानामत्रयं स्तुवते॥ तावतैव
यो न तन्नामपरिहारसंभवात्॥ अत्र हि शोभनेति पदत्रयं प्रयुक्ते॥ स्तुतीनन्निनी स्तुत्यः शो
भनेति यद्यपि स्थितमेकं नाम॥ स्तवानिमेचैन प्रीता शोभनेऽत्र चतुरक्रमा शोभनेति द्विती
यं॥ अस्मिन्ने चाकारप्रश्लेषात् योगात्मा अयोगात्वोत्तर पदेनैकवाक्यता कल्पयिता यो नास्त्य
नुच्छिपतद् इति स्थितिः॥ मतिरमतिरित्यादि समापदच्छेदेष्वेवो॥ पपन्निर्मूलं॥ भगवत्पादैरा राम
पितिस्तुसहस्रनाममाष्येऽई दृशी मिरेवो पपत्तिभिः पदच्छेदस्य निर्णीतत्वात्॥ यथानिधिरव्ययद १३३

मत्र पदस्यैकनामत्वमप्यथः पुरुषः सा ह्रीत्यनेन पौनरुक्त्यपरिहाराय ॥ एवं स्वविरोधुवः शा
श्वतस्थाणुः सर्वविज्ञाणुर्वाचस्पतिरुन्नारैधीरित्यादिषु ॥ एवं जनेनो जननजन्मादि भीमइत्यनेन न
पुनरुक्तिपरिहि. हीर्धयाः तुलः शरभो भीमइत्यत्रा भीमइत्यकार प्रश्लेषः कृतः ॥ एवमिष्टो
विशिष्टइत्याद्विमत्र तद्वृत्तलाकुरसत्त्राणामपीह शोपपत्तिमूलकत्वेन तदुक्तारीत्यैव पद
च्छेदेनानीवादरः कर्तव्यः ॥ अनेनैव न्यायेन नामान्वेदिमिर्वेदमर्यादपापिपष्यमानरूह ग्रंथो
न्यायमूलकत्वात्सोढव्य इत्येवं तिनामविरोधेन तत्प्राप्रमाणाप्रसिद्धतिर्जेमिनीयाः ॥ प्रकृते तू
भयथापि पौनरुक्त्यपरिहारसंभवे प्रस विस्त्री प्रचंडाज्ञा ग्रालिष्टा प्रकटाकृतिरितिपकारादि
नामप्रायपाठेऽन्नेस्पृष्टभिन्नपदत्न स्वीकारे संदर्भे शुद्धसामंजस्यात्तत्र प्रचंडाज्ञेत्येकपद
त्वलिङ्गया प्रकृते गतिपदानुपंगेगाणापिनामद्वयं स्वीकर्तव्यमुचितमितिदिक् ॥ सर्वथैकमेव
नामेतिपक्षाग्रहस्तदेकमेवपदमिति निष्ठुवच ॥ शोभनाचासावसुलभाचेति विग्रहे सुदु
र्लभे मस्यर्थः ॥ सुदुर्लभा आगतिः पुनरावृत्तिर्यया जन्मच्छेत्रीति यावत् ॥ यस्तो पश्चिमं जन्म या
दिवाशंकरः स्वया ते नैव लभ्यते विद्या श्रीमच्चतुर्दशाक्षरीति ब्रह्माण्डपुराणात् ॥ यद्वात्रसु
र्लभा गतिः सुदुर्लभं जन्म मानुष्यादि तच्छोभनं यया सेत्यर्थः ॥ उक्तं च देवी भागवते ॥ येन श्रुतं भागवतं
भागवतं पुराणं नाराधिता यैः प्रकृतिः पुराणी ॥ हतं तु मुखेनैव धरामराणां तैः स्वांहृत्या जन्म

१३४ गंतं नराणामिति ॥ विष्णुभागवते तत्रैव नयाविती यैः पुरुषः पुराणादिति द्वितीयचरणः पंक्ष
न इति भेदः ॥ शोभनाऽसुरनत्यिके यत्र शोभना नामसुराणां प्रल्हादादीनामिव यथा निर्वैरप्र
कृते नामत्रयमपि स्तुवंच ॥ १८४ राजराजेश्वरी राज्यदायिनी राज्यवल्लभा ॥ राजत्कृपा राजपी
ठनिवेशितनिजाश्रिता ॥ यथा राज्ञां देवराज राजेश्वरी राज्यदायिनी एवं राज्यवल्लभा ॥ राजत्कृपा राज
स्य कुबेरस्येश्वरी वा ॥ राज्यं स्वराज्यं वैकुंठकैलासादिपदप्रादिकं दाम शीलमस्याः ॥ पूर्वोक्तानि
राज्यानि वल्लभानि प्रियाणि यस्याः ॥ राज्यशब्देन तत्पतयो राजानो वा कथ्यंते ॥ अतएव श्रीनग
रे तेषां वासः समर्पते ॥ यदाह दुर्वासाः ॥ मधुकैटभप्रमुखयोर्गेहे रुनीलात्मका निवसंति ॥ शांतो
दरी सहायान भूपालानपि पुनः पुनः प्रणुमइति ॥ अमुष्यो स्थिः सत्रयोदशचतुर्दश प्राकारयो
रिन्यर्थः ॥ राजंती शोभमाना कृपा यस्याः ॥ राजंतं न्यायाणामिंद्रादीनां च पीठेषु सिंहासनेषु निवेशि
ता निजा आश्रिता यया ॥ १८५ ॥ राज्यलक्ष्मीः कोशनाथा चतुरंगबलेश्वरी ॥ साम्राज्यदायिनी स
त्यसंधा सागरमेखला ॥ १८६ ॥ राज्याभिमानि नील श्री राज्यलक्ष्मीः ॥ कार्यस्यामंत्र सुत्रराजेप्र
सिद्धः ॥ कोशस्य भांडागारस्यादिव्यस्य नाथा स्वामिनी ॥ चत्वारि हस्त्यश्वरथपादातरूपाणि अंगानि एषां
येषां तेषां बलानामीश्वरी ॥ अंगानामेव बलं येषां ते अंगबला व्यूहाः ॥ चतुरस्य पंचकार्ये सहाय तेषामीश्व १३४
री वा ॥ तेन च वाराहदेवाद्यावेश त्वेषु पुराणेषु शिवशैवशाक्तेषु पिपुराणेषु प्रसिद्धास्तेन द्रहोदाहार्या

॥ शारीरपुरुषः छंदःपुरुषो वेदपुरुषो महापुरुष इति बह्वृचोपनिषद्व्याख्या॥ राजसूयेन येष्टा मंडले
श्वरो वा राजाधिराजो वा सम्राट्॥ तस्य भावः साम्राज्यं॥ तद्दत्ते॥ येनेष्टं राजसूयेन मंडलस्येश्वरश्च
यः॥ शास्ति यश्चाज्ञया राज्ञः स सम्राडिति अग्निपुराणीयकोशात्॥ सत्ये अनुत्कृष्टे संधे प्रतिज्ञा मर्या
देयमस्याः॥ सागराः समुद्रा एव मेखला कांची यस्याः भूमेः सा॥ ॥१८६॥ ॥ दीक्षिता दैत्यशमनी
सर्वलोकवशंकरी॥ सर्वार्थदात्री सावित्री सच्चिदानंदरूपिणी॥ ॥८७॥ ॥ दिव्यं ज्ञानं क्षिणो
ति प्रापयतीति दीक्षा॥ अथातो दीक्षा कस्य चिह्नेनो दीक्षितं इमाचक्षत इमसार भजनं वा एनद्दीक्षितं
संतं दीक्षित इमाचक्षत इत्संता दाथर्वणब्राह्मणात्॥ शिष्येभ्यो मंत्रदानेन पापं क्षपयतीति
वा॥ दीयते क्षपया शिष्ये क्षीयते पापसंचयः॥ तेन दीक्षेति कथिते ति परानंदतंत्रात्॥ सात्र
स्यां जातेति दीक्षिता तद्दभिन्नी॥ दैत्यानां भंडादीनां शमनी नाशिका॥ सर्वान् लोकान् स्ववशे कु
रुते॥ सर्वेषां चतुर्णामर्थानां पुरुषार्थानां दात्री॥ तत्तंत्रयोगेन लोके तिष्ठ्या एव निषेधात्कृष्टौ
गलक्षणा षष्ठ्या सजकाभ्यामिति समास निषेधे षिष्ठ्योषष्ठ्या समासः॥ उक्तं च देवीपुराणे॥ धर्मा
द्याश्रितिता नर्थान् सर्वलोकेषु यच्छति॥ अतो देवी समाख्याता सर्वसर्वार्थसाधनीति॥ सवितु
र्जगत्प्रसूतेः परशिवस्येयं सावित्री॥ प्रजानां च प्रसवनात्सवितेति निगद्यत इति। विष्णुधर्मोत्त
रात्॥ देवीपुराणेऽपि॥ त्रिदशैरर्चिता देवी वेदयोगे प्रपूजिता॥ भावशुद्धं स्वरूपा च सावित्री तेन सा
स्मृतेत्युक्तं॥ देवीभागवतेऽपि॥ सवर्णासंहनार्थे च धातुरेष निषास्यते॥ सवर्णेजेजसोन्यन्निःसा

१३५ वित्रीतिनकथ्यतइत्युक्तेः॥ इयंचपुष्करतीर्थाधिष्ठात्रीदेवता॥ तदुक्तंपद्मपुराणे॥ सावित्रीपुष्करेना
म्नीतीर्थानांप्रवरेशुभइति॥ अथपरिभाषायांषट्त्रिंशन्नामानिविभजते॥ देहउरणोद्भवलेखा द्वि
तोहंसंप्रदिवाभूः॥ वाणिरणोभाविगुणाहिपदलतोमायजववादाः॥ २५ सत्त्वंचितमानंदब्रह्मरूपं
स्वरूपमतएवविद्यांतरेषूपसंहार्यमस्याइतिसच्चिदानंदरूपिणी॥ ॥ १९९ ॥॥ इतिभास्कररायेे (७००)
णकृतेसौभाग्यभास्करेसप्तमेनशतेनाम्नांसप्तमीभोगदाकला॥ ॥७००॥ इतिश्रीललितासह
स्रनामभाष्येसप्तमंशतकंनामसप्तमीकला॥ ॥ देशकालापरिच्छिन्नासर्वगासर्वमोहिनी॥ सर
स्वतीशास्त्रमयीगुहांबागुह्यरूपिणी॥ ॥ १८८ ॥ देशकालाभ्यामपरिच्छिन्नातत्कृतपरिच्छेदाभा
वती॥ उक्तंचयोगसूत्रे॥ सएषपूर्वेषामपिगुरुःकालेनानवच्छेदादिति॥ सईश्वरःपूर्वेषांब्रह्मा
दीनामपिगुरुःपिता॥ कालेनानवच्छिन्नत्वादित्यर्थः॥ इहनास्तीतिप्रतीतिविषयोऽत्यंताभा
वोदेशतः। परिच्छेदः॥ पूर्वंनासीदग्रेनभविष्यतीतिविषयोप्रागभावध्वंसौकालतःपरिच्छेदः
॥ अधुनानास्तीतित्वत्यंताभावएव॥ देशेष्वंतौकालस्यकालेष्वंतौदेशस्यचावच्छेदकत्वनियमा
दिदानींगोष्ठेगौर्नमंडपायामितिप्रतीतेः॥ इहाधुनेत्यनयोरेकस्याधिकरणत्वेनान्यस्यावच्छेदक
त्वेनोल्लेखायप्रयोगइतिग्रंथांतरेषुविस्तरः॥ ईदृशपरिच्छेदाभावोनामततत्प्रतियोगित्वाभा
वः॥ प्रतियोगित्वसंबंधेनतयोरभावोवा॥ तद्वतीत्यर्थः॥ तदुक्तंसौरसंहितायां॥ उमानाका राम॰
शिवव्यापीस्वातिरिक्तमृषायतः॥ देशतःकालतश्चापिह्यनंतोवस्तुतःस्मृतइति॥ अनंतश १३५

दस्यपरिछेदस्यापरिछेदस्याभाववानित्यर्थः॥ ननु तत्र वस्तुतः परिछेदाभावोपि स्मर्यते॥ अस्ति हि
अयमयं नेति प्रतीति विषयो योन्यो न्याभावो नाम वस्तुतः परिछेदः॥ तत्र प्रतियोगित्वाभावः किमि
ति नो त्वाह इति चेत्॥ तस्य वादिविप्रतिपत्ति विषयत्वेन बहुभिर्नामभिः समर्थयिष्यमाणत्वेन अ
थाऽि नर्द्दे समाणत्वादिति ग्रहाणं॥ तदेवाह॥ सर्वगा॥ सर्ववस्तुमात्रं गच्छति अभेदेन प्राप्नोती
ति सर्वगा॥ तदुक्तं वाराहपुराणे॥ त्रिमूर्तिपुरुषाभ्यामिकां श्वेतपर्वततपश्चरंती प्रतिब्रह्मणा॥
वरो प्रियतामिति तुष्टेन्देवावचनं॥ भगवन्नैकदेशेहं नोत्सहे स्थातुमंजसा॥ अतोर्थितांवरं या
चे सर्वगत्वमभीप्सती॥ एवमुक्ता तदा ब्रह्मा स्तुष्टे देवे प्रजापतिः॥ उवाच सर्वरूपे त्वं सर्वगा
सि भविष्यसीति॥ अत्र सर्वगत्वविवरणात् रूपस्य सर्वेरूपेइति संबोधनस्य च सर्वाभिन्नत्वेइत्यर्थ
कत्वापरिकरांकुरालंकारः॥ सर्वाभिन्नत्वं च सिध्यमे वैसे सी त्युक्तं॥ अत एव साध्यत्वद्योतक
स्य भविष्यसीत्यस्य सर्वक्षेत्रेषु तव सगुणा मूर्तयो भविष्यंतीत्येतत्परत्वं अतः सर्वक्षेत्रेषु वि
द्यमानेत्यप्यर्थः॥ सर्वांतर्यामिणीति वा॥ इदंशार्थं त्रयमप्यभिप्रेत्योक्तं देवीपुराणे॥ देवा
नाएषसिद्धांतः परमार्थो महामते॥ एषा वेदाश्च यज्ञाश्च स्वर्गश्चैव न संशयः॥ देव्यामा
प्तमिदं सर्वं जगत्स्थावरजंगमं॥ इज्यते पूज्यते देवी अन्नपानात्मिका च सा॥ सर्वत्र शाकरी दे
वी ननु भिन्नामभिश्वसा॥ सूक्ष्मे चैर्मानतथाचाचोवाग्नि श्च स्वर्गीं च सर्वगा॥ एवंविधा यतो देवी स

१३६ दार्ष्टज्ञाविधानतः॥ ईदृशीवृत्तिर्यस्येनांसततस्याप्येवलीयतइति॥ ननुनित्यत्वान्नित्यत्व
त्वचित्वादिविरुद्धधर्मसमावेशात्कथममोमामावप्रतियोगित्वमस्तब्रह्मरूपमावइत्यत
आह॥ सर्वमोहिनी॥ सर्वान्आब्रह्मजनान्भेदभानेसत्यस्वमानान्मोहयतित्र
द्वैतविषयकज्ञानविधुरान्कुरुतेइतितथा॥ ब्रह्मणोजगतश्चभेदभानस्यमोहमात्रत्वाद
स्तुतोपरिच्छेद्यत्वेनकापिक्षतिरितिभावः॥ उक्तंचकूर्मपुराणेशिवेन॥ इयंसापरमाशक्ति
र्मन्मयीब्रह्मरूपिणी॥ मायाममप्रियाऽनंतायमेदंमोहितंजगत॥ अनयैतज्जगत्सर्वंस
देवासुरमानुषं॥ मोहयामिद्विजश्रेष्ठाःसृजामिविसृजामिचेति॥ अत्रैवहिमवंतंप्रतिदे
वीवचनं॥ यानिशास्त्राणिदृश्यंतेलोकेस्मिन्विविधानितु॥ श्रुतिस्मृतिविरुद्धानिद्वैतवा
दरतानिच॥ कापालंभैरवंचैवशाक्तंगौतमंमतं॥ एवंविधानिचान्यानिमोहनार्थानि
तानितु॥ येकुशास्त्राभियोगेनमोहयंतीहमानवान्॥ मयासृष्टानिशास्त्राणिमोहायैषां
भवांतरइति॥ सूतसंहितायामपि॥ ब्रह्मादृष्टीनाःपापिष्ठामोहितामाययाजनाः॥ नैवजा
नंतिदेवेशंजन्मनाशादिपीडिताइति॥ संवित्त्रैलोक्यंमोहयतीतिवात्रैलोक्यमोहनच्चक्रराम०
विद्योभयरूपेतियावत्॥ ननुघटपटयोर्भेदभानस्यापितुल्यत्वात्येनमोहमात्रत्वात्तयोरप्य १३६
भेदएवास्त्वतआह॥ सरस्वती॥ ज्ञानाभिमानिनीदेवता॥ ज्ञानसमुद्रूपेत्यर्थः॥ विष

136

पानः वछिन्नज्ञानरूपेत्यावत्॥ घटादिजडपदार्थानिर्णयेमोहस्यायोगेप्यज्ञानेनाहृतं
ज्ञानंतेनमुह्यंतिजंतव इतिवचनेनज्ञानरूपाद्वैतविषयेऽज्ञानावरणस्यावश्यकत्वात्तन्नि
र्णये सर्वानर्थनिरासकपरमपुरुषार्थरूपे पाप्मिनो भगवत्प्रसादविधुराणां मोह आवश्य
क इति भावः॥ यद्वा कृमाः अक्रमस्थद्विवर्णात्सरस्वतीतिधीस्मवचनात्तादृशकर्मरूपे सप
र्थः॥ नत्वनात्मदिङ्मोहादिरूपोमोहः॥ विरुद्धधर्मसमावेशादियुक्तिसहस्रैर्भेदस्यानु
मीयमानत्वादित्यत आह॥ शास्त्रमयी॥ प्रधानार्थोयं मयट्। सर्वं खल्विदं ब्रह्मेत्यादिशास्त्र
प्रधाना॥ अयं भावः॥ शास्त्रमेवेह प्राधान्येन गमकं न त्वनुमानादि॥ तस्य शास्त्रतो दुर्बल
त्वात्॥ अत एव शास्त्रयोनित्वादिति ब्रह्मसूत्रं॥ वेदैकवेद्यत्वबोधकश्रुतयश्च तत्त्वौपनिष
दं पुरुषं पृच्छामीत्यादयः॥ ततश्च सर्वस्य वस्तुजातस्य ब्रह्माभेदे शास्त्रेणावबोधिते मन्त्रे तती
यकूटेनाप्यनुदिते तद्विरोधादनुमितेरैकत्र मतत्वकल्पं॥ वेदांतानामैदंपर्येण ब्रह्मैकनि
र्णयायामप्रवृत्तेः॥ अतएव ताहशजोतिः शास्त्रविरोधाच्चन्द्रप्रादेशिकत्वविषयकस्य सार्वजनी
नप्रत्यक्षस्यापि भ्रमत्वकल्पनमिति न तु भेदभानेन केवलं लौकिकचंद्रप्रादेशिकत्वज्ञा
नवत्॥ किंतु शास्त्रीयमेवेति शंकते॥ गुहांवा॥ गुहायां स्थितां वा॥ छायारूपेत्यावत्॥
मध्यमपदलोपी समासः॥ ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे॥ छा

१२७ पातयौ ब्रह्मविदो वदंति पंचाग्नयो ये च त्रिणाचिकेता इति श्रुतौ गुहां प्रविष्टत्वेन वर्णितयोः छा
यातपयोः परस्परविलक्षणत्वेनाद्वितीयवचनबलाच्च भेदसिद्धिरिति भावः ॥ यद्वा गुहस्य स्कंद
स्यावा माता ॥ तारकासुरवधादिकार्यार्थं देवैः प्रार्थनेन ततः शिवपार्वत्योः समागमस्तत्र विघ्ना
चरणात्तेन कोपशापादि ॥ ततो भृंगीगणाधारणत्वादियोगेन एकदेशसन्निरम्यादिकथायाः श्री
शिवकगम्यत्वात् एव भेदसाधकत्वाद्द्वैतश्रुतीनामेवोपरि चेतार्थतावक्तव्या ॥ यजमानः प्रत्यगात्मा इति
श्रुतेः शिवजन्यकृतिर्भेदादिति भावः ॥ तत्त्वमस्यादिमहावाक्यैः सर्वोपि आवहारिकसत्तावलंबनः ॥
अद्वैतं तु पारमार्थिकं सकलमपि लेखकाद्यनाशापेलम्माधने ॥ गुह्यरूपिणी ॥ गुहायां स्थितं गुह्यं
परमरहस्यं आवहाद्विकहृदयपर्योगं ज्ञानमेव रूपमस्याः ॥ उक्तं च स्कांते संहितायाम् ॥ गुरुरूपं तिथं
रां गुह्यं गुह्यविज्ञानरूपिणी ॥ गुह्यभक्तजनप्रीतां गुहायां निहितां नुमह इति ॥ तथा चैकस्य ब्र
ह्मणो द्वैरूपे श्रूयते बलं आदि विविधमपि शास्त्रमुपपद्यत इति भावः ॥ गुह्योपनिषद्देवरूपमस्याः इ
ति वा ॥ तदुक्तं कौर्मे विभूतियोगवर्णनावसरे ॥ सर्वोपनिषदां देवि गुह्योपनिषदुच्यसे इति ॥ १२८
सर्वोपाधिविनिर्मुक्ता सदाशिवपतिव्रता ॥ ॥ संप्रदायेश्वरी साध्वी गुरुमंडलरूपिणी ॥ ॥ १२९
॥ ॥ ननु तर्हि शास्त्रद्वयप्रामाण्याद्वैताभेदप्रसक्तिरिति तिनाद्वैतसिद्धेरित्यत आह ॥ सर्वैः स्थूलादज्ञानकारणं
त्वच्छायातपत्वादिभिन्नपाधिभिः संबंडेरबंडे स्वधर्मैर्विशिष्टपतिः शोधितामुक्तात्मका ॥ धर्मसंबंधशून्या १२७

स्या॥ नतत्त्वधर्माणां स्वस्वं वधाभाववतिभासमानः संबंधः स्वक्रोडत तादात्म्यमिव मिथ्येवेति शास्त्रस्यस
त्पावेदकत्वरूप प्रामाण्यनिर्वाहाय सर्वेषां वेदांतानां मध्ये ते पारमार्थिके परब्रह्मणि साक्षात्परंपर
यावा तात्पर्यस्य वक्तव्यत्वाद्वेदत्रतिपादकशास्त्रस्य पंचवांगुलयामलावेदको परागशास्त्रस्येव व्याव
हावहारिकद्वैतेव प्रतिष्ठितिरिति न भेदाभेदयोः समकसत्तेति भावः॥ नन्वेवं सति त्रिपुरसुंदर्याः
शक्तिरूपत्वात्तस्याश्च पराहंतादिधर्मरूपता विशेषणानि मिथ्यात्वप्रसंगइत्यतआह॥ सदेति॥
शिव एव पतिरिति व्रतं नियमः सदा सार्वकालिको यस्याः शिवपत्नीति शिवव्रतैव सदातनं काल
त्रयाबाध्यं इति भावः॥ इतरे तु पदार्थाः कल्पितास्तेषु धर्मत्वमपि दृष्टरूपत्वाविशेषात्कल्पितमे
व शक्तौ तु धर्मत्वमात्रं कल्पितं न तु शक्तिरपि कल्पिता॥ अतएव सा ब्रह्मकोटिरिति भावः॥ स
दाशिवस्य पतिव्रतेति वा॥ ननु कथमेतदवगम्यते॥ पराहंतादिरूपाएव धर्माः कल्पिताइति॥
त्रस्तुतविनिगमनाविरहेण सर्वेषामेव धर्माणां मिथ्यात्वमेव वा सत्यत्वमेव वा स्यादित्यत आह॥ सम्यक्शि
शोम्पः प्रदीयत इति संप्रदायः॥ तत्र श्रुतिसमर्थासमर्थनक्रमा॥ न्यायैः संप्रदायेन चैतदवगम्य
तद्रूपसर्थः। यथा हि निर्धर्मके ब्रह्मणि वियदादयो धर्माः कल्पिताः वियदाद्यवच्छिन्नेपि चैतन्येपु
नः शाब्दविषयत्वरूपधर्मतादयस्तत्तदवच्छिन्नचैतन्येष्वपि पुनर्धर्मत्वादयः कल्पितास्तथा धर्मा
त्वस्यापि धर्मित्वमेव दृष्टरूपत्वान्निर्धर्मकेपि ब्रह्मणि शक्तस्यानादेः स्वधर्मधर्मिभावेनापि व

१३८ सिद्धे तत्र शिव एव धर्मी शक्तिरेव धर्म इति संप्रदायादवगंतव्यमिति भावः॥ संप्रदायसंज्ञकोमं
त्रोद्धारो विद्यो गिनी इत्यपेप्रसिद्धः॥ स च कादि विद्यायामेव स्वस्य इति तुर्यरिवसारहस्यस्योपपादि
तमस्माभिः॥ नदीश्वरीत्यर्थो वा॥ युक्तं चैतदित्याह॥ साधु ठ चितं॥ दाह काली दिशज्ञैर्वन्हिध
र्मं तायाएवलोके दर्शनात् सराहं ताशक्तौ धर्मात्वमेव वक्तुमुचितमिति भावः॥ न पुंसकमिदं
नाम तेन साधुनेनम इति प्रयोगः॥ तेन साध्वी सक्रतिदायिनी त्यनेनन पौनरुक्त्यं॥ तस्य धर्मस्य हेतुत्व
138 मिइमाह॥ ई॥ तुर्यं च रूपमेकाक्षरं कामकलासंज्ञकमिदं नाम॥ विष्णुपराभ्यम्स्य स्वरस्य पादका
रात्॥ अस्य भगिनी ई इति॥ विग्रहे एवं योगलक्षणो ङीषियस्येति चेत्यकारलोपे यष्टिशाकान्ताप्र
यमात्रात्स्यजः प्रात्यस्य हल्पोहलङ्याद्दिना लोपे हल्पसिद्धिः॥ येनमइति प्रयोगः॥ न पुनर्भ
र्यो भर्तृभावस्यैव पुंयोगः॥ पितृपुत्रीभावस्यापि पुंयोगापदेन स्वीकृतत्वात्॥ सुभद्रा वसुदेवीत्यादिति॥
नारायणीसहचरायनमः शिवायेत्यत्र नारायण्या अपि भगिनीत्वेन व्याख्यानाच्च॥ एकस्मिन्न धर्मिणि नि
त्ययोर्द्वयोर्धर्मयोः सोदरतायाएवयुक्तत्वात्॥ विष्णुसंबंधिभगिनी च विशिष्टस्य रूपार्थः॥ विष्णुरूपा
तद्भगिनी रूपा चेति यावत्॥ एकमेव ब्रह्म धर्मा धर्मीति रूपद्वयं प्रापत्॥ तत्र धर्मः पुनः पुमान् स्त्री
ति द्विधाभवत्॥ तत्र स्त्री पराशिवमहिषी तेपुमान् विष्णुः सकलजगदुपादानतां प्रापत्॥ एत राम॰
त्रयमपि मिलित्वैकमखंडं ब्रह्मेति शैवमतप्रक्रियाकुमपुरा गाथनुयामिनी रत्नत्रयपरीक्षायां दी १३८

क्रिते विस्तरेणाभिहितेत्यनुसंधेयम्। अस्याश्च कामकलायाः स्वरूपं सूक्ष्माकारेण बिंदुसर्गान्ता ह्रींङ
प्रसंदं संविद्दृश्यादिनावामके स्वरतंत्रे ईकाराद्धि स्वकत्रीयं मायात्र्यंबिकाप्रियेद्वं स्यादिनाज्ञा
नारविंदे ईकारः संगीता ह्रींच प्रसंदं संविद्दृश्यादिनावामके स्वरतंत्रे ईकाराद्धि स्वकत्रीयं माया
त्र्यंबिका प्रियेद्वं स्यादिनाज्ञानारविंदे ईकारः समनुद्दिष्टो रकपरोः अन्तापरानिमादिनावायु
पुराणे च कामकलाविलासादौ च प्रपंचितम्॥ सौंदर्यलहर्यामुखं बिंदुं कृत्वेति श्लोके स्पष्टकल्प
मुक्तं भगवत्पादैः॥ तत्स्वरूपनिष्कर्षस्तु तन्मुखादेवानुसंधेयो रहस्यनामत्वादित्याह॥ गुरवः परम
शिवादिस्वस्वगुरुपर्यंतास्तेषामेकं रूपं परात्मैव रूपनिरूपणमस्याः॥ अविच्छिन्नगुरुपारंप
र्यक्रमागतमिदं रहस्यनामगुप्तां कालमतइतिभावः॥ अनंतरोक्तं योगिनीहृदये कालीत्वकौ
पदेशेन संप्राप्तमघनीनलइति॥ १८९॥ ॥कुलोत्तीर्णाभिगाराध्या मायामधुमतीमही॥ ॥गु
णांबा गुह्यकारः ध्याकोमलांगी गुरुप्रिया॥ ॥ १९०॥ ॥रहस्यत्वमेव चतुर्भिराह॥ कुलमिति द्विपममह
मुक्तीस्तीत्यतिक्रांता॥ तेरगम्यत्वात्॥ भगोस्म विरमंडले आरोभोपास्या॥ स विनरमंडलस्य रहस्यो
पास्य ध्विकारणात्वात्॥ प्रमित्रनरस्याप्यप्रकटकरणानुकूलाशक्तिर्माया॥ देवीपुराणे तु॥ विचित्रका
र्यकरणा अचिंतितफलप्रदा॥ स्वप्नेन्द्रजालवल्लोके माया तेन प्रकीर्तिता। उक्तं॥ इदमेव च विल
रेणोक्तं वराहपुराणे॥ पृथिवीमति विष्णुवावाक्यं॥ पर्जन्यो वर्षते तत्र जलस्पर्शश्च जायते॥ दिशो

१३९ निर्जलतांयांतिसंपामायममप्रियो॥सोमोऽपक्षीयतेपक्षेपक्षेत्यापिविर्धते॥अमायांहृष्यतेने
त्र्भायेयंममहेतुदरी॥इमारम्यममममामयावुजंद्येतद्येनतिष्ठाम्यहंजले॥प्रजापतिंचरुद्रंचवरु
णोमिचहरामिच्यवयंतैः सप्तत्रिंशाङ्गिः स्रोकैर्विचित्रकार्यकर्तृत्वप्रस्तावहे दिकापामायायाः
वेतिप्रतिपादितं॥तादृशकार्यमेवचमापामदशक्यतावच्छेदकंकेभक्तितंत्रेत॥तेष्ठक्तिर्मायाज
डसामामादितिनिष्टत्रेभगवतः शक्तिरेवमायेत्युक्तं॥मधुमधंपुष्परसः क्षौद्रंवा॥स्वजनादि
समयेनहता॥महरैवाणतद्वैवेरूपधनमध्विति श्रुतेः॥यद्वाश्रादित्योवैदेवमध्विति श्रुतोवि
हितमधुमत्याख्यविद्याविशेषस्या॥अथवायोगशास्त्रेचतुर्विधायोगिनउक्तास्तेषुचतुर्थो
ऽतिक्रांतभावनइत्युच्यते॥सचचतुर्विंश्रुतस्मत्सारूपिसप्तभूमिकासुअतिक्रमणीयासंति॥ता
सुचरमाभूमिकामधुमतीत्युच्यतेतद्रूपेत्यर्थः॥तादृशभूमिकायामुत्पन्नंस्पैवज्ञानस्यतारकत्वा
त्संसारतारकेतिप्रसिद्धत्व॥तदिदंतारकंसर्वविषयंसर्वथाविषयमक्रमंचेतिविवेकजंज्ञानमि
तियोगसूत्रभाष्यादिषुस्पष्टं॥नदीविशेषरूपावा॥ईदृशार्थस्यरूपापिपृथ्वीवदितिप्रकटेमा
ह॥मही॥मह्याख्यनदीविशेषरूपावा॥देवीपुराणेतु॥महद्यापमस्थिताऽसर्वंमहीतिप्रकी
र्तितेत्युक्तं॥यत्तास्यप्रमथाद्देगंजाननस्यवांबा॥गुह्यकैर्देवविशेषैरक्षातस्यहस्यच्छेवायात्रा रामः
राख्या॥कोमलानिहकुमारार्पणानियस्याः॥गुरुः प्रियायस्याः॥गुरुपलामिन्नावा॥जग १३९

द्गुरोः शिवस्यपत्नीवा ॥ १९० ॥ स्वतंत्रासर्वतंत्रेशीदक्षिणामूर्तिरूपिणी ॥ सनकादिस
माराध्याशिवज्ञानप्रदायिनी ॥ १९१ ॥ कारकपारतंत्र्यमंतरेणैवसर्वकर्तृत्वात्स्वतंत्रा ॥ स्वतं
त्रा॰ अनित्यानंतरूपावा ॥ स्वामात्मीयानितंत्राणियस्यावा ॥ शैववैष्णवगाणपत्यादितंत्रेष्वप्य
स्याएवविभूतीनांप्रतिपादनादात्मीयत्वमितिभावः ॥ स्वआत्मीयस्याधीनःपरशिवस्तंत्रंतात
दधीनावा ॥ परस्याधीनेत्यर्थः ॥ तदुक्तंकालिकापुराणेकामरूपक्षेत्रमाहात्म्ये ॥ नित्यंवस
तितत्रापिपार्वत्यासहनर्मभिः ॥ मध्येदेवीगृहेतत्रतदधीनस्तुशंकरः ॥ ईशान्यांनाटकेशैले
शंकरस्यसदाश्रमं ॥ नित्यंवसतितत्रेशस्तदधीनातुपार्वतीति ॥ सर्वाणिचतुःषष्टिसंख्यानितंत्रा
णीष्टेसमर्थयतीति ॥ शिवस्यदक्षिणाभिमुखीमूर्तिर्ब्रह्मनारायणादेरप्यापकत्वेनप्रसिद्धा ॥
यस्यमंत्राःसंतेप्रसिद्धाः ॥ सएवरूपमस्याः ॥ सनकसनंदनादिभिः उक्तंचब्रह्मांडे । तमेवा
नादिरखिलकार्यकारणात्त्रिपुराणीनामेवहिविचिन्वंतियोगिनः सनकादयइतिशिवविषय
कंज्ञानंप्रकर्षेणाददाति ॥ शिवोज्ञानप्रदायीयस्यावा ॥ अतएववराहपुराणे ॥ त्रिमूर्तिरुद्रक्
रा ॥ एतास्तिस्त्रोपिसिध्यंतियोरुद्रंवेत्तितत्त्वतइति ॥ १९२ ॥ चित्कलानंदकलिकाप्रेमरू
पाप्रियंकरी ॥ नामपारायणप्रीतानंदिविद्यानटेश्वरी ॥ १९३ ॥ चिदेवकलासच्चिदानंदा
त्मनोब्रह्मणएकदेशइवयस्यांसा ॥ यद्वाअंतःकरणोपाधिकंचैतन्यंनिरुपाधिकायाश्चि

नरमकरे शन्द्रति॥ ममैवांशो जीवलोके जीवभूतः सनातन इति स्मृतेः॥ यच्च पुराणेपि देवीम्ह
त्तिगराने प्रकरणे॥ चित्तेषु चित्कला नाम शक्तिः सर्वशरीरिणामिति॥ एवमेवानंदस्वकलैक
देश इव पस्यां॥ शेषाद्धिभाषेतिक प्रत्ययः॥ जीवगतानंदैकदेशाहृपावा॥ स्वार्थेकः॥ एतस्से
वानंदस्य सम्यग् निभृतानि माद्यासु पजीवंतीति श्रुतेः॥ आनंदमयः कोशकोवा॥ कलिकाको
रकः कुमानितिकोशः प्रेमस्नेहो भक्तिरेवरूपं यस्याः॥ आपुद्धीनमिवरूपा मि व्यक्तिजन
के पिहृपपदस्य प्रयोगः॥ प्रियंकरोतीति प्रियंकरी॥ अआइईत्यारभ्य हः क्षाईइत्यंतानि भ
गवन्नामानि॥ अकार एकः ककारादयः पंचत्रिंशच्चेत्येवं षट्त्रिंशदक्षराणि॥ षट्त्रिंशद
क्षररूपाणि तेष्वेकैकस्य षोडशभिः स्वरैः योगे क्रमेणानावंतोमासा॥ तेन षट्सप्तस्तु त्तराणि पंच
शतानि वर्णा निभवंति॥ एतानि प्रथमाक्षराणि॥ एष्वेकैकस्य षोडशभिः स्वरैर्योगे क्रमेणानं
वंतो मासा॥ तेन षट सप्तस्युत्तराणि पंचशतानि वर्णानि भवंति॥ एतानि प्रथमाक्षराणि॥ ए
ष्वेकैकं प्रथमं कृत्वा द्वितीयवर्णस्थाने षट्त्रिंशत्क्रमेण निक्षिपेत॥ अंते च आईइति पल्लवं
योजयेत॥ ततश्च विंशति सहस्राणि सप्तशतानि षट्त्रिंशच्च नामानि भवंति॥ तदुक्तं॥ आई
पल्लवितैः परस्परयुतैर्द्वित्रिक्रमाद्यक्षरैः काद्यैः क्षांतगतैः स्वरादिभिरथ क्षांतैश्च तैः सस्व राम० १५०
रैः नामानि त्रिपुरे भवंति खलु यान्यत्यंतगोप्यानि ते तेभ्यो भैरवपत्नि विंशतिसहस्रेभ्यः परे

यो नमइति॥ देवीभागवतेपि तृतीयस्कंधे॥ अकारादिक्षकारांतैः स्वरैर्वर्णैस्तु योजितैः॥ अ
नंत[illegible]नामानि भवंति रघुनंदनेति॥ तेषां च पारायणं पंचधोक्तं॥ कादिमते॥ दिनतो
वा [illegible] क्रान्मासात्षड्विंशतादिने रित्यादिना नामानि भवंति रघुनंदनेति॥ तेषां च पारा
यणं पंचधोक्तं॥ कादिमते॥ दिनतो वा रतः पक्षान्मासात्षड्विंशतादिने रित्यादिना तदि
दं नामपारायणात्मकम्॥ सहस्रनामपाठोपि च तथा॥ योगहृदयात्पूर्वं स्येव योगिक
दं मापरस्याप्युपरि स्थितेः॥ तामोप्रीता॥ नंदिनो नंदिकेश्वरस्य विद्या तद्रूपा सित विद्या
नेटेश्वरस्य चिदंबरनटस्येयं॥ ॥२८२॥ मिथ्याजगदधिष्ठाना मुक्तिदा मुक्तिरूपि
णी॥ लास्यप्रिया लयकरी लज्जा रंभादिवंदिता॥ २८३॥ ॥ मिथ्यारूपस्य जगतो विष्ठा
नं भानाधिकरणं जगतः स्ववस्तुक्तिः॥ सूत्रात्र पापच यविवक्ष्या स्त्रीलिंगं॥ यद्वा॥ अ
धिष्ठानं व्यवधाधिष्ठानपरः ततश्च जगदधिष्ठानरूपं ब्रह्मैव चैतन्यः प्राणो यस्या इति विग्र
हः॥ यद्वा अधिष्ठानशब्दो मनस्थी यो च्युत्पत्त्यं नाद्येयपरः॥ तेन मिथ्याजगदधिष्ठानम
धिष्ठितं यस्यां इति विग्रहः॥ वस्तुतस्तु॥ जगतो ब्रह्मपरिणाममस्वीकुर्वतां मते त्रिकारणं
मते जगतः॥ सत्यत्वमेव मृद्घटयोरिव ब्रह्मजगतोरनंतभेदेन ब्रह्मणः सत्यत्वेन जगतोपि सत्यत्वावशे
भावात्॥ भेदमात्रस्य मिथ्यात्वस्वीकारेणाद्वैतश्रुतीनामखिलानां निर्वाहः॥ भेदस्य मिथ्यात्वादेव भे

२४१ घटितावाराधेयभावसंबंधोपिसिध्यैव॥ तावन्मात्रेरौवादिरोधेसर्वस्यजगतोमिथ्यात्वकल्पनं चे
रं तिना मनर्थकमेवेतिशुं भवानंदकल्पलतायाविस्तरः॥ ततस्तावन्मात्रेरौवाविरोधेसर्वस्यज
गमिथ्यात्वं तज्जगतोऽधिष्ठानं भेदघटितसंबंधेनावस्थितिर्यस्यामितिविग्रहात्स्त्रीलिंगतोपपत्ति
॥ अथपरिभाषायामंडलेचत्वारिंशन्नामनिविभज्यते॥ गौः शैवेविरतेचतुरंघ्रिजन्तुर्दृष्ट्वाबलवे
न्नुः [illegible] मेगंगामातारस्वातभावजलमहाज्ञावेः॥ अत्रनकारांभोदशाक्षरेनामानि॥ ४१॥ ॥मुक्तिं
मोक्षं ददातीतिमुक्तिदा॥ तथाचश्रीकूर्मपुराणे॥ तस्माद्धिमुक्तिमन्विच्छन्पार्वतीपरमेश्वरीं॥ आश्रये
त्सर्वभूतानामात्मभूतांशिवात्मिकामिति॥ शिवपुराणेपि॥ नामान्येमहेशस्यगृणंतस्त्वज्ञानतोपि
वा॥ तेषामपिशिवोमुक्तिंददातिकिमतः परमितिब्रह्मांडपुराणेपि येर्चयंतिपरांशक्तिं विधिनां
विधिनापिवा। नतेसंसारिणोनूनंमुक्ताएवनसंशयइतिमुक्तिरेवरूपमस्याः॥ अविद्यानिवृत्ते
र्ध्वंसरूपत्वपक्षमेमकाररूपत्वेवापरमपुरुषार्थत्वानापत्त्यानापत्यातदुपलक्षितस्वात्मानंदस्येवमो
क्षतायावक्तव्यत्वात्॥ तुक्तंचसौरसंहितायांचतुर्दशेध्याये॥ अथमुक्तेःस्वरूपंतेप्रवक्ष्यामिसमा
सतः॥ यद्ज्ञानेनपरामुक्तिः सिध्यत्यखिलदेहिनामितिसुपक्रम्यज्ञानस्यतत्रकारकहेतुतांज्ञान
नकारकं विद्धिबोधकंखलुकेवलमित्यादिनानिरस्य। कार्यत्वव्रतपानेवस्थितामविद्धमर्हतीत्या एम०
दिनामुक्तेर्ब्रह्मवरुणाकर्मसामान्याद्यात्मतामपिनिरस्यातः साक्षात्परामुक्तिः स्वात्मभूजैवकेवलमि ४१

त्यादिना सिद्धांतसंसाध्यं तस्मादात्मस्वरूपैव परा मुक्तिर्विद्यया ॥ तिरोभूताविर्भूतदेस विद्यया
प्रज्ञानेन द्वैतस्य प्रसंहारात् ॥ लास्यनर्तनं प्रियं यस्याः लयाश्रितावस्थाविशेषः दशाप्यानसमोलय
इति वचनात् ॥ तस्य करी कर्त्री ॥ या देवी सर्वभूतेषु लज्जारूपेण संस्थिता इति स्मरणाल्लज्जा ॥ हेद्ये
रवाजी जलरूपा वा ॥ रंभोर्वश्यादिभिरप्सरोभिर्वंदिता ॥ १९३ ॥ ॥ भवदावसुधावृष्टिः पापा
रण्यदवानला ॥ दौर्भाग्यतूलवातूला जराध्वांतरविप्रभा ॥ १९४ ॥ ॥ भवः संसार एव दावो वन
वह्निस्तस्य शमकत्वात्सुधावृष्टिः पीयूषवर्षमिव ॥ भवः संसार एव दावो घोररूपः ॥ दवदावौ वना
रण्यवह्नी द्रुममरः ॥ न स्यपुंस्त्वानुपुरुषतपोज्जीवनाभीपूष्पदृष्टिर्वेतिवा ॥ भवं परशिवं दहते
व हरलेध नचक्षुषे नैतादृशी दृष्टिरिति त्रिपदं नाम वा ॥ भोगमोक्षप्रदेतिपाठे वा ॥ उक्तं च रुद्रया
मले मंगलराजस्तवे ॥ यत्रास्ति भोगो न तु तत्र मोक्षो यत्रास्ति मोक्षो न तु तत्र भोग मोक्षप्रदेतिया
वत् ॥ उक्तं च रुद्रयामले मंगलराजस्तवे ॥ यत्रास्ति भोगो न तु तत्र मोक्षो यत्रास्ति मोक्षो न तु
तत्र भोगः ॥ श्रीसुंदरीसाधकपुंगवानां भोगश्च मोक्षश्च करस्थ एवेति ॥ पापान्येवारण्यानि दुःखजन
कत्वात् ॥ मेषां दवानलदूवनाशकत्वात् ॥ पापारण्यानां दवानलो यस्या नाम सेति वा ॥ तदुक्तं
ब्रह्मांडपुराणे ॥ गंगायाः पापं नाम पापारण्यदवानलः ॥ भवव्याधिहरी गंगा तस्मात्सेव्या प्रय
त्नतः इति ॥ यद्वा ॥ पापारण्यानां येदेवाः दावाग्नयो नाशनोपायमृजाउपास्मादयस्तेषामनारण्या

१४१ नलातिआदत्तेतानजीवमतीतिपावत॥ पापापहानिकर्मणि प्रथयतीसततदर्शकैश्च ह्ला
डे। कृत्स्नाखिलपापस्य ज्ञानतोऽज्ञानतोपि वा। प्रायश्चित्तं परं प्रोक्तं पराशक्तेः पदस्मृति
रिति। तत्रैव ब्रह्मायामलरुद्रे स्कंदे च श्रीगणेशदेवेन्द्र रहस्यं परमं महत्। सर्वेषामेव पापानां यौगपद्येन
विनाशनं। भक्तिश्रद्धासमायुक्तः स्नात्वा तज्जलसंस्थितः। अष्टोत्तरसहस्रं तु जपेत् पंचदशाक्ष
रीं श्रीमत्परमां शक्तिं मुच्यते सर्वकिल्बिषैः॥ इमादि दौर्भाग्यमेव तूलं कार्पासं तस्य वातूलत्वं इव
वासि वह्निरिव निरासिकेति यावत्॥ वातूलः पुंसि वात्यायामित्यमरः॥ यद्वा दौर्भाग्यं तूलं येषां
ते दौर्भाग्यतूलाः॥ दौर्भाग्यस्य तूलस्येव निरासकाधर्मविशेषाः॥ अत एव ते धर्मा एव वातू
लागौरपहृत्या॥ तेन दौर्भाग्यतूलाः वातूलायस्याः सकाशात् इति विग्रहः॥ दौर्भाग्यनिरास
काधर्मविशेषाः॥ अत एव ते धर्मा एव वातूला गौरपाहृत्या॥ तेन दौर्भाग्यतूलाः॥ दौर्भाग्य
स्यतूलस्येव निरासकाधर्मविशेषाः॥ अत एव ते धर्मा एव वातूला गौरपाहृत्या॥ तेन दौर्भाग्य
तूलाः॥ दौर्भाग्यस्य तूलस्येव निरासकाधर्मविशेषाः॥ अत एव ते धर्मा एव वातूला गौरपाहृ
त्या॥ तेन दौर्भाग्यतूलाः वातूलायस्याः सकाशात् इति विग्रहः॥ दौर्भाग्यनिरासकानि कर्मा
णि यस्याः सकाशात् भवंति यस्याः सबधी निवासेति यावत्॥ जरैवं ध्वांतमंधकारं तस्य नाश राम०
कत्वादुवेः प्रभेव॥ ॥ १९४॥ भाग्याब्धिचंद्रिका भक्ताचित्तके किद्यनाघना॥ रोगपर्वतदं ४१

मृत्युरुदाहृतः कृत्या रिका॥ ॥१८४॥ भाग्यलक्ष्मी स्याच्चैव हल्लास कान्ता चन्द्रिका मकौमुदी वा मता
नां चिन्ता स्मैव केकि नो मयूराः स्तेषां मुल्लास कः आदर्शनाद्यनामे घस्वरूपा॥ यद्वा घनपदेन
वमेघा अतेते देवी कृतानि चरित्राण्येव समस्ते चित्ते केकि घनरूपा ताः॥ जिगोरूप तेन पद्रेमचरि
त्राणि ताः कथ्यन्ते॥ मत्तो चित्त के कि घनेरामसमतादर्शना निरन्तरेस्पिर्द्धः॥ रोगाएव पर्वताः स्वच्छल
त्वान्ने षां दम्भोलिर्वज्रइव पुंल्लिङ्गस्वाय शब्दः॥ तेन रोगपर्वतदम्भोलये नमइत्येव प्रयोगो
नायात्रिकोदम्भोलसेनमइ॥ यद्वाशतकोटिः स्वरुः शबो दम्भोलिरशनिर्द्वयोस्मो त्रिपुरा
रोदम्भोलिपदस्य पुंलिङ्गबपदेन वा शनिपदेनापि स्त्रा ह्व यातस्त्री लिंगतापि स्वच्या॥ कोविधि
समुपलक्ष्येतिमो क्षधर्मी यप्रयोगा निर्वाहाय महीकाकार्यणां मार्गपद्धीनि प्रतिविधि रि
त्यत्र निपतति पुरः साह वर्णमात्र वशेन पुंल्लिंगत्वेन प्राप्तिः स्यापि विविधिपदस्य स्त्री लिंगतेति
।व्याख्यानदर्शनात्॥ एतस्मिन्पक्षे पात्रिकोदम्भोलये नमइति स्यापि प्रयोगः॥ संगच्छते॥ इत्थं पद
शक्तिसिद्धिलिङ्गभेदभिन्नान्यष्टाविंशतिर्वर्धात्रकाः॥ तेमृत्युरुदाहृत पदेनोच्यन्ते॥ दाहृपदस्य
कपरिभाषायाः ष्टाविंशतिसंख्यापरत्वात्॥ ह्येषशक्तेः काष्ठाम पिकथ्यन्ते॥ तेषां छेदकत्वात्कुं
ठारेव स्यार्थकः॥ द्वयोः कुंठारइति कोशः॥ अष्टहुनाम हारूपकालंकारः॥ ॥१८५॥ महे
श्वरी महाकालीमहामायामहाशना॥ अपराजिता चंडिका चंडमुंडासुरनिषूदनी॥ ॥१८६ द्वा॥

महतीचमेश्वरीचऽमाहेश्वरीति पूर्वं व्याख्यातं नाम॥ अनयोर्ह्रस्वदीर्घादिमत्त्वान्न पौनरु
क्त्यं॥ महती च सा काली च। उज्जयिनीपीठस्था महाकालस्य पत्नीति वा॥ महानपरिमितो
ग्रासः कवलं यस्याः॥ यस्य ब्रह्म च क्षत्रं चोभे। भवत ओदन इति श्रुतेः महत्स्वग्रासक
मेकत्वादशनं यस्याः॥ अत्र तृतीयेवर्णेलोलत्वः पूर्ववत्तत्पञ्चतीयकं नाम व्याख्यातमि
ति न पौनरुक्त्यं॥ अपगतमर्णं यस्याः साऽपर्णा॥ तदुक्तं मत्स्ये मिदं देवी सदेवे॥ ऋणा मिष्ट
मदृत्तैवत्स त्वामजपन्तो मम॥॥ शिवेकथयमपर्णेतिसंज्ञाबोधेन ब्रजसइति॥ पर्णमप्यप्र
नीयत्वेन न विद्यते यस्याः सा पर्णकृत्याद्रुति वा॥ तदुक्तं कालिकापुराणे॥ यस्माच्चंडं च मुंडं च गृ
त्व त्वमुपागता॥ चामुंडेति जनो लोके ख्याता देवी भविष्यसीति॥ वाराहपुराणेतु॥ देवी च त्रिशि
खिनाजेनाहत्त्वं समजाडयत्॥ जायमानडमाडित्येतत्स्वदैत्यस्य शुभलोचने॥ चर्ममुंडेन मे सम्य
क्कृष्टाङ्गम्पतेबन्जेवमवन्नाः॥ हरेस्तु दानवेन्द्रस्य चर्ममुंडे कृणादिवः॥ अपहृत्य वराहे देवी चा
मुंडा तेन सा भवदित्युक्तं॥ काशीमोटीतु चामुंडा चर्ममुंडा चर्चर्चिकेति कोशाच्चर्ममुंडेत्यपि दे
वीविशेषस्य नाम दृश्यते। तेन वाराहे चर्ममुंडेति सा भवदिमेव पाठः स्यात्किंतु नमीयतद्रूसम
देतत्॥॥ १९६॥ क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी॥ त्रिवर्गदात्री सुभगा त्र्यंबिका त्र्यं०
त्रिगुणात्मिका॥॥ १९७॥ क्षराक्षरनियतसंबद्धोन्य क्षराणि वर्णा निज आत्मा स्वरूपं यस्याः॥ एकोने

काक्षराकृतिरित्यर्थः॥ उक्तंच वराहपुराणे॥ एकाक्षरेति विख्याता सर्वाक्षरमयी शुभा॥ सैव विश्वे
श्वरी देवी सैव कात्यायिनी स्मृतेति पद्मा॥ क्षरः सर्वाणि भूतानि कूटस्थो ऽक्षर उच्यते। तदुभयमा
त्मस्वरूपं यस्याः॥ सदसत्क्षरमक्षरमिति महाभारते॥ विष्णुभागवते पि॥ विष्णोस्तु त्रीणि रू
पाणि पुरुषाख्यानि ये विदुः॥ प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितं॥ तृतीयं सर्वभूतस्थं
तानि ज्ञात्वा विमुच्यत इति॥ सर्वेषां लोकानामीशी ईश्वरी॥ विश्वंभरपत्नीति तथा॥ त्रयाणां
धर्मार्थकामानां वर्गः समूहः त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः॥ समोक्षकैरिति अमरः॥ तत्प्रदा
त्री वितरणपरा॥ पंचवत्सराकमाहुभगेत्युच्यते॥ कमात्रकरणेसुभगा पंचवर्षीस्यादिति
धौम्यवचनात्॥ तद्भिन्ना॥ यद्वा श्रीकाममाहात्म्यवीर्ययत्नकीर्तयो भगपदवाच्याः
शोभना यस्याः सा॥ भगमैश्वर्यमाहात्म्यज्ञानवैराग्ययोनिषु॥ यशोवीर्यप्रयत्नेच्छाश्रीधर्म
यत्नकीर्तयो भगपदवाच्याः शोभना यस्याः सा॥ भगमैश्वर्यमाहात्म्यज्ञानवैराग्ययोनि
षु॥ यशोवीर्यप्रयत्नेच्छाश्रीधर्मार्कविमुक्तिषु इति विश्वः॥ शोभनो भगः स्त्रीयोनिर्यस्याः वा॥ सो
दसंज्ञा पुरातनी॥ ऋग्यजुःसामरूपेण सर्गादौ संप्रवर्तत इति॥ पद्मपुराणेपि॥ आन्वीक्षिकी

१६६ त्रयीशेवरहडिनीतिश्च कथ्यसंज्ञिता देवीपुराणेऽपि॥ ऋग्यजुःसामभागेन सांगा वेदगताय
तः॥ त्रयीति परपठ्यते लोके तु ब्रह्मसाधिनीति। नित्यानंतरेतु॥ अकारादिः सामवेदो ऋग्वेद
स्त्वनहरादिकः॥ यजुर्वेदस्तु कादिः स्यात्तेषां संयोगतः शुचिः॥ तेन विख्यातिं शृणु त्राज्ञे प्रोक्तान्
पूर्वापरक्रमात्। विलिख्य योस्तु वैशाब्दशास्त्रानुसारतः॥ गुणा संध्या ऋग्यजुःसामतस्तेनाप
रं तथा॥ ह्रम्निसंध्या समं मुख्यादि मुख्यत्रं मुंचेर्वेकु॥ तेन त्रयीमयी विद्याकार्यकारणयोग
त इत्युक्तं॥ अत्र श्रुतिशब्देन वाग्भवं बीजमुच्यते॥ तेन तद्रूपेण धीर्वा॥ त्रिवर्गो धर्मकामार्थैः
तस्य निलयाः स्थानं यस्याः॥ त्रिपुरभूत्त्वादिकालेषु कारो कारमकारेषु वा स्थाः स्थितिर्यस्याः॥ त्रि
पु लोकादिषु मे देन तिष्ठतीति वा त्रिस्था॥ तदुक्तं मार्कंडेयपुराणे॥ त्रयो लोकास्त्रयो देवास्त्रै
विद्यं पावकत्रयं॥ त्रीणि ज्योतींषि वर्गाश्च त्रयो धर्मादयस्तथा॥ त्रयो गुणाः त्रयः शब्दास्त्रयो
दोषास्तथाश्रमाः॥ त्रयः कालास्तथावस्थाः पितरोऽहर्निशादयः॥ मात्रात्रयं चते रूपं त्रि
स्थे देवि सरस्वतीति॥ अंतर्दशारचक्राभिमानिनी देवता त्रिपुरमालिनी॥ अथ परिभाषामंड
लेष्ठ त्रिंशन्नामानि विभजते॥ चतुरर्धभवदेवो। वदनविभेदविभागमार्गेण। गोणानंतरंगमतिः
खलु शुंभो वीरं च रेत्रं अङ्घ्रिः॥३०॥ ॥ निर्गता आमया रोगा यया॥ सर्वालंबनं नस्यालंबा निरणयोगा नाम०
निरालंबा॥ तथा तेऽनवस्थापन्नः॥ सा च मूलह्रूयकरी तस्या अनालंबत्वमेव साधयति १६६

स्वात्मन्येवारामः क्रीडनं यस्याः॥ स्वात्मानमेव द्वेधा विभज्यात्मैव क्रीडमानेति यावत्॥ तथा
च माध्यंदिना अधीयते। स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत् स हैतावानास यथा
स्त्रीपुमांसौ संपरिष्वक्तौ स इममेवात्मानं द्वेधापातयत्ततः पतिश्च पत्नी चाभवतामिति
। स्वात्मन्येवारामः कृत्रिमवनरूपं विचित्रं जगद्यस्या इति वा॥ जगन्निर्माणसंहारकालयोः
स्वात्ममात्रावशेषात्॥ उक्तं च वायुपुराणे॥ एकस्तु प्रभुशक्त्या वै बहुधा भवतीश्वरः॥
भूत्वा यस्माच्च बहुधा भवत्येकः पुनस्तु सः इति॥ स्वमात्मीयजगद्वा आत्मा ब्रह्म चक्रे नेयोगा
मः क्रीडनं विहरणं हृन्तितं यस्याः इति वा॥ तदुक्तं मार्कंडेयपुराणे॥ त्वमक्षरं परं देवि यत्र सर्वं
प्रतिष्ठितं॥ अक्षरं ब्रह्म परमं जगच्चैतत्क्षरात्मकं॥ दारुण्यवस्थितो वह्निर्भौमाश्च परमाण
वः॥ तथा त्वयि स्थितं ब्रह्म जगच्चेदमशेषतः इति॥ सुधायाः सहस्रारकर्णिकाचंद्रगताया स्रु
तिः स्रवणं यया कुंडलिन्या सा॥ सुधायाः स्रुतिरेव वा॥ डाकिन्यादिमंडलान्याप्याययंती सा
क्रियैव च भगवती सुधीः॥ यद्वा प्रसिद्धं चंद्रमंडलाद्बहिरप्यादित्यरश्मिजनिका पीयूषवृष्टिरे
षैवेति॥ दशभिः पंचभिश्चैव सुधामृतपरिप्लवैः॥ ह्रासपक्षे तदा पीता जायंते पीवराः सुराः
तत्त्वं वै शांभवी मायेति वायुपुराणात्॥ ज्ञानार्णवे शक्तिबीजसाधने त्वमसी सुधाधारासाधने त्व
वमी सुधाधाराभिर्वर्षंतीं विषहारिणीमिति ध्यानमुक्तं तादृशरूपवतीति वा॥ ॥२२४॥ ॥सं

१६५ संसारपंकनिर्मग्नसमुद्धरणपंडिता ॥ ॥ यज्ञप्रिया यज्ञकर्त्री यजमानस्वरूपिणी ॥ ॥ २१५ ॥ ॥ संसारल
क्षणे कर्दमे निःशेषेण मग्नानां सम्यगुद्धरणे पंडिता कुशला ॥ अतएवोक्तं कौर्मे ॥ ये मनागपि शर्वाणीं
स्मरंति शरणार्थिनः ॥ दुस्तरापारसंसारसागरे न पतंति ते इति ॥ यज्ञाः प्रिया यस्याः ॥ यज्ञो वै वि
165 ष्णुरिति श्रुतेस्तत्प्रियेति वा ॥ यज्ञस्य कर्त्री ॥ यजमानात्मको दीक्षितमूर्तिः परशिवस्तस्य पत्नी दीक्षा
ख्या संतानस्य माता ॥ तदुक्तं लैंगे ॥ यजमानात्मको देवो महादेवो बुधैः प्रभुः ॥ उग्र इत्युच्यते सद्भिरीशा
नश्चेति चापरैः ॥ उग्राह्वयस्य देवस्य यजमानात्मनः प्रभोः ॥ दीक्षा पत्नी बुधैरुक्ता संतानाख्यस्तु
ता सुत इति ॥ वायुपुराणेपि ॥ यजमानस्तु सप्तमीया दीक्षितैः ब्राह्मणैः सह ॥ दीक्षा पत्नी स्मृता तस्य
संतानः पुत्र उच्यते इति ॥ अष्टसु शिवमूर्तिषु चरमा यजमानमूर्तिरिति कश्चिद्रूपि ते क्वचिदात्मेति
तदुभयमप्याह ॥ यजमानस्य स्वरूपं यजमानसो ॥ दीक्षितात्मानौ तौ रूपे अस्या इति ॥ उक्तं च लैंगे
॥ पंचभूतानि चंद्रार्कावात्मेति मुनिपुंगवाः ॥ मूर्तीरष्टौ शिवस्याहुर्देवदेवस्य धीमतः ॥ आत्मा त
स्याष्टमी मूर्तिर्यजमानाह्वया परेति ॥ ॥ २१५ धर्माधारा धनाध्यक्षा धनधान्यविवर्धिनी ॥ विप्रप्रिया वि
प्ररूपा विश्वभ्रमणकारिणी ॥ २१६ ॥ ॥ तत्तद्देशेषु शिष्टपरंपरया प्राप्ता वेदाविरुद्धाः क्रिया धर्मपद
वाच्याः ॥ तथा च तंत्रवार्त्तिके ॥ देशे देशे य आचारः पारंपर्यक्रमागतः ॥ आम्नायैरविरुद्धश्च राम०
स धर्मः परिकीर्तितः ॥ तेषामासमंतात्सर्वदेशेषु धारा ॥ निरर्गलप्रवाहः ॥ धर्म आधारो यस्या वा ॥ १६५

धर्मनिष्ठत्वात्तु पचारात् धर्मे सर्वं प्रतिष्ठितमिति श्रुतेः॥ धर्मं आधारो यस्या वा॥ धर्मस्य सर्वाधारत्वं प
ठितमिति यावत्॥ धनस्याध्यक्षा स्वामिनी॥ उपास्योपासकयोरभेदात्कुबेररूपा वा॥ धनानि
धामानि च विशिष्टपदवर्धयति॥ वेदशास्त्रादिविद्यावतो ब्राह्मणा विप्राः॥ तदुक्तं ब्रह्मवैवर्ते॥ ज
न्मना ब्राह्मणो ज्ञेयः संस्काराद्द्विज उच्यते॥ विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यत इति॥ ते
प्रिया आभीष्टा यस्याः॥ अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुरिति भगवद्वचनेन विप्रेषु
केषुचित्कन्यायेन प्रीतिरिति ध्येयः॥ उक्तवचनादेव तादृशा विप्राः रूपं स्वरूपं यस्याः॥ अत एव श्रूय
ते॥ यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्तीति तपराशरस्मृतिरपि॥ ब्राह्मणा जंगमं
तीर्थं त्रिषु लोकेषु विश्रुतं॥ येषां वाक्योदकेनैव शुध्यन्ति मलिना जना इति॥ अथवा॥ विप्रा
न् रूपयति पूर्ववत्स्ववतः करोत्याप्याययतीति वा॥ यस्या मंत्रजपादिना ब्राह्मणानामाप्यायनं भ
वतीति यावत्॥ तदुक्तमापस्तंबस्मृतौ॥ अपमानात्तपोवृद्धिः सन्मानात्तपसः क्षयः॥ अर्चि
तः पूजितो विप्रो दुग्धा गौरिव सीदतीति॥ आप्याय्यते यथा हस्तत्रयोरमृतसंभवैः॥ एवं जपैस्त्व
होमैस्त्व पुनराप्याय्यते द्विज इति॥ विश्वेषां ब्रह्मांडानां भ्रमणं सृष्टिस्थितिनाशरूपं यान्तःया
न्तं कारयति॥ विश्वशब्दो विष्णुपरो वा॥ विश्वं विष्णुर्वषट्कार इत्युक्तेः॥ तस्य भ्रमणकारिणी॥ स्म
र्यते तावत्कालिकापुराणेऽयमितिहासः॥ विष्णुरेकदा ममा गिरागरुडारूढो गच्छन्नत्र

९९ धः कामरूपदेशे नीलाचलवासिनी कामाख्या देवी अस्याः सन्निधिमाप्य नाहं त्यजामि मत्कृपया मेवगः
तः । ततस्तत्कोपवशात्समस्तं नृपमध्ये पतितस्तत्रैव च मन्त्रासीत् ॥ ततः कियता कालेन गवे
षयंती लक्ष्मीर्नारदमुखाद्विमतं तस्माकर्ण्य तस्याः कामाख्यां प्रसाद्य विष्णुं सावधानी
कृतस्य मरणादमोचयत् ॥ ततः सोऽपि नारायणो वैकुण्ठलोकमध्यवात्सीदिति ॥ ॥ ११६
विष्णुमाया ॥ चराचरसंहर्त्रीत्यर्थः ॥ तथा च काठकश्रुतिः ॥ यस्य च ब्रह्म च क्षत्रं चोभे
भवत ओदनः ॥ मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स इति ॥ अत्र सम्मोहपसेचनतो
मृत्यान्त संहार्य चराचरजनीति शिवाश्येन ब्रह्मक्षत्रमन्ना चराचरस्य सा विष्णुमाया
वैष्णवी विष्णुरूपिणी ॥ ॥ अयोनिर्योनिनिलया कूटस्था कुलरूपिणी ॥ ॥ ११७ ॥ ॥ विष्णु
चराचरं ग्रसतीति विष्णुमाया ॥ चराचरसंहर्त्रीत्यर्थः ॥ तथा च काठकेश्रुपते ॥ यस्य च ब्र
च क्षत्रं चोभे भवत ओदनः ॥ मृत्युर्यस्योपसेचनमित्यादि ॥ विष्णुमा ३ सवालाऌदारक्रो
विष्णुमाया ॥ वितिज्ञानमेव विष्णुः तुल्यानुपुरव ... तेन तुल्येति वा ॥ विष्णोरियं वैष्
णवी ॥ तथा च देवीपुराणे ॥ शंखचक्रगदाधत्ते विष्णुमाता तथारिहा ॥ विष्णुरूपा च वी देवी वै
ष्णवी तेन गीयत इति ॥ अत्र च तत्सोऽमुष्मिन्पयः स्थिताः ॥ तथा हि तस्य विष्णुरिति विदेशान हं राम ०
नीत्यर्थः ॥ विष्णुरूपेण स्यन्द भिन्नेन स्थी तेन न प्रथमवस्तु संत्यागता र्थता ॥ तदेनाह ॥ विष्णु ९९

166

रेव सहस्रमस्य ॥ तदुक्तं ललितोपाख्याने ब्रह्माण्डपुराणे सर्वमेतमेव पौरुषं रूपं गोपिकाज
काज नमोहनमिति देवीवचनात् ॥ कूर्मपुराणेपि हिमवत्कृतदेवीस्तवे ॥ सहस्रमूर्धानम
नन्तशक्तिं सहस्रबाहुं पुरुषं पुराणं ॥ शयानमब्धौ ललितेतवैवनारायणाख्यं प्रणतो
स्मि रूपमिति ॥ कोमण्डवमेकरूपं कुर्वन्ति शिवेन विष्णुरूपे दर्शिते। किमेतद्गरनरूपं तदेवी
रेविष्णुनेत्युक्तं ॥ काचसा भवानी वा स्वमस्य शरीरमानावबच्छिनत्ति ॥ तदृष्ट्वेन शिवेन सहस्रह
पद्मभावे निर्वर्त्यपेन्नकं ॥ मममायापरमामायापुरुषं तिच्छिपुराणमिकायोअनेमुनिभिः शक्ति
र्जगद्योनिः सनातनी ॥ संएवमायापाविष्णुमक्तिं तस्माहिष्याः पद्मपुराणेपाद्यमपाद्मपार्वती म
किं वशीयित्वोक्तं ॥ एवं देव्यात्म आत्मेन रूपेणाव जनार्दनः ॥ रूपमोरेकार्यत्वादेक एव ह्नि
धार्विनदृति ॥ इह नरा शास्त्रनानुपि ॥ दुर्गाकामायपनीचैवयजन्वाद्दवतामपि ॥ चेतसा
स्वप्रसन्नेन विष्णुलोकमवाप्नुयादिति ॥ पद्मपुराणेपि ॥ चेद्विकांपी स्वपये घट्टपुरे हृदेव नरस
न च ॥ सोपरौनस पानेन विष्णुनासहमोदते इति ॥ वामनपुराणेपि ॥ पौर्णमास्यां तु योमा
घे पूजयेद्धितिविच्छिवं ॥ योनि इंद्र निषद्धे कारीति श्रुते हेइद्र नवो पवेशना यमयास्त्री
नंक्तृतमिसमर्थीत ॥ तेनमुख्यनरहिताः पीठे त्रैसर्थिं ॥ अस्य विष्णो मौनिर्जनिकासाते

१६१ तिवानि जीयन्ते जगद्भक्षामिति निलयो योनिश्चासौ निलयश्चापो योनिः शब्दः प्रकृतिपरः क
र्तारमीशं पुरुषं ब्रह्मयोनिमिति श्रुतौ प्रयोगात् ॥ कर्तारं क्रियाशक्तिमंतमीशं नियंतारं पुरु
षपरमं च ब्रह्मशरीरी यो निःप्रकृतिं ध्यानेन पश्यन्तीति आख्यानात् ॥ योनिश्च हि गीयत इति
ब्रह्मसूत्रे च ॥ यद्वा ॥ यो योनिं योनिमधितिष्ठत्येक इति श्रुतौ । मायापरत्वेनापि योनिय
दस्य मानदर्शनात् । योनिर्मायैव निलयः परिच्छेदिकापरा इति ॥ योनीनां जगत्कारणानां ब्र
ह्मादीनां निलयो यस्यामिति वा ॥ योनिश्चासौ चक्रमेव निलयो यस्या बिंदुरूपापरे व्याइ
ति वा ॥ अनन्तरवाथर्वणे शौनकशाखायामाम्नायते ॥ तस्मिन् हिरण्मये कोशे त्र्यरे त्रिप्रतिष्ठिते
॥ तस्मिन्यद्यक्षमात्मन्वत्तद्वै ब्रह्मविदो विदुरिति अस्यार्थः पूर्वमष्टाचक्रा नवद्वारा देवानां पू
रयोध्या ॥ तस्यां हिरण्मयः कोशः स्वर्गो ज्योतिषावृत इति श्रुतेः ॥ अनयोरैक्यचोरर्थः ॥ देवा
नामप्ययोध्या अस्या अष्टाकुंडलिनाख्यः नगरी श्रीचक्रमिति पर्यायः ॥ चक्रं पुरं च सदनमगारं च
गुहा स्त्रियामिति शंकराचार्यप्रणीतविश्वाख्यकोशात् ॥ इयं श्रुत्यैवास्याऽयोध्यानगरीत्व राम०
मरूपी नाम योध्यादुर्मतं तद्देवानामपीमतपर्यः ॥ साकीदृशी ॥ अष्टाचक्रा ॥ अष्टौ चक्राणि त्र्य १६१
स्रारं बहिर्दशारमंतर्दशारं अष्टदलं षोडशदलं पद्ममित्र यंभूपुरं त्रयं चेति यस्यां सा ॥ नवसं

167

ख्यानिद्रारात्रिर्योनिद्राख्यत्रिकोणानियम्यासा। पंचशक्तिचतुर्वह्निसंयोगाच्चक्रसंभवइ
ति निशाहृदये॥ साभिमुखाग्रत्रिकोणां शक्तिः पराङ्मुखाग्रत्रिकोणं वह्निरिति मंत्रशा
स्त्रीयापरिभाषा॥ तस्यामध्ये आद्यां हिरण्मयपरेजोमयःकोशो निधानं त्रिकोणरूपम
एवस्वर्गः सुखरूपत्वात्॥ तेस्त्रिरीयाणां स्वर्गो लोक इति परंब्रह्मदाप्यमेवावशिः॥ तस्मि
न्हिरण्यये कूटमादिसप्तम्यंतपंचकं समानाधिकरणसप्तम्यौ त्रिकोणे यदस्ति विंदुरूपं चक्रांत
स्मिन्नरूपपूर्णमस्ति तं ब्रह्मविद आत्मनीवविदुः॥ आत्माभेदेनवाचिद्भेदेनापि ब्रह्मम
न्यंत इत्यर्थः॥ कूटयति छछलयति परमात्मानमानंदादिकमाच्छाद्य संसारे पातयतीति कूटम
ज्ञानं तत्स्थकूतयोतत्रतिष्ठति। कूटस्थमचलंध्रुवमिति श्रुतेः॥ कूटस्थज्ञानस्यच्छोहि
तिर्यस्यांवा॥ कूटोगिरिशृंगंतद्वन्निश्चित्ययतपातिष्ठति। कूटस्थमचलंध्रुवमिति श्रुतेः॥ कूट
स्याज्ञानस्यच्छोस्थितिर्यस्यांवा॥ कूटोगिरिशृंगंतद्वन्निश्चित्ययतयातिष्ठतिवा॥ अथयस्कारैः प्र
हाराधिकरणत्वेनभूमौनिखातोलोहविशेषः कूटस्तद्वन्निर्विकारावा॥ कूटानां विघ्नस
मूहानां स्थितिर्यस्यांवा॥ वाग्भवादिकूटत्रयंयत्रतिष्ठतिवा॥ कूटंपुरद्वारं श्रीचक्रांतर्गतत्रिकोणं
तत्रतिष्ठतिवा॥ कूटंयंत्रेऽनृतेराशौनिश्चलेलोहमुद्गरे॥ मायाद्रिशृंगयोस्तुच्छेसीराव
यवहेमयोः॥ पुरद्वारेचशृंगेसंतीतिविश्वः॥ कुलकौलमार्गबाह्याव्रजावंशश्चाचारोवा

१६८

168

तद्रूपिणी॥ ॥९१७॥ ॥ वीरगोष्ठीप्रिया वीरा नैष्कर्म्या नादरूपिणी॥ विज्ञानकलना कल्या विद
ग्धा बैंदवासना॥ ॥९१८॥ ॥ वीराणां गोष्ठी सभा प्रिया यस्याः॥ स्वयमपि वीर्यवत्त्वाद्वीरा॥ नि
र्गतानि कर्माणि यस्मात्स निष्कर्मा॥ तस्य भावो नैष्कर्म्यं तद्वती नैष्कर्म्या अर्शआदित्वान्मत
्वर्थीयोऽच्प्रत्ययः॥ कर्मलेपाभाववतीत्यर्थः॥ लिप्यते न स पापेनेति स्मृतेः॥ योगसूत्रम
पि॥ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर इति॥ इति भास्कररायकृते सौ
भाग्यभास्करे नवमेन शतेनाम्रहदामोबोधिनी कला॥ ॥ इति श्रीललितासहस्रना
मभाष्ये नवमं शतकं नाम दशमी कला॥ ९००॥ ॥ श्रीगुरुभ्यो नमः॥ ॥ नादः प्रणव (९००)
शिरःस्थितस्तद्रूपा॥ तदुक्तं मनिसूक्तैः॥ आनंदलक्षणमनाहतनाम्नि देशे नादात्मना प
रिणतं तव रूपमीशे॥ प्रत्यङ्मुखेन मनसा परिचीयमानं शंसंति नेत्रसलिलैः पुलकै
श्च धन्या इति॥ नादरूपमस्या वा॥ तदुक्तं स्वच्छंदतंत्रे॥ रोधिन्यामर्धयुक्तं ते नादस्तस्योर्ध्व
संस्थितस्तद्भासादिना॥ तस्योत्संगगतामूर्ध्वं नादरूपमस्या वा॥ तदुक्तं स्वच्छंदतंत्रे॥ रोधिन्या
संस्थितस्तद्भासादिना॥ तस्योत्संगगतामूर्ध्वगामिनीं परमां शिवां॥
र्धयुक्तं ते नादस्तस्योर्ध्वसंस्थितस्तद्भासादिना॥ तस्योत्संगगतामूर्ध्वगामिनीं परमां शिवां॥ कलयितुमर्हा क राम॰
ध्यायेदिति तेन॥ विज्ञानस्य ब्रह्मसाक्षात्कारस्य कलना स्वात्मसाक्षात्कारः॥ कलयितुमर्हा क
ल्या॥ कर्मसर्जे प्रभाते च कल्यो नीरोगदक्षयोः॥ कल्या १६८
रूपः कालस्तद्रूपा कादंबर्यादिरूपा वा॥ कल्यसर्जे प्रभाते च कल्यो नीरोगदक्षयोः॥

णा वाचीस्या कार्तवीर्यामपि स्मृतेति विश्वः॥ विदग्धा चातुर्यशीला॥ मुखे रूपनिभागे हृत्तसंनिवेशो बैंदवं
तदासनं यस्याः॥ उक्तं च स्वच्छंदतंत्रे॥ डाकिनीमंडलादूर्ध्वे बिंदुरूपं तु वर्तुलमित्यादिना तत्र पद्मं शिवं
चं वर्णापि तु तत्सवामभागे समासीनं ध्यायेत्तीतामनोन्मनीत्यादिना॥ बिंदुसंबंधि वक्रे सर्वानंदमयाख्य
मेवासनं यस्या वा॥ बिंदूनां समूहो बैंदवं॥ तदेवासनं तदभिधेयार्थानानामाधारो ऽभिधायको य
स्या इति वा॥ तथा च ज्ञानार्णवतंत्रे॥ बिंदुस्थं सर्वज्ञामि बीजरूपं वरानने॥ हकारं बिंदुरूपेण
ब्रह्माणं विद्धि पार्वति॥ सकारं बिंदुसर्गाभ्यां हरिश्चाहं हरेश्वरी॥ अविनाभावसंबंधो लोके हरिहरावि
ति॥ इत्यादिना वामादीनामिच्छादीनां भूरादीनां जाग्रदादीनां पंचयंत्रयं बिंदुरूपमेवोक्तोपसंहरति
॥ एवं बिंदुत्रये योगात्त्रिपुरा नामरूपिणीति॥ ॥ ९१८॥ ॥ तत्त्वाधिका तत्त्वमयी तत्त्वमर्थस्वरूपि
णी॥ सामगानप्रिया सोम्या सदाशिवकुटुंबिनी॥ ॥ ९१९॥॥ तत्त्वानि प्रलयपर्यंतस्थायि वस्तू
नि बुद्धिशास्त्रसंख्यामेव॥ घटादीनां तत्त्वपदवाच्यताभावात्॥ उक्तं चाभियुक्तैः॥ आप्रलयं यत्तिष्ठति
सर्वेषां भोगदायि भूतानां॥ तत्तत्त्वमिति प्रोक्तं न शरीरघटादि तत्त्वमत इति॥ तेभ्यो ऽधिका तत्त्वाशोप
व वस्थानात्॥ तत्त्वमयी तत्त्वप्रचुरा॥ यद्वा तत्त्वं शिवतत्त्वं तदधिका तन्मयी चेति नामद्वयार्थः॥ सं
प्रज्ञातासंप्रज्ञातसमाधिद्वयरूपेति यावत्॥ तदुक्तं ज्ञानार्णवे॥ स्वयं प्रज्ञातसंज्ञस्तु शिवाधि
क्येन जायते॥ असंप्रज्ञातनामा तु शिवतत्त्वेन वै भवेत्॥ तल्लक्षणे ऽपि तत्रैव॥ स्वयं प्रज्ञात

१६९ मेदस्तुतीव्रतीव्रतरो भवेत्॥ असंप्रज्ञातभेदस्तु मंदमंदतरस्तथा॥ हास्यरोदनरोमांचकंपस्वेदादि
लक्षणः॥ तीव्रतीव्रतरो देविसमाधिरुपलक्षितः॥ निमेषवर्जितनेत्रेवपुस्तंभलक्षणां स्थितं। मं
दमंदतरो देविसमाधिरुपलक्षितइति॥ इदं च द्वयं तेजो विशेषेण नोच्चारणेन भवति॥ तच्चे
नः स्वनाथमुखादवगंतव्यं॥ अथवा आत्मतत्त्वविद्यातत्त्वशिवतत्त्वं चेति त्रिविधतत्त्वमयी॥ तत्स
मष्टिरूपसर्वतत्त्वरूपत्वात्त्रिविधतत्त्वाधिकावेसर्थः॥ चतुर्विधतत्त्वस्वरूपमुक्तं रहस्ये॥ मायां
तमात्मतत्त्वविद्यातत्त्वंसदाशिवांतं स्यात्॥ शक्तिशिवौ शिवतत्त्वं तुरीयतत्त्वं समष्टिरेतेषामि
ति॥ सत्तत्त्वं चित्तत्त्वमानंदतत्त्वं चेति त्रयाणां स्वरूपं॥ सच्चिदानंदाद्भ्रमणोज्जातेषु शिवादिक्षित्यं
तेषु शिवशक्त्योरानंदांशेनावृतः॥ सदाशिवेश्वरशुद्धविद्यानां चिदंशेनावृतः॥ मायादिक्षित्यं
तानां तु सदंशमात्रमनावृतं॥ सच्चिदानामुत्तरोत्तरावरणाभावस्य पूर्वपूर्वावरणाभावव्याप्यत्व
नियमाच्छिवतत्त्वेत्रयमप्यनावृतं॥ विद्यातत्त्वे सच्चिदंशावनावृतौ॥ आनंदांशे तस्यमावरणं
॥ आत्मतत्त्वे तु चिदानंदांशौ समप्यगावृतौ निष्टतः॥ आत्मशब्दो प्यात्मलाभइत्यादिप्रयोगे
षुसत्त्वं मात्रपरत्वेन प्रसिद्धः॥ विद्याशब्दो ज्ञानरूपचित्परः॥ शिवशब्दो मोक्षरूपानंदे प्रसिद्ध इ राम॰
ति॥ तेन शब्दत्रयेणैव सच्चिदानंदांशावृत्तलाभइति तत्त्वत्रयरहस्यं॥ महावाक्यस्थयोस्तत्पदयोरर्थौ १६९
शिवजीवौ स्वरूपमस्याः॥ सामगानप्रियं पदस्याः॥ सामगाः छंदोगाः अनेनवृत्ता प्यवप्रियायस्याइ

169

निवा॥ सोममर्हतीति यज्ञ इति सूत्रेण यत्प्रत्यये सोमयागा हि सोम्या॥ तन्मया सा हितः सोमो वयं वो
स्याद्रसर्थे मयवे चेति सूत्रेण वा यत्प्रत्ययः॥ अथवा॥ सोमः कर्पूरचंद्रयोः॥ सोम इवाल्हादार्थे प्रत्र
॥ महाशिवस्य कुटुंबिनी भार्या॥ वृषामलाम्बुभृद्विद्याम्भोरुहाद्दिरूपे स सर्पः॥ ॥२१९॥ ॥ सव्यापसव्य
मार्गस्था सर्वापद्विनिवारिणी॥ स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता॥ २२०॥ ॥ सव्यश्चापसव्य
श्च मार्गश्च सव्यापसव्यमार्गाः॥ तेषु स्थिता अधिकृता वितरणपालनाधिकारादिदान क्रमेतिपाव
त॥ तेषां त्रयाणां स्था स्थितिर्यस्यामिति वा॥ संति हि सवितृमंडलस्योत्तर दक्षिणमध्यमार्गभेदेन
नत्रयो मार्गाः॥ अश्विन्यादिभिस्त्रिभिस्त्रिभिर्नक्षत्रैरेकैकाव यीता हि श्रीभिर्मित्रभिर्वीथीभिरेकैको
मार्गः॥ तदेतद्विष्णुपुराणोक्तं वायवीयपुराणे॥ अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता॥ रोहिण्या
र्द्रा मृगशिरो गजवीथ्यभिधीयते॥ पुष्याश्लेषा तथादित्या वीथी चैरावती स्मृता॥ एतास्तु वीथयस्ति
स्र उत्तरो मार्ग उच्यते॥ तथा द्वे चापि फल्गुन्यौ मघा चैवार्षभी मता॥ हस्तश्चित्रा तथा स्वाती गोवीथीति
तु शब्दिता॥ ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता॥ एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्य
ते॥ मूलाषाढोत्तराषाढा अजवीथ्यभिशब्दिता॥ श्रवणं च धनिष्ठा च मार्गी शतभिषक् तथा॥ वैश्वान
री भाद्रपदे रेवती चैव कीर्तिता॥ एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यत इति॥ याम्या भरणी॥ आदि

१७० त्या अदितिर्देवता पुनर्वसुः मार्गो मृगवीथी ॥ सप्तमं मतं ॥ अत्र वामं शरीरं सव्यं स्यादपसव्यं तु दक्षि
णमिति कोशात्प्रकृते सव्यशब्देन नागवीथी गजवीथ्यैरावतवीथ्यात्मक उत्तरो मार्गो विवक्ष्यते ॥ अप
सव्यशब्देन त्वजवीथी मृगवीथी वैश्वानरवीथ्यात्मको दक्षिणो मार्गः ॥ मार्गशब्देन सामान्यवाचिने
वक्ष्यते ॥ अपसव्यशब्देन त्वजवीथी जरद्गववीथ्यात्मको मध्यमो मार्गो लक्ष्यते ॥ यद्वा उत्तरमार्गो मृ
गशीर्षसंबंधित्वेन मृगस्यायं मार्ग इति व्युत्पत्त्या मार्गपदेनोच्यते ॥ मध्यमस्तु सव्यपदेन । दक्षिणमा
र्गस्त्वस्थानीयत्वात् ॥ अपसव्यस्तु पृष्ठस्थित एव ॥ यद्वा सव्यं दक्षिणवामयोरिति कोशाद्दक्षि
णमध्यमार्गाविव सव्यापसव्यपदेनोच्येते ॥ उत्तरस्तु मार्गपदेनेति त्रयाणां मार्गाणां वाममतं सव्यक्रमे
ण निर्देशः संपद्यते ॥ अथवा दक्षिणमार्ग एव मृगवीथीसंबंधित्वाद्व्युत्पत्त्या मार्गपदेनोच्यते ॥
मध्यमस्त्वपसव्यमतेन । उत्तरो मार्गोऽपि पृष्ठपादक्षिणस्थानीयत्वात् ॥ सव्यपदेनोक्तः ॥ ॥ ॥ ॥

170

राम०
१७०

रश्चेतिदक्षिणार्धस्य कर्मणापि निर्देशः संपनीपघृत इमे का व्याख्या॥ एवं वा॥ सव्यो देवयानोर्चिरादिमार्गो निवृत्तिपरैः
प्राप्यः॥ अपसव्यः पितृयाणो धूम्रादिमार्गः प्रवृत्तिपरैः प्राप्यः॥ मार्गस्थ शब्दो मार्गेषु स्थास्थितिर्यस्मादिति व्युत्पत्त्या
ध्रुवावस्थितिस्था॥ लिविष्णुलोकपरः॥ आदित्यादिग्रहाणां स्वस्वमार्गे स्थापनस्य ध्रुवाधीनत्वात्॥ ईदृशमार्गत्रयप
ल्पेत्यर्थः॥ एतद्दिक्तत्रस्तु विष्णुपुराणे द्वितीयेंशे॥ उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणं॥ पितृयानः स वै
पंथा वैश्वानरस्य बाह्य इह॥ तत्रासते महात्मानो ऋषयो ह्यग्निहोत्रिणः॥ भूतारंभकृतं ब्रह्म शंसंतो ऋत्विगुद्य
ताः॥ प्रारभंते तु ये लोकास्तेषां पंथाः स दक्षिणः॥ चलितं ते पुनर्ब्रह्म स्थापयंति युगे युगे॥ संतत्या तपसा चैव
मर्यादाभिः श्रुतेन च॥ जायमानास्तु पूर्वे च पश्चिमानां गृहेषु वै॥ पश्चिमाश्चैव पूर्वेषां जायंते निधनेष्वि
ह॥ एवमावर्तमानास्ते तिष्ठंति नियतव्रताः॥ सवितुर्दक्षिणं मार्गं श्रिता ह्याचंद्रतारकमिति॥ लोकालोकप
र्वतस्योत्तरशृंगमगस्त्यस्य स्थानं॥ तदुक्तं मत्स्यपुराणे॥ लोकपालाः स्थिता ह्येते लोकालोके चतुर्दिशं॥ तस्योत्तरशृंग
त्तस्य शृंगं देवर्षिहजितमिति॥ अजवीथ्या॥ मूलादिनक्षत्रत्रयस्य वैश्वानरपथात्। चरमनक्षत्रत्रयात्॥ भूतारंब्र
ह्मकृतं ब्रह्म॥ प्रवृत्तिमार्गबोधकं कर्मकांडात्मकं वेदभागं॥ जायमाना इति॥ मृताश्च पितृकुल एव पुनः पुनर्जा
यमाना इति समुदायार्थः॥ तथा तत्रैव॥ नागवीथ्युत्तरं यच्च सप्तर्षिभ्यश्च दक्षिणं। उत्तरः सवितुः पंथा देवयान
स्तु स स्मृतः॥ तत्र ते वशिनः सिद्धा विमला ब्रह्मचारिणः॥ संततिं ये जुगुप्संति तस्मान्मृत्युर्जितस्तु तैः॥ अष्टाशीति
सहस्राणि मुनीनामूर्ध्वरेतसां॥ उदक्पंथानमर्यम्णः स्थिताना भूतसंप्लवात्॥ ते संप्रयोगाल्लोभस्य मैथुनस्य
च वर्जनात्॥ इच्छाद्वेषाप्रवृत्त्या च भूतारंभविवर्जनात्॥ पुनश्च कामासंयोगाच्छब्दादेर्दोषदर्शनात्॥ इ

१७। सर्वकारिरौः श्रुभ्याशिमृतत्वं हि भेजिरे ॥ आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते ॥ त्रैलोक्यस्थितिकालो
ऽयमपुनर्मार उच्यत इति ॥ नागवीथ्युत्तरं ॥ अश्विमादित्रयोत्तरं ॥ भूजारं मवि वर्जनात् ॥ वदन्ति मार्गपरि
यमपुनर्मार उच्यत इति ॥ नागेवीथ्युत्तरं ॥
सागात ॥ त्यजीय मार्गेणास्सह फलेकं मायसंक्षीदत आह ॥ आभूतसंप्लवमिति ॥ तथा तत्रैव ॥ उद्दी
त्तरमृषिम्यस्तु घ्रुवोपत्रय वास्थित ॥ एतद्विष्णुपदंहि संन्यस्येयं योगिभाहरं ॥ नष्टतद्दोषयं कानायती
नां संयतात्मनां ॥ स्थानं तत्परमं विप्रपुण्यपापपरिक्षये ॥ अपुण्यपुण्यपेपरमे क्षीणाशेषार्तिहेन
वः ॥ यत्र गत्वा न शोचंति तद्विष्णोः परमं पदं ॥ दिचीवचक्षुरातते योगिनां तन्मयात्मनां ॥ विवेक
ज्ञानदृष्टं च तद्विष्णोः परमं पदमित्यादि ॥ इत्यपरात्माख्या ॥ एवं वा ॥ उपासनाक्रमे हि द्वौ मार्गौ दृश्ये
ते । वाममार्गो दक्षिणमार्गश्चेति ॥ तत्र वाममार्गो दक्षिणमार्गश्चेति ॥ तत्र वाममार्गो नाम स्वस्व
वर्णाश्रमविहितानियावंति कर्माणि श्रौतान्यग्निहोत्रादीनि स्मार्तानि अष्टकादीनि तानि त्रिकालि
मंत्रसंध्यादीनि तेषु सर्वेषु ध्यामरेवताः प्रधानभूताः अंगभूता वा ततस्थाने स्वोपास्यामेव
देवतां सर्वत्र भावयेत ॥ ततदेवतावाचकपदोत्तरं विशेष्यत्वेन स्वदेवतायाः मार्गेऽश्रोतादिंतन्न राम०
कर्मांगदेवतास्थाने स्वोपास्यदेवतैव भावनीयेति न निर्बंधः ॥ अपि तत्तन्न देवताविशेषपकतं ७।
न पूयानिकमीणिविहिनानितदंगत्वेनैवेति सर्वकर्मणामुपरोधाभावादस्मिन्मार्गेताद्दृश

या [illegible]कनाशात्सिद्धिरिति ॥ ॥ वाममार्गे तु विलंबितः । सर्वाशोधनाभावेन किंचित्कालं प्रतिबं
धात् ॥ न चैवं सत्यनुष्ठानतोपि कठिनमोक्षांशोपि विलंबितः साधनेकथं क्षिप्रं नो वाममार्गे प्रवृत्ति
रिति वाच्यं । ऐहिककालामुष्मिकफलाना मिहैव जन्मनि भोगलिप्सया मोक्षस्य विलंबं सहमा
नानां मुमुक्षूणां किं बहुत्वेन वैषयिकशिक्षानां प्रवृत्तिसंभवात् । ऐहिकभोगविरक्तक्षिप्र
मोक्षेच्छूनां [illegible] दक्षिणमार्गे प्रवृत्तिरिति विवेकः ॥ तदिदं सविस्तरं निरूपितं का
लिकापुराणे ॥ सर्वेषु चैव मंत्रेषु वैदिकेष्वपि भैरवी ॥ त्रिपुरां चिंतयेन्नित्यं देवमंत्रेषु च क्रमात् ॥ दे
वनाम [illegible] पदं सदा ॥ कुर्याद्विशेषतो नित्यं मंत्रोद्धारे विशेषतः ॥ आपः पुनंतु
[illegible]थिवी मुक्ता त्रिपुरभैरवी ॥ कुर्यादाचमनं विप्रो द्रुपदा यातथा चरेत् । इदं विष्णुर्भैरवस्तु
[illegible] क्रमतः [illegible] ॥ [illegible] मंत्रेषु मंत्रे मंत्रे नियोजयेत् ॥ गायत्री त्रिपुरा ध्यानभैरवीमुखं रुधि
वां ॥ मार्तंड भैरवाय [illegible] निवेदयेत् ॥ उद्भूतं जातवेदसं देवं वहंति केतवः ॥ दृशे विश्वाय सू
र्यं तु [illegible] भैरवीं समीरयेत् ॥ तर्पणादौ प्रयुंजानस्तर्पणं ब्रह्मभैरवं ॥ आवाहनेष्वपि [illegible] त्वा
नि [illegible] ॥ तर्पणं भैरवी मातः [illegible] भैरवतर्पणं ॥ आदौ च त्रिपुरा [illegible] प्रयोजयेत् ॥

२

१७२ ज्योतिष्टोमाश्वमेधादीय त्रयं यं प्रपूजयेत्॥ तत्र मे रवहस्ते॥ देवीमपि च भैरवी॥ एवं तु वामभावेन
यजेत् त्रिपुरभैरवी॥ एषा वामेन मार्गेण पूजा दक्षिणा तां विना॥ न तेषां न देवा न पितृंश्चैव मनुष्या
न भूतसंचयान्॥ यो यज्ञे सर्वमिर्य यज्ञैः त्वणां नो परिशोधने॥ विधिवत् स्नान दाना स्यांस्तर्पयेद्विधि
पूजनं॥ क्रियन्ते सर हस्यं तु न ह्यक्षिणामिहोच्यते॥ सर्वत्रापि तद्देवादौ यस्माद्भवति दक्षिणा॥ दे
वी च दक्षिणा यस्मात् स्मात् दक्षिणा उच्यते॥ या देवी पूज्यमाना तु देवादीनामशेषतः॥ पञ्चभागा नव
यं तु तेषां वामाल प्रकीर्तिता॥ पूजकोपि भवेद्वाम सत्यमार्गे स तत्तरतः॥ पंचपञ्चान्त्र वा कुर्यात्तु
र्यो द्वावामपूजने प्रमस्य पूज्या भागं हि यतो गरा हातिवापि कायः पूजयेद्वामप्रभावेन तस्य संसाराशो
धनं॥ पितृदेवनरादीनां ज्ञायते क्व कदाचन॥ सर्वत्र त्रिपुरायोगः स्तेन मार्गेण गच्छतः॥ यदाज्ञाये
द्वाम्प्रभावेन तस्य संसाराशोधनं॥ पितृदेवनरादीनां ज्ञायते क्व कदाचन॥ सर्वत्र त्रिपुरायोगः स्तेन
मार्गेण गच्छतः॥ यदाज्ञायेन प्राप्नुयते दामो हेम वा मुयात्॥ विरिगाल कृते मोहं वामेन त्रै
पुरो नरः॥ संसाराशोधनजैः पापै राज्ञां तत्वेन भैरवः॥ इह लोके सुखैश्वर्यपुत्रः सर्वत्र वल्लभः॥ म
दनोपम कान्तेन शरीरेण विराजते॥ सराष्ट्रकं च राजानं वशीकृत्य समन्ततः॥ मोहयविनिताः सर्वाः रुम० १७२
कुर्वैश्च मदविह्वलाः॥ सिंहान्व्याघ्रांस्सरक्षश्च भूतप्रेतपिशाचकान्॥ वशीकुर्वन् विचरति वाम्यु

172

वेगोप्यवारितः ॥ बालां वा त्रिपुरां देवीमथवाप्यथ भैरवीं ॥ योयजेत्तारयोमन्त्रपंचवाराण्यमः इति ॥ का
मेश्वरीं तु कामाख्यां पूजयेत्तु यथेच्छया ॥ दक्षिणापद्यवा वाम्नान्सर्वथा सिद्धिमाप्नुयात् ॥ महामायां शा
रदां च शैलपुत्रीं तथैव च ॥ यथ्यानथा प्रकारेण दक्षिणेनैव पूजयेत् ॥ यो दक्षिणं पथि विना मां वेन महामाया
दिमर्चयेत् ॥ स पापः स्वर्गलोकेभ्यः स्यूनो भवति रोगहेतुकः ॥ आमास्तु शिवहूमाद्याः या हेतवः सर्वमोहिताः
॥ नादक्षिणपाद्या ह्याम्नते वा पूजनीया स्तुमाधवैः ॥ किं तु यः पूजको वामः स्रोमाशा परित्तोपकः ॥ सर्वोषा
स रक्षा यस्माद्दक्षिणात्तत्तनत्र मजुनि ॥ इति वैतालभैरवौ प्रति शिववचनं ॥ एतत्सर्वस्य वापस ओचनो
मार्गो चेति कृ मेधारयः ॥ मयोः स्थिता ॥ मार्गद्वयेन प्पु पासेत्तथा ॥ वाममार्गेणोपासना त्रिपुरभै
रव्यादि देवतानां दक्षिणमार्गेणोपासना शारदादि देवतानां सुभयथा पि विकल्पेनोपासना शि
वहूमादि देवतानां च परमार्थतस्तु त्रिपुरसुंदर्यभेदादिति यागतः ॥ इयमस्य माता अत्र द्वितीयव्याख्याने
पि मार्गपदे नैव पारिशेष्याद्वाभ्यां याथ्यु वममार्गोपादाने सति त्रिति पतृकदंद्वरूपे सव्यापसव्यमार्गपदे द्व
द्व पदकदंदगर्भकर्मधारयः पञ्चैकं पदमिति त्रयाणां पदानां पुनर्द्वन्द्वापवादे केशेषेणाव्यात्रयस
षयो, च गंगतसः ॥ ७ ॥ अथ यएते पंथानो न विदुस्ते कीटाः पतंगा यदिदं दंदशूकमित्यादि श्रुतौ
ता ये मार्गद्वयभ्रष्टाः कष्टमापदं प्राप्तास्ते वामप्यापदमनायासेन नाममस्मरणादिमात्रसाधनमात्रेणादयया
निवारयन्तीत्याह ॥ सर्वापदिति ॥ सर्वा आपदो विशिष्यानितरां वारयति ॥ तथा च कूर्मपुराणे देवी

१७३ वार्ह ॥ ये त्वसंगान्परित्यज्य मामेव शरणं गताः ॥ उपासते सदा भक्त्या योगमैश्वरमास्थिताः ॥ सर्वभूतद
याचंतः शांता दांता विमत्सराः ॥ अमानिनो बुद्धिमंतस्तापसाः संयतव्रताः मच्चित्ता मद्गतप्राणा मा
मद्ज्ञानकथने रताः ॥ सर्वभूतदयावंतः शांता दांता विमत्सराः ॥ अमानिनो बुद्धिमंतस्तापसाः
173 संयतव्रताः मच्चित्ता मद्गतप्राणा मद्ज्ञानकथने रताः ॥ संन्यासिनो गृहस्थाश्च वनस्था ब्रह्मचा
रिणः ॥ ये चो कलह्यो हीना अपि मन्नाम जापकाः ॥ तेषां नित्याभियुक्तानां नामापदां पर्वतानपि ॥ ना
शयामि न संज्ञान दीपेन न चिरादिहेति ॥ अथ परिमाषा यास म विशेत्त्वामाभि विभजते ॥ खेचरता हि मं
वदा देहे चैको भवेद्देवी ॥ भगवांश्च तु गरिमा मच्चमालशतेन गोमेदा ॥ अत्रोक्तरार्थ इत्यष्टवर्षेण्काररस्याक
कथनादेक पदे पादानां द्वादशसंख्याधिकेप क्षिप्रेन त्रयस्त्रिंशोपाक्षिप्तत्वादेकादशाक्षरं नामेति सिद्ध
मि ॥ ३२ ॥ ॥ इ ॥ एकेन तंवाच्यत्वाभावात्स्वस्था ॥ स्वस्मिन्नेव स्थिता वा ॥ स भगवः कस्मिन् प्रतिष्ठितः
स्वे महिम्नीति होवाचे ॥ … श्रुतेः ॥ स्व इति सुख इत्यर्थः स्वर्गवाचि ॥ न ते इति श्रुतः सख्यं कृतं येति वा ॥ शोभना अस्था
स्था सभा वो ममेति निहप्यत्वाग्नाम तिर्यपास्ताः ॥ स्वभावादेवो पाधिसंपर्के मं तरे सोव मधुरा सर्वाभिलषणी
या मधुरं रसवत्त्वात्तु हृतिमधे हि ति विश्वः ॥ तस्याः भावो वस्थानं यस्याः सा च सा मधुरा पुरी सर्वाभिलषणीया रामं
मधुरं स्मरत्त्वात्त्वं प्रेमपि तिति निः चेति वा ॥ मीनाक्षी निवासशालि हालास्य हेत्रे हृत्येति याव ता ॥ मद्धा ॥ १७३

ः स्वस्यात्मनोभार्यांश्चातिभार्यायांयेऽवमाः प्रथमगणनीया आत्मज्ञोत्तमा इतियावत्॥ तेषां धुरेव धुरा
॥ धूरिर्विहलेताङ्गागुरुमतेनक्वाप्॥ रथ्यस्य धूर्यपथ्यामस्यैत्तममंगतद्धृदि परमात्मज्ञानवतां निर्वाहि
केः सर्थः॥ नचावमस्य पदस्यानिष्ठ परत्वमेवेति मन्त्रमितछं॥ अवमोत्तमपदयोः प्रथमचरमप
रत्वेनश्च योगदर्शनात्॥ अग्निरग्रे प्रथमो देवतानां संयातानामुत्तमो विष्णुरासीदित्याग्नावैष्ण
वे छियाज्यानुवाक्यामन्त्रस्य सर्वदेवता प्रथमचरमदनपरस्य व्याख्याह्रूपेऽग्निर्वै देवानामव
मो विष्णुः परम इति बह्वृचब्राह्मणे प्रथमपदस्यावमपदेन व्याख्यानदर्शनेन तयोः पर्या
यत्वसिद्धेः॥ स्वभामामात्मज्ञानं येवमं तिसृजंति साधयंति तेषु श्रेष्ठत्वमेतिवा॥ तेनन भिर्धार
राइति षष्ठीसमासनिषेधस्य न विरोधः॥ पुरुषोत्तम इत्यत्रेव सप्तमीसमासस्वीकारात्॥ शो
भनाः आभावाः स्वभावाः॥ आभावेषु शोभनत्वविशेषणात्त्रस्यति यो ग्निनो भावानामशोभन
त्वमुक्तं भवति॥ तेन रागद्वेषवैषम्यनैर्घृण्यादि प्रतियोगिकैरभावैर्मधुरेतिवा॥ स्वेषु आत्मी
येषु भक्तेषु भावेन अवस्थानेन मधुरा बास्वपां आदेन भक्तस्यामधुमत्फलदानीतिवा॥ चतुरन्वेम
धुविद्धतीति श्रुतेत थैव मधुपदस्य व्याख्यानदर्शनात्॥ एवमभिप्रायावतारादयोपि भावप
दार्थाः यथासंभवं योजनीयाः॥ धीरा पण्डिता॥ धैर्यवन्तो वा॥ धियमहेतबुद्धिं ददातीति दानीतिवा

४ गाईश्वरस्तुयहारेवंस्तत्समं द्वैतवासनेतिस्मृतेः॥ धीअहाङ्कशब्दमीकिंप्यर्घस्यावावीरैः पंडितैः सम
174 र्चिता धीसंज्ञज्ञानाभिन्नेत्र समाननेरस्तुहि [illegible] र्विमावा॥ ॥ १२० चैतन्यार्घ्यसमाराध्या चैतन्यकुसुम
प्रिया॥ सदोदिता सदातुष्टा तरुणादित्यपाटला॥ ॥ १२१ ॥॥ चैतन्यं चिद्रूप आत्मा चैतन्यमात्मेति
[illegible] वस्त्रात॥ तदेवार्घ्यं पुष्पांजलादिनेन सम्यगाराध्या॥ निराधाराआयाः पूजा याश्चिद्भेदभा
वन रूपत्वात॥ उक्तंच कादे॥ स्वानुभूमात्रपंसा क्रांत्वा ममतामहेश्वरी॥ पूजयेदादरेणैव ब्रह्मज्ञातसा
[illegible] र्घ्यदेति॥ अथवा चैतन्यस्यात्मनो र्घ्यमाज्ञानेन स्वानुभूत्येपार्घ्यः॥ अर्घ्यः पूजा विद्योस्त्वेप्य
[illegible] विद्याद्भुतलयोरितिविश्वः॥ अर्घ्यसाधुरित्यर्घ्यपत्यात्मपः॥ चातुर्वीरादिदेराकृतिगतान्वा द्वासा
[illegible] र्घ्यप्रमाः। आर्घ्यमितिवक्षेदः॥ चैतन्यवाचको र्घ्यो विद्यास्ती देवास्तोमतुरीरितिवा॥ तेनभुवने स्फुरीमं
[illegible] मारार्घ्या॥ स्मृतिदेवसास्तुदिहास्तुमैत्राः पुंदेवतामतादूतिवचनात्स्तत्संहितार्घ्या॥ जपित्वा
[illegible] साहस्रंमंत्रे चैतन्यवाचकं॥ महापातकसंद्येघ्युच्यते पातकांतरैरिति श्लोके चैतन्यवाच
[illegible] नपदस्य भुवने स्फुरीमंत्रपरत्वेन व्याख्यातत्वाच्च॥ अथवा॥ चेतनैव चैतन्यं सचिद्रूपोऽसः॥ च राम०
[illegible] नविदि [illegible] कावाच्यत्वात्॥ गिनिस्मृतेतिविश्वः॥ सएवार्घ्यः पूजाद्रव्य॥ अथवा॥ चेतनैवचैत १७४
[illegible] सं [illegible] रूपोऽसः॥ चेतनंनासेविदितिओंकारवाच्यत्वात्॥ गिनिस्मृतेतिविश्वः॥ सएवार्घ्यः पूजाद्र

द्रवं॥ विशेषार्घ्यपात्रे परिष्करणेन संस्कारैः पूजायोग्यतामापादित इति पाकः॥ तेन सम्यक्कृ
तर्पणादिना राध्या॥ संविदासवयोर्मध्ये संविदेव गरीयसीतिरुद्रयामलात्॥ तां त्रिके कुंड
गोलोद्भवपदेन व्यवह्रियमाणाः पाचमिकोरसो वा चैतन्यं प्राणिभिः संभवत्वात्॥ चैतन्यं विदे
वकुसुमं॥ महाफलप्रसूतिबीजं डानां चैतन्यस्तबकमकरंदस्तुतिप्रारामादौ कुसुमत्वेन रू
पकस्य कविसंप्रदायसिद्धत्वात्॥ तत्प्रियं यस्याः॥ संविदादिपरं हृदयमिहाप्यतिदेष्टव्यं॥ त
योश्च कुसुमसन्नावाच्चैतन्यस्य कुसुममिति सैव परं हृदयेपि विग्रहः॥ सदा नित्यमुदिता उद
यवती॥ स्वप्रकाशत्वात्॥ सत्सु सज्जनेषु वा आ समन्तादतिशयेनोदिता वा॥ एवमेव सदा तुष्टे
त्यस्य व्याख्याता वर्धौ॥ तरुणो न आन्हकालिक आदित्यः सूर्यस्तद्वत्पाटलाप्युत्तरक्ता॥ न च गौरीरूपा
मेतादिभिर्विरोध उद्भावः॥ मूर्तिभेदेन ध्यानभेदेन वा व्यवस्थोपपत्तेः॥ रूपते च॥ तद्य
थामाहारंजनं वा सायं ध्यापांडु चाविकं यथेंद्रगोप इति स्मर्यते च॥ शांतादेव लवणाभा
मौक्तधर्मप्रकरणेन। स्त्रीवपुषे राजवपुषे च जनवपुषे च पाटला॥ पीताद्यतनुस्पर्शपतनौ छसा
मा [illegible] मेति॥ वसुविष्णु वरोपोक्ता श्रृंगारे पाटलाकृतिः॥ सर्ववर्णा सर्वलाभे छेयाज्ज्यो
तिर्मयी परमिति॥ ॥ २२१ दक्षिणादक्षिणाराध्या दरस्मेरमुखांबुजा॥ कौलिनी केवला
नर्घ्यकैवल्यपददायिनी॥ ॥ २२२॥ ॥ दक्षिणा मा दक्षिणैः कुशलैराराध्या। दक्षिणैः पंडि

१७५ नैरदक्षिणैर्मूर्खैश्चेतिवा। दक्षिणमार्गोपासकेन वाममार्गोपासकेन चेतिवा॥ यद्वा केवलक
र्मठजिज्ञासवो दक्षिणा इत्युच्यन्ते॥ विद्यापातदारोहेति यत्क्रामा मार्गोपासकेन वाममा
र्गोपासकेन चेतिवा॥ यद्वा केवलकर्मठजिज्ञासवो दक्षिणा इत्युच्यन्ते॥ विद्यापातदा
रोहेति यत्क्रामाः परागताः॥ न तत्र दक्षिणा यान्ति नाविद्वांसस्तपस्विन इति श्रुतौ तथा
व्याख्यानदर्शनात्॥ अदक्षिणा ब्रह्मविदः ताभ्यामाराध्या॥ चतुर्विधा भजन्ते मां जनाः
सुकृतिनोऽर्जुन॥ आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभेति वचनात्॥ दरमीषद्यथा त
था स्मेरं। स्मितवन्मुखाम्बुजं यस्याः॥ मुखमम्बुजं यस्याः स्मितवन्मुखाम्बुजं ग्रीवादृष्टेः॥ दरं खर्वं ल
व स्मेरं शोभमानं मुखाम्बुजं यस्या इतिवा॥ कम्बुकण्ठीति यावत्॥ दरे भयकालेऽपि स्मेरमे
वं मुखाम्बुजं यस्या इतिवा॥ कल्पान्तादिनैमित्तिककालेऽप्यन्येषामेव भयेन मुखवैवर्ण्यं म
वा यास्तु सर्वदा स्मेरमेव मुखमिति यावत्॥ दरे भक्तानामापत्त्रो विषये स्मेरं प्रसन्नमिति
वा॥ अव्रतं वा ध्यं॥ एतच्छ्लोकोत्तरार्धे चत्वारि नामानि प्रतीयन्ते॥ तत्र रजनी या निरिक्ता निपु
नरुक्तानि त्रीणि भवन्ति॥ कुलाङ्गनाकुलान्तस्था कौलिनी कुलयोगिनी॥ अकारी केवला
गुह्या कैवल्यपददायिनी मत्र व्याख्यानविस्तरत्वात् तत्परिजिहीर्षया च छलान्तरसूत्रकारैः कौ
लिनी कुलयोगिनीत्येकपदत्वेनोक्तत्वात् प्रकृते च कौलिनीत्येकमेव शिष्टमेकमिति नाम राम०
द्वयमङ्गीकृतम्॥ यद्वा केवलस्य रहस्य रीइफिकोत्कीति॥ अक्षयापदूदाहरहीङ्किकोरीष्टकी १७५

175

इतित्रयोदशोत्तरैः छाया॥ अष्टाक्षराणि त्रीणि नामानीत्यादिरात्रैकविंशतिर्नामानि समदाष्टिवकु
ंडलिनीत्यादिप्रमानवलीत्यंतानि तत्र कथ्यंते॥ ननु किको द्व्यक्षरत्वं येन व्यक्षरमेकं त्रयोदशा
क्षरमेकमिति द्वे नामनी कवर्गीयाद्यक्षरके इत्यर्थे केन प्रकारेण तं नामद्वयं वर्ण्यत इति चेत्॥ अत्र
ब्रूहि छलाणां स्वचाणां दृष्टोपपत्तिमूलकत्वात्। एवमेवोक्त्वा बहूनि नामभिर्नामत्रयकरणमप
त्र नामचतुष्टयपरत्वेन पदच्छेदवर्णानां संयुक्ततां मत्वा नैर्मल्यकारैस्स्म शुरुचरणौरिह षड्क्ष
रमेकं नाम। अवशिष्टमपरमिति द्वे नामनी स्वीकृतं कौलिनी कुलयोगिनीत्यत्रापि द्वे नामनी स्वीकृ
ते॥ पौनरुक्त्यपरिहारस्त्वस्मिन्नन्यत्रापि तुल्य एव॥ नवैवं नामाधिक्यं॥ प्रसवित्री प्रचंडाज्ञा प्र
तिष्ठा प्रकटाकृतिरित्यत्र छलाक्षरैस्त्रकारैः प्रकटाकृतिरिमनयोर्नामद्वयत्वस्वीकारे पिगुरुचर
णैरेकनामत्वस्वीकारेणात दभावादिति॥ तस्मादिह कौलिनीकेवलेत्येकं नाम। न चैतत्स्यादेवं स
मासानुपपत्तिः॥ समानाधिकरणसमासे पूर्वकाले कसर्वजरत्पुराणनवकेवलाः समाना
धिकरणेनेति नियमनात्केवलपदस्य पूर्वनिपातापत्तिः॥ बहुव्रीहौ तु कौलिनीपदस्य पुंवद्भा
वापत्तिरिति वाच्यं। परं ज्योतिरित्यादावपि विभिन्नपदयोरप्येकनामत्वसंभवात्॥ कौलधर्मवती के
वलात्मज्ञानवती चेत्यर्थः॥ ईश्वरस्य ज्ञानं केवलापदवाच्यं॥ जैनतंत्रे तथा प्रयोगस्य बहुशो द
र्शनात्॥ एकलधर्मैर्विमुक्ता वा केवला॥ सखंडः ख विमुक्ताः वा॥ तद्विमुक्तस्तु केवलीति
शिवसूत्रे केवलीति संज्ञापादर्शनात्॥ तु खात्तु खयो व हि मनन मिति सर्व सूत्रोपात्तस्तु खंडः ख

१७६ योगात्मकेन परात्मशोना: प्रकृते च मत्वर्थीयस्ये निप्रत्ययस्याभावे पि ताहशस्यात्रत्ययस्य हु
प चत्वात्॥ एकक्षेत्रनिर्णीतारस्यात्र पि त्रयो योग्यइहवर्णानीया॥ तथाच विश्वः॥ केवलं
ज्ञानभेदे स्यात्केवलश्चैककृत्स्नयोः। निर्णीते केवलं चोक्तं कैवलः कुहनेकचिदिति॥ वस्तु
तः केवलकोलधर्मवतीत्येवार्थः॥ विशेषणविशेष्यभावादिनायरस्परान्वयएवमित्रापि
176 द्वयोरेकनामतत्वनियमात्॥ अथवा॥ हत्तीमार्यज्ञमत्रदानक्रियानिमित्तस्यापि तत्पदस्य
संज्ञात्वमंगीकृत्य संज्ञापूरणायोस्त्वेति पुंवद्भावनिषेध आश्रीयते वैयाकरणैः॥ तद्वदिहा
पि कौलिनीपदस्यापि संज्ञात्वात्कौलिन्य केवलाज्ञानवमीयवेति वक्तुं व्रीहिरपि संभवति
॥ कौलिनी॥ भि: केवलानिर्णीतेति तृतीयासमासो वा॥ तृतीयात्तत्कृतार्थेन गुणवचनेनेति
सूत्रे गुणोपसर्जनद्रव्यवचनपरत्वेन गुणवचनपदस्य व्याख्यानात्॥ गुणान्युक्तवानगु
णवचनत्वं। अनर्घ्यममूल्यमपरिछिन्नयत्केवलाख्यं पदं पंचममुक्तिरूपं तद्ददातीशीलमस्या
गुणवचनत्वं। अनर्घ्यममूल्यमपरिछिन्नयत्कैवल्याख्यं पदं पंचममुक्तिरूपं तद्दातुंशी
लं यस्याः॥ अनर्घ्येति दीर्घान्तपाठे आसमन्तात् घ्यातं न्नयत्केवल्यमितिवानविद्यते कैवल्यं यस्मा
त् कैवल्यमतिदृश्यापरस्वरूपमितिवा व्याख्येयं॥ १२२॥ ॥ स्तोत्रप्रियास्तुतिगतीस्तुतिसंस्तुतवैम
॥ मनस्विनीमानवतीमहेशीमंगलाकृतिः॥ ॥ १२३॥ ॥ स्तोत्रे लौकिको गुणानुवादः॥ रामः
ग्रा तमंत्रसाभ्यकगुणानिष्टगुणाभिधानं वैदिकं वा प्रियं यस्याः॥ स्तोत्र स्तुता आपस्तुस्तो १७६

ता: प्रियायस्या वा॥ सोत्री शब्दस्य पुंवद्भावः॥ देवा मनुष्याः पितरोऽसुरास्त्रोप्सरो वा आः॥ तानि वा
रतानि चत्वारि अंभांसीति श्रुतेः पंचमा मायातोयापः पुरुषवचसो भवंतीति श्रुतावपामेव मनुष्या
दिरूपतया परिणामत्वोक्तेश्च॥ स्तुतिरस्या कर्मणा संबंधेनास्तीति स्तुतिमती स्तुत्या मतिश्च
ईश्वर्यं यस्या इति वा॥ यत्तु मन्यां ज्ञाने स्थ्वर्यं फलं भवेत्तेनेति यावत्॥ श्रुतिभिः सम्यक् स्तुतं परिचिंत
वावैभवं विभुत्वं यस्याः॥ संस्तवः स्यात्परिचय इति कोशः॥ श्रुतिशब्दश्चतुःसंख्यापरो वा॥ पु
गास्थयोर्थाः श्रुतयश्चतस्र इति छंदःसुधाकरात्॥ तेन चतुर्थ्यपरिचिंतितं वैभवं यस्या इति विग्रहः
॥ शरीरपुरुषश्छंदःपुरुषो वेदपुरुषो महापुरुष इति बह्वृचोपनिषदुक्ता चतुर्व्यूहस्वरूपेणार्थः॥
कूर्मपुराणेपि॥ चतस्रः शक्तयो देव्याः स्वरूपत्वेन वाछिताः॥ अधिष्ठानवशात्तस्याः शृणुध्वं
मुनिपुंगवाः॥ शांतिर्विद्या प्रतिष्ठा च निवृत्तिश्चेति ता स्मृताः॥ चतुर्व्यूहस्ततो देवः प्रोच्यते परमे
श्वरः॥ अनया परया देवः स्वात्मानंदं समश्नुते॥ चतुर्ष्वपि च देवेषु चतुर्मूर्तिर्महेश्वर इति॥ मनो
स्याः स्वतंत्रतया तिष्ठतीति न तु पराधीनं वृत्तिकत्वेनेति मनस्विनी॥ अस्मायामेधास्रजो विनिः॥ मा
नवत्समुन्नतिरादरणं वाप्रिया पराया स्तु चिकायेष्टा वा प्रमाणं वा प्रमितिर्वा यस्यामस्तीति मानवती
महेशस्य स्त्री महेशी॥ उक्तं च देवीपुराणे॥ महादेवात्समुत्पन्ना महद्धिर्यतत्र आदृता॥ महेशस्य
वधूर्यस्मान्महेशी तेन सा स्मृतेति॥ मंगलरूपा आकृतिर्यस्याः॥ ॥१२३॥ ॥ विश्वमाता जगद्धा

१७७ त्री॥ विशालाक्षी विरागिणी॥ प्रगल्भा परमोदारा परामोदा मनोमयी॥ ॥ ११४॥ विश्वसृजगतो
विष्णोर्वा माता॥ जगन्ति भूरूपेणोति जगती धात्री॥ उपमाता वा पालकत्वात्॥ एष भूतपाल एष
षसेतुर्विधरण एषां लोकानामसंभेदायेति काण्वश्रुतेः॥ देवीपुराणेपि॥ यस्माद्धारयते लो
कान्क्रान्त्रिमे षां ददाति च॥ तुष्या जगद्धारणोद्धात्री जगद्धात्री मता बुधैरिति॥ विशाले विस्तीर्णे
अक्षिणी यस्याः॥ सा वाराणसी पीठाभिमानिनी॥ वाराणस्यां विशालाक्षीति पाद्मात्॥ विशा
लाशब्दो बदरिकाश्रमवाचकोपि हिमवत्पृष्ठे विश्व साधर्म्येणाने पालपीठ परः॥ तस्य च पीठन्यास
प्रकरणे नेत्रस्थाने न्यासो ब्रह्माण्डपुराणोक्तो विहितः॥ तेन विशालपीठमेवाक्षिस्थानं यस्याः
तिवा॥ विरागो वैराग्यमस्या अस्तीति विरागिणी॥ स्वष्ठ्यादिकर्मसु प्रौढत्वात्प्रगल्भा॥ परमा
च सोदारा च महती च देशतः कालतश्च महत्त्ववतीत्यर्थः॥ उदारो दातृमहतोरित्यमरः॥ आका
शवत्सर्वगतश्च नित्य इति श्रुतेः॥ परं प्रकृष्टं मोदमानंदमानंदमास्समन्तान्मातीति वा॥ परमा
रापुद्रांमिजनानि यस्मिन्स परमोदः समुद्रः॥ स च प्रकृतेर्भवसमुद्ररूपः॥ तस्यारान्त्रायुधवि
शेषो नाशिके ति वा॥ अकारप्रश्लेषेणापगता रमा येषां ते अपरमा दरिद्रास्तेभ्य उदारा एश्व एम०
र्यप्रदेति वा पर उत्कृष्ट आमोदः परिमलः कीर्त्तिरित्यावत्॥ आसमंतान्मोदः संतोषो वा यस्याः॥ १७७
मनः स्वधा नाम मनोमयी॥ मनसैवानुद्रष्टव्यमिति श्रुतेः साक्षात्कारात्मनेजननीयेमनसमएव प्राधान्यात्॥

२२४॥ व्योमकेशी॥ विमानस्था वज्रिणी वामकेश्वरी॥ पंचयज्ञप्रिया पंचप्रेतमंचाधिशायि-
नी॥ ॥२२५॥ व्योमेव केशा यस्या विराड्रूपायाः व्योमकेशस्य शिवस्य स्त्री वा॥ व्योमैवालंस
द्मोमकं॥ अस्येर्थेकप्रत्ययः॥ तस्येशी ततोपि आपि का वा व्योमकल्पस्येशस्य स्त्री दिग्रूपा
वा॥ विमानो व्योमयानं तत्र स्था देवानामदंभेदादंबापि॥ विशेषेण मानेन आदरेण स्था स्थितिर्
यस्या वा॥ विशिष्टा मा कान्तिर्यस्य तद्धि संतादृशं अनः शकटं किंचिच्चक्रादिरूपं रथस्तत्र तिष्ठती
ति वा॥ विशिष्य माति निष्कृष्य प्रमां जनयतीति विमानो वेदस्तत्र प्रतिपाद्यतया तिष्ठतीति वा॥ बु
पस्थानाते: शानचि विमानइति रूपं। विशिष्टेषु वेदाविरुद्धेषु मानेषु प्रमाणेषु धर्मब्रह्मरू
पेणातिष्ठतीति वा॥ विशिष्य मानेषु गुणगणाम्नायमीमांसेस्यादिनात तद्धक्तिवेनरूपेण पञ्चिणा
नयेषां तेषु चतुर्दशस्वेव विद्यासु धर्मस्थानेषु तिष्ठतीति वा॥ तदिदमुक्तं भगवता जैमिनिना शि
ष्टाकोपे विरुद्धमिति चेन्न शास्त्रपरिमाणत्वादिति॥ वज्रिणी इंद्रस्य स्त्री शचीरूपा वा॥ वज्र
धारिणी वा॥ वज्रा रत्नलेभूषिता वा॥ महद्भयं वज्रमुद्यतमिति श्रुतौ॥ वज्रपदस्य ब्रह्मपरत्वा
त्तु रिच्छेदकत्वसंबंधेन तत् ब्रह्मणी वा॥ वामकेश्वरतंत्ररूपा वामकस्य तंत्रस्य प्रतिपाद्या वा॥ वामा
वाममार्गरतास्ते एव पंचयज्ञविलोपकत्वात्कुत्सिताइति वामकाः॥ वमंति जगत् स्रजंतीति वा वाम
कादयः शक्त्याद्याः तेषामीश्वरी वा॥ पंचसंख्याकाः यज्ञाः पंचयज्ञाः मध्यमपदलोपी समासः॥ तेनन

१७८ द्विगोरिति ङीप्॥ ते प्रियाय यस्याः। नित्यसम एष यज्ञः पंचविधोऽग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्या
नि पशुः सोम इति श्रुतौ कथिताः॥ स्मृतिषु प्रसिद्धा देवयज्ञ ब्रह्मयज्ञ भूतयज्ञ पितृयज्ञ मनु
ष्ययज्ञा वा॥ पंचरात्रागमे अभिगमनमुपादानमिज्या स्वाध्यायो योग इत्युक्ताः पंचविधपू
जा वा। कुलागमे केवलो यामलो मिश्रश्च चक्रयुग्वीरसंकर इति पंचविधा पूजेत्युक्ता वा॥
निरुत्तरतंत्रे हेति मिर्मं धेमाद्यं स्याद्द्वितीयं नवयोनिस्थिमारभ्येति पंचप्रकारा वा प्रोक्ताः सर्वार्थ
सिद्धिदं मंत्रेणोक्ता वा॥ बृहत्तंत्रकौमुद्यां तन्मूलके मंत्रमहोदधौ च आवरीसोनकौ देवौ बोधी
त्रासी साधनामा विनीतिकथिता वा॥ अग्निहोत्रे हूयमानादुग्धादिहव्यात् आपः सोमयुष्टथि
वी पुरुषयोषि दृष्यकुंड पंचकेपुनः पुनहूयंते तदा ता एवापः शरीरभावं भजंतीत्युपनिषत्स्व
रं हन्माद्यधिकरणेषु चरस्त्रष्टोयं विषयः। तत एते पंच यज्ञा वा॥ सर्वेषामेतेषामेकशेषः॥ ब्रह्मा
द्यश्चत्वारः प्रेताः पादाः सदाशिवाख्यः प्रेतः फलकमेतान् हंसं मंचं पर्यंकमधिशेते॥ उक्तं
च भैरवयामले बहुरूपाष्टकप्रस्तारे च॥ शिवात्मके महामंचे महेशानो बपेहरो॥ भक्तका
म्यच तुष्यार्थ कशिपुश्च सदाशिवः। तत्र शेते महेशानी महात्रिपुरसुंदरीति॥ आचार्यभगव
त्पादैरप्युक्तं॥ गतास्ते मंचत्वं द्रुहिणहरिरुद्रेश्वरभृतः शिवः स्वच्छछायाघटितकपट प्रच्छद राम०
पट इति॥ २५५॥ पंचमी पंचभूतेशी पंचसंख्योपचारिणी॥ शाश्वती शाश्वतैश्वर्या शर्मदा १७८

धूंधामुमेति स्मृता ॥ ९४६ ब्रह्मादिषु पंचसु पंचमस्य सदाशिवस्य स्त्री ॥ हरितगीतायां तस्यापंचवास
हः शतोक्तः ॥ त्रिपुरुहृद्रो वरिष्ठः स्यात्तेषु मायी परः शिवः ॥ मायाविशिष्टात्सर्वज्ञात्सावः स
दाशिवः स्मृताः ॥ सदाशिवो वरिष्ठः स्यात्तत्र कार्यविचारतोति ॥ पंचमी शुद्धाहोवारा ह्यानि हठेवासा
च यद्यपि पंचरत्नदेवतास्तु चरमेति पंचकोशादि चरमदेवता स्वियोगिक स्वसमतस्याभासते ॥ तथा
पि दक्षिणास्वर्मितसंहितायां पूजये पंचमी हुतं ॥ पंचस्या एष वी हृदि चरमदेवता स्वियोगिक ९९७
मी परमेश्वरी ॥ पंचमी शकृदयं चत्रिशूलेके पुंजयम मिनादौ बाराह्यामेव बहुतरप्रयोगदर्शनाछो
गरूते प्रवसेयः ॥ मकारेषु पंचमस्यानंदरूपत्वात्तद्रूपा वा ॥ तथा च कल्पसूत्रे ॥ आनंदं ब्रह्मणोरू
पं तच्च देहे व्यवस्थितं । तस्याभिव्यंजकाः पंचमकारास्तैरर्चनं गुप्त्या दि ॥ अत एव पंचानां मानां
मकाराणां समाहारः पंचमीति वा ॥ तेच त्रैपुरसूक्ते परिसंख्याते च यमाद्यपले चत्वारमाम्यविस्रसिध्या
भि दानसु प्सादपोगुरुमुखाद वगंतव्याः ॥ पंचम्यामामकृतावापः पुरुषवच्चमो भवंतीति श्रुति प्रसि
द्धा यो ऽषिकंडे रेतो हविष आहुति रूप क्रय इ पंच प्रकारा जातेति वा पंचमहाभूतात्मिका पंचरला
त्मिका वा वैजयंती माला तद्दीशी ॥ उक्तं च विष्णुपुराणे ॥ पंचरूपा तु या माला वैजयंती गदाभृतः ॥
सा भूतहेतु संघाता भूतमाला भवेद्विजेति ॥ अत्र पंचरूपेति पदं मुक्तामाणिक्यमरकतेंद्रनीलव
ज्रसमानवर्णेति व्याचक्षते ॥ विष्णुरहस्येपि ॥ पृथिव्यां नीलसंज्ञानमद्भ्यो मुक्ताफलानि च ॥ तेन

१७९ सा कोन्ना गोलागोवैडूर्यसंज्ञकं ॥ उक्ता तु भारा गमस्तुवेन पंन्तोहरेरिमइति ॥ पंचसं
ख्यां गंधपुष्पधूपदीपनैवेद्याख्या उपचारा अस्याः ॥ अथ परिभाषा नाम विशिष्टानि पंच ॥
भाषा नामानि विभज्यते ॥ गुणा गणा राशि चिह्न गेषां चतुर्हरं तवतुर्हट्ठामोदं ॥ गुणाहृदि विभज्य म
दाकुरुवर्णं चिनवचत्वारिंशांगहृन्मिति ॥ अत्र इति शब्दः सहस्रसंख्यासमाप्तिपरः ॥ तदि
त्यादीनि नामाङ्कुरं ख्यापयति ॥ यद्वै भवान परा शिवमारभ्य गुरुवर्गेनाङ्कसमूहे । खगु
णपर्यन्ते विशिष्य भजेत्यर्थः ॥ गुणागणाः साकृद्दविभृहत्वं ॥ खगा नाम देवानामपीशं च
तुर्विधक्लेशान् जरायुजादियोनिच तद्वृपजमानहरं तं चतुः संख्याहृणमोदाय नस्तुल्ला
ऽनुरूपाद्यः यस्मात्तं ॥ गुणाशीलेहृदिइति अनेन प्रकारेण सहस्रनामादिहृत्पेणागोदं तमु
पदिश्य ॥ नवचत्वारिंशद्भेदेनामारभेत्याख्याता ॥ ७१ ॥ शाश्वत पोनःपुन्यं तत्संबंधिनी पु
नः पुनरावृत्तिसमानस्यार्थः ॥ निमावा ॥ शाश्वतस्य ध्रुवो निःसंशमरः ॥ शाश्वतं नित्यमेव
र्ययस्याः ॥ महाद्वादशकारमहेशोपेशा शाः जगदीशाः पंचप्रेतास्तेषु भ्रूताः श्वेतं वाहनं तं
दननताहद्भुमे सूर्ये यस्याः ॥ पंचप्रेतासनाहस्वे निफलितार्थः ॥ शर्म सुखं ददन्ते ॥ शं मुमो
हसतीति निःस्पृमोहिनी ॥ ॥ ११६ ॥ धराधरसुजा धमाधर्मिणी धर्मवर्धिनी ॥ लोकातीता राम०
गुणातीता सर्वातीता शमात्मिका ॥ ॥ ११७ ॥ धरा ॥ पृथ्वी स्वरूपा सर्वस्य जगतो धारणाद्धा १७९

179

॥लंकारस्वरूपावालंकारःपृथिवीदेवीशशीलवनना॥ पंचाशत्पीठसंपन्ना सर्वतीर्थमयी
परमादिज्ञानार्णवे॥ धर्मस्य हि मङ्गलत्वं तस्य हन्ता॥ धर्माद्धनं तार्थो॥ धनाय हितावा॥ धनं
लक्ष्मीवा॥ धनेनगणालब्धेतिपरत्वात्मयः॥ मंगलापिंगलाधन्येतिज्योतिःशास्त्रप्रसिद्ध्यायो
गिनीविशेषस्साव॥ यद्वा चरमकालीनो स्थिता आर्त्तरौद्रध्यानं धर्म्यशुक्लमेदेन चतस्रो भवितो
तरपुरोशोकचिंताः। यथा॥ राज्योपभोगशयनासनसाधनेषु स्त्रीगंधमाल्यमणिवस्त्रवि
भूषणेषु॥ इच्छाभिलाषमतिमात्रमुपैति मोहाध्यानं तदार्त्तमिति संप्रवदंति तज्ज्ञाः॥ संछे
दनैर्दहनताडनपीडनैश्च गात्रप्रहारदमनैर्विनिकृंतनैश्च॥ यस्येह रागउपयाति न
चानुकंपा ध्यानं तु रौद्रमिति तत्प्रवदंति संतः॥ सूत्रार्थमार्गणमहाव्रतभावनाभिर्बं
धप्रमोक्षगमनागतिहेतुचिंता॥ पंचेंद्रियाधुपशमश्च दयाच भूते ध्यानं तु धर्ममिति त
त्प्रवदंति संतः॥ यस्येंद्रियाणि विषयैर्न विचलितानि संकल्पनाश्न विकल्पविकारयोगैः॥
तत्त्वैकनिष्ठमतियोगमनोनिरात्मा ध्यानं तु शुक्लमिति तत्प्रवदंति सिद्धाः इति॥ एतेषां फ
मेदोपि भविष्यात्तरेण॥ आर्त्ते तिर्यग्योगतिश्च निपतां ध्याने च रौद्रे सदा धर्मे देवगतिः
शुभं फलमथो शुक्ले च जन्मक्षयः॥ तस्माज्जन्मरुजापहे हितकरे संसारनिर्वाहके ध्याने

१८० मेतानरेराजा। प्रथमथनेकुर्पात्रयलंवुधइति॥ तत्रधर्म्मास्य ध्यानहत्वेति। धर्मशीलत्वा
धृत्मिरागी॥ आनंदानुभवनिमग्नादिधर्माणां विशेष्येमजाता॥ धर्मवर्धयतीतिधर्मवर्धि
नी॥ तदुक्तंवामनपुराणे॥ जितेंद्रियत्वंशौचंचमांगल्यंभक्तिरेवच॥ शंकरेभास्करेदेव्यां
180 धर्मोयंमानुषः स्मृतः॥ ध्यानतः सांवइमानधर्मानवृंर्द्धिनयतिदेहनामिति॥ वृषभछेदन
इतिधानोर्ब्रह्माधिष्ठानंकं धर्ममात्रेहृशुपंजातंछेदयतीतिवा॥ लोकानिंद्रलोकादिवि
ष्णुलोकांतानतीता। तिक्रम्यमहाकैलासाख्येपरशिवपुरेस्थिता॥ परशिवपुरस्यसर्व
लोकातीतत्वंशिवधर्मोत्तरे॥ अर्वाचीनानलोकानवर्णयित्वा॥ इयंविष्णुपदादूर्ध्वंदि
व्यंशिवपुरंमहत्॥ इत्यारभ्य इत्येतद्रूपंप्रोक्तंश्रीमच्छिवपुरंमहत्॥ देहिनांकर्मनिष्ठा
नांपुनरावर्तनेस्थितम्॥ इतिसंतेनकमंशन्ता परशिवपुरंवर्णयित्वा। ऊर्द्धंशिवपुराद्दूर्ध्वंयस्था
नत्रयमनुत्तमं॥ निःसंपरमम्बुद्धंचस्कोदोमांशकरान्मकमितारम्भ॥ येमप्राप्ताः परंस्था
नेध्यानयोगरतानराः॥ नतेषांपुनरावृत्तिर्घोरेसंसारसागरे॥ सर्वज्ञाः सर्वगाः शुद्धाः प एम०
रिपूर्णामहेश्वराः॥ शिवतुल्यबलोपेताः परंशिवपुरंगताः संतो॥ लोकानूर्जीवान्वाऽतीती १८०
ता॥ अतएवपुराणान्तीतास्यचमतीताच॥ सर्वानशब्दानतीनावा॥ उक्तंचज्ञानार्णवे

॥ शब्दातीतं परंब्रह्मगुणगणविरहितं सदा॥ आत्मस्वरूपं जानीहीति॥ शमः प्रपंचोपश
म एवात्मस्वरूपं यस्याः प्रपंचोपशमं शिवमद्वैतं चतुर्थं मन्यंत इति नृसिंहतापनीये
श्री सुखमात्मा यस्या इति वा॥ ११७॥ ॥ बंधूककुसुमप्रख्या बाला लीलाविनोदिनी॥ सु
मंगली सुखकरी सुवेषाढ्या सुवासिनी॥ ॥११८॥ ॥ बंधूको बंधुजीवको वंगदेशे प्रसि
द्धो महावृक्षस्तस्य कुसुमं पुष्पं तस्येव प्रख्या॥ अमारक्ततमकांतिर्यस्याः॥ बाला॥ कु
मारी॥ त्वंकुमार उत वा कुमारीति श्रुतेः॥ त्रिपुरासिद्धांतेपि॥ बाललीलाविशिष्टत्वा
द्बालेति कथिता प्रियदूती॥ लीला प्रापंचिकी क्रीडैव विनोदो यस्याः॥ पद्मराजस्य भा
र्या लीलाख्या योगवासिष्ठे प्रसिद्धा तां विशिष्य समत्कमेण विनोदयतीति वा लीलादेव्या त
पसा सरस्वती तोषिता मातुष्टा न स्वैज्ञानं तद्भर्तृजीवनं च प्रदादिति कथा पा विस्तरेणा
त्रैव वर्णिता नातकरी॥ शोभनेन वेषेणाढ्या युक्ता॥ सुवासिनी॥ सार्वकालं जीवत्स
निका॥ सुवासिनीजननामनिर्वाचा॥ ११८॥ ॥ सुवासिन्यर्चनप्रीता शोभना शुद्धमा
नसा॥ बिंदुतर्पणसंतुष्टा पूर्वजा त्रिपुरांबिका॥ ११९॥ ॥ सुवासिनीनामर्चनेन प्रीता
॥ आशोभनेति चतुरक्षरं नाम॥ समंततः सौंदर्यवती॥ शुद्धं मानसं यस्याः॥ बिंदौस

१८। र्वानंदरूपचक्रे बिंदुकारणेकेन वा तत्पर्यायेन सम्यक्कुर्वाणा बिंदुरिति निपातितं बिंदुपदवाच्य
ज्ञानरूपं तत्पर्यायेन तत्स्यासंतत्वष्टावा॥ सर्वजाता॥ अनुस्विष्टा सर्विकाया प्रथमा सृष्टिसृष्टिरूपा॥ अष्टपुरा श्रीवशंक
री॥ ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेयस्वरूपिणी॥ १२०॥ संक्षोभिण्यादित्रिखंडांता दशमुद्रात्मा भिःक
रणाभूता भिःसम्यक्कृत्य योनिबोधकवासनानुगुणेपनाराध्या॥ पंचमचक्राधिष्ठात्री त्रिपुराश्रीनामिका
देवी तां वशं कुरुते॥ सा वशंकरी यस्याइति वा॥ तर्जनीमंगुष्ठयोगरूप ज्ञानमुद्रारूपा॥ ज्ञानेन मुदं राति
ति वा॥ ज्ञानेन विद्वेशं मुद्भावं दांशं चज्ञाव यस्माद्द्रावयतीति वा॥ ज्ञानेनगम्या॥ विषयः॥ ज्ञानेन प्राप्या
वा॥ उक्तं च कौर्मे देव्या वा॥ यत्तु मे निष्कलं रूपं चिन्मात्रं केवलं शिवं॥ सर्वोपाधिविनिर्मुक्तमनंतममृ
तं परं॥ ज्ञानेनैकेन तल्लभ्यं क्लेशेन परमं पदं॥ ज्ञानमेव प्रपश्यंतो मामेव प्रविशंति ते इति॥ ज्ञानज्ञे
येद्वयरूपस्वरूपमस्याः॥ १२०॥ योनिमुद्रा त्रिखंडेशी त्रिगुणांबा त्रिकोणगा॥ अनघाद्भुतचा
रित्रा वांछितार्थप्रदायिनी॥ ॥ १२१॥ योनौ मुद्यतीति॥ नवममुद्रारूपा वा॥ योनिरेव मुद्रा श्रीचक्रादि
कायस्या बिंदोस्तद्रूपा वा॥ यद्वा॥ गुदमेढ्रांतरं योनिरित्युच्यते॥ मंत्रदोषनिरासार्थं तन्मुद्रणा प्रका
रेण गुरुमुखैकवेद्यो ऽस्ति॥ तद्रूपा वा॥ त्रित्रिखंडात्मा याश्च दशमुद्रा या ईशी स्वामिनी॥ त्रयाणां सोम
सूर्यानलात्मकमेव त्रखंडानामीशी वा॥ त्रयो गुणा यस्याः सा त्रिगुणा॥ सत्वरजस्तमसामाश्रयत्वेन राम०
सात्वासंमनाप्रकृतिरितिपाचरः॥ तदुक्तं वायुपुराणे॥ योगेश्वरीशरीराणि करोति विकरोति च ॥१८॥

181

नानाकृतिक्रियारूपनामवृत्तिस्वलीलया॥ त्रिधायद्वर्ततेलोकेतस्मात्सात्रिपुरोच्यतइति॥ विष्णुपुराणे
पि॥ सर्वेषु तेषु सर्वांशस्याशक्तिरपरा तव॥ गुणाश्रयानमस्तस्यै शाश्वतायै परेश्वरीति॥ देवीपुरा
णेतु॥ त्रिविक्रमत्रिपथगात्रिगुणानांपर्यायनाध्वनिता॥ यदुक्तं॥ पदैस्त्रिभिर्बलिर्बद्धः स्वर्गो दि
त्रिपथानगता॥ उत्पत्तिस्थितिनाशेषु सत्त्वाद्यैस्त्रिगुणोच्यतइति॥ अत्र॥ इष्टशास्यगुणात्रय
स्यापिमानाकाररूपता॥ यत्तंत्रेषु मंत्रजीवइत्युच्यते॥ तथाचतंत्रराजे॥ तेजसांशक्तिमूर्तीनांप्र
पंचस्यापिकारणं॥ गुणात्रयममीषांचप्रकारत्वामुदाहृतं॥ तत्स्वरूपानुसंधानसिद्धिः सम्यक्
मीरितं॥ तन्मंत्रवीर्यमुद्दिष्टंमंत्राणांजीवईरितइति॥ अविशेषात्सकलजगद्वाची॥ त्रिकोण
योनिचक्रंगच्छतीतित्रिकोणगा॥ अहोरुः स्वमसनामध्यानिनसंतियस्यांसाऽनघा॥ अद्भु
तान्याश्चर्यकराणिचारित्राणियस्याः॥ अद्भुतेषुभूकंपादिकोसातेषुनिमित्तेषुचरंतीमद्भुत
चारिणी॥ इष्टफलानि॥ तेभ्यस्तामनेवा॥ वांछितानर्थान्प्रददातुंशीलमस्याः॥ २३२॥॥ अ
भ्यासातिशयज्ञातापञ्चध्यातीतरूपिणी॥ अव्याजकरुणामूर्तिरज्ञानध्वांतदीपिका॥ २३३॥
पुनः पुनरावृत्तिरभ्यासः तेन प्रकृष्टेदांतचिंतनेतिविहितेनब्रह्मात्मैक्यानुसंधानादृत्तिश
येनज्ञाता॥ तथाचब्रह्मसूत्रं॥ आवृत्तिरसकृदुपदेशादिति॥ अध्वानःषट्॥ पदाद्यामुवनाध्वा
वर्णाध्वातत्त्वाध्वाकलाध्वामंत्राध्वाचेति॥ तेषुत्रयोविमर्शांशाःत्रयः प्रकाशांशाः॥ तदुक्तंविरू
पाक्षपंचाशिकायां॥ अस्यविमर्शात्मकताः पदमंत्रवर्णात्मकस्त्रिधाभवति॥ पुरतत्त्वकलात्मा

१८२ र्यो धर्मिणा द्वंद्वं प्रकाशमेति ॥ तेनाज्ञानार्णवे अस्मिन्नव्यक्ते य उद्भवा नो वर्तन्ते वीरवंदिते इत्यागमस्य सर्वं पद
स्वमपि तं श्रीचक्रे परिचिंतयेदिति तेनोक्तासौ नतीति रूपमस्याः अथवा जाड्यनोपाधिकीया करुणा
सैव मूर्तिः स्वरूपं यस्याः जयति करुणा काचिदरुणेत्यभियुक्तोक्तेः ॥ अज्ञानमेव ध्वांतं तमंधका
रस्तस्य दीपिकेव नाशकत्वात् ॥ २३२ ॥ ॥ आबालगोपविदिता सर्वानुल्लंघ्यशासना ॥ श्रीचक्र
राजनिलया श्रीमत्त्रिपुरसुंदरी ॥ ॥ २३३ ॥ बालान्ब्रह्मादिकान् गोपायतीति बालगोपः ॥ बा
लश्चासौ गोपश्च बालगोपः ॥ बालगोपश्च बालगोपश्च बालगोपौ ॥ तावभिव्याप्य आबाल
गोपं ॥ तादृशैर्विदितं ज्ञानं यस्याः सा ॥ अत्रैको बालगोपशब्दः सदाशिवपरः ब्रह्मावतारपरो
वा ॥ अन्यः पामरोपलक्षणं ॥ हरिहरादिपामरान्तायां जानन्तीत्यर्थः ॥ उक्तं च स्कांदे ॥ तमहमत्यन्त
पयाजाताः सर्वे जानन्ति जन्तव इति ॥ नन्वेवं सम्मतिपरिवपाखण्ड इति मायात्सर्वेषामनुसरणीयास्या
दत आह ॥ सर्वैर्ब्रह्मविष्ण्वादिभिरप्युल्लंघितुमतिवर्तितुमयोग्यमशक्यं च शासनं यस्याः ॥ तदु
क्तमाचार्यभगवत्पादैः ॥ जगत्सूते धाता हरिरवति रुद्रः क्षपयते तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिर
यति ॥ सदापूर्वः सर्वं तदिदमनुगृह्णाति च शिवस्तवाज्ञामालम्ब्य क्षणचलितयोर्भ्रूलतिकयोरि
ति ॥ श्रीचक्रराजं बिंदुत्रिकोणादिरूपं निलयावासस्थानं यस्याः ॥ तदुक्तं श्रीचक्रं शिवयोर्वपु
रिति ॥ शरीरे यथा जीवस्यावस्थानं तथा श्रीचक्रे शिवयोरिति तदर्थः ॥ त्रिपुरस्य परशिवस्य णम॰
सुंदरी भार्या ॥ श्रीमती च सा त्रिपुरसुंदरी चेति तन्नाम ॥ अत्र त्रीणि पुराणि ब्रह्मविष्णुशिवशरीरा १८२

णीयस्मिंस्त्रिपुरः परशिवः॥ तदुक्तं कालिकापुराणे॥ अप्यानेन्द्रशिवश्चाहं भोः शरीरमभवत्त्रिधा॥
तत्रोर्ध्वभागः संजातः पंचवक्त्रश्चतुर्भुजः॥ पद्मकेसरगौरांगः कायो ब्राह्मो महेश्वरे। तन्मध्यभागो
नीलांग एकवक्त्रश्चतुर्भुजः॥ शंखचक्रगदापद्मपाणिः कायः स वैष्णवः। अभवत्तदधोभागः पंच
वक्त्रश्चतुर्भुजः॥ स्फटिकाभ्रमवर्णः शुक्लः स कायश्चान्द्रशेखरः॥ एवं त्रिभिः पुरैर्योगात्त्रिपुरः प
रमः शिव इति॥॥ १२३॥ श्रीशिवा शिवशक्त्यैक्यरूपिणी ललितांबिका॥ ॥ॐ॥ अर्थश्रीका
रवार्यं॥ श्रीयुक्तशिवा श्रीशिवा॥ शिवशक्त्योरैक्यं सामरस्यमेव रूपमस्याः॥ उक्तं च वायवीयसं
हितायां॥ शिवेच्छया पराशक्तिः शिवतत्त्वैकतां गता॥ ततः परिस्फुरत्यादौ सर्गे तैलं तिलादिवेति॥
अत्र सामरस्यं समरसस्य भावः परमशिवपरशक्त्योरभेद एव॥ तथा चोक्तं सौरसंहितायां॥ ब्रह्मणोऽभि
न्नशक्तिस्तु ब्रह्मैव खलु नापरा॥ तथापि संतिष्ठते प्रोक्ता शक्तिरित्यविवेकिभिः॥ शक्तिशक्तिमतो
र्विद्वन्न भेदो भेदस्तु दुर्घट इति॥ शिवचक्रांगीशक्तिचक्रांगो चैक्यं रूपमस्याः वा॥ तदुक्तं ब्रह्मांडपु
राणे॥ त्रिकोणं बैंदवं श्लिष्टमष्टारेऽष्टदलांबुजमिश्रारम् शैवानां चैव शक्तीनां चक्राणां च परस्परं॥ अवि
नाभावसंबंधं यो जानाति स चक्रवित्॥ दृश्यते नेन॥ शिवशक्त्योरैक्यं यस्मिन्निति पाठः॥ सहंसमंत्रो रूप
मस्या वा॥ उक्तं च पद्मे वैभवखंडे उत्पत्ताविति शक्तिरस्योकारांतं तद्बीजमुच्यते॥ विद्याशक्तिर्भवेद्बीजं शिव
एव न चान्यथा॥ तेनायं परमो मंत्रः शिवशक्त्यात्मकः स्मृत इति॥ शाषसहेति वर्णाः क्रमेण शसांतेषु का
रसंदंतो हकार इति तदर्थः॥ अथवा शिवस्य शक्तयो वामाद्याः पंच॥ तासामैक्यं समष्टिरे

१८३ वहृत्पमस्याः ॥ नाम्नो का विरुपा रूपं पंचाशिवयोः ॥ धूमावतीति रोधो भासात्मवभासने धेनो शक्तिः क्रो
मे संदाव्याप्नो विम्बं असदात्तु पुष्टो मे ॥ धूमावती दृष्टि सां व्हादी पसुपुउ चेन्दु भावती त्र घ्यते ॥ वायो सं
दाविम्बीन मृत्सिपान्ने जगन्मामिरीति ॥ एवमियति प्रबंधे नाम्यमि केन नामत्र मेराजगत ॥ सृष्टिस्थि
तिलयकारित्वान देवानां लक्षयित्वा तिरोधानानुग्रहयोरनंतविषयमात्रिदशाकुउ संभूते न्यारम्भे
ताय सर्यपनंतयोरेव विषयं प्रपंचे हृशापंचकृत्यकर्त्री देवतामसाधारणो नाविर्भूत्त मभूते न नाम्ना
निर्दिशति ॥ ललितांबिकेति ॥ ललतेसौ ललिता ॥ ललिता च सांबिका च ललितांबिकेति विग्रहः
॥ उक्तं च पद्मपुराणे लोकानतीत्य ललते ललिता तेन सोच्यत इति ॥ लोक्यंत इति लोकाः किरणा
स्ता वरदेवतास्तानतिक्रम्य तत्स्थानोपरि स्तनबिंदुस्थाने ललिते नितरांशोभत इति तदर्थः ॥
इदं च प्रयागपीठाधिपते र्नाम ॥ प्रयागे ललितादेवीति देवीपीठगणन प्रकरणोपाख्यवचनात् ॥
अत्रोत्तेष्वाचार्यः प्रणावः ॥ सत्वपूर्वमेव काम्यातः ॥ वर्णभेदेन व्यवस्था पि पूर्वमेवोक्ता न विस्मर्तव्या
॥ अनयोश्चाद्यंतमृजयोर्यो द्वयोः प्रणवयोः सह स्वनाम वा क्यार्थानन्वितार्थकत्वेपि न दोषः तयोर्म
गलार्थमेवोच्चारणात् ॥ ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ॥ कंठं भित्वा विनिर्यातौ तेन मांग
लिकावुभाविति वचनात् ॥ स्वरूपेनोक्तं पूर्वं परस्ताच्च विशीर्यत इति वचनेन तदनुच्चारणे प्रत्यवा
यश्रवणान्न तदुच्चारणस्याहृष्टमात्रोपयिकत्वात् ॥ अर्थज्ञानपूर्वकस्यैवोच्चारणस्याहृष्टोपयि रामं
कत्वेनार्थवार्तानस्यावश्यकत्वात् ॥ नामसहस्रस्याप्यनेनमाद्येनाहृष्टार्थत्वेपि परस्पर विशेष्य १८३

विशेषणाभावेनाकाङ्क्षायोग्यतासद्भावे नास्तीति क्रियाप्रधानपदवर्णनेन महावाक्यात्राप्तिर्भवतीपरः
प्रथमपुरुषैः प्रयुज्यमानो प्यस्तीति ॥ भवतीपरइत्यस्य लट्परइत्यर्थः ॥ अस्तु वा प्रत्ययो
ऽपि विशेषणतया महावाक्यार्थान्वयित्वं ॥ समस्तमस्तभेदेन पौनरुक्त्यनिरासस्तं भवादिनिदिक्र ॥ इ
दानीं परिभाषामण्डलेनाम्नाशतकेषादिभागान्संगृह्य प्रदर्शयति ॥ श्रीमणिमध्ये विविधगुड
देशादेशेषु पुष्टनाराम्भा। नामसहशतकारंभाने ज्ञोभानापि शब्दपुनरुक्तिः ॥ श्रीमानाम शिशुत्वं
नरुदिता १ सद्गतिप्रदा ३ ह्रींकारी ४ बिविधाकरा ॥ गुडान्नप्रीतमानसा ६ दरांदोलितदीर्घाक्षी
॥ ७ देशकालापरिच्छिन्ना ॥ ८ पुष्टा ९ नादरूपिणी ॥ १० एवं दशनामानि प्रथमादिशतकारंभ
काणि ॥ अत्र श्रीमणिपदिशब्दानां श्रीकंठार्धशरीरिणीमणिपूरज्वलितपेपादावृत्तिप्रसक्तेत्वेपि
गणानसाधिकेनवत्रमो निरस्तव्यः ॥ गणानोन्तरं हि शतकसमाससन्नाम एव बहिसंशयो भव
तिक्वचिक्वचित्स्वच्छेदसंशयप्रयुक्तोन विप्रकृष्टनामहा ॥ अत एव बहिढ्इति सबिंडकयहणं ही
मतीतितत्सभी यववर्जिनाम तिरासायादरामितुक्तिर्दरहासोज्ज्वलनमुखीत्यस्यमावर्तनायेतिद्वि
यं ॥ निरर्थकः शब्दस्तोभः ॥ सचसहस्रेनामांतरेषु पादपूरणे कप्रयोजनको यथोपलभ्यते ना
त्रतथेत्यर्थः ॥ नापिछलेति ॥ अर्थतस्तु यथापि पुनरुक्तिं वामाताजननीदेवेशी सुरनायिके
त्यादौ दृश्यते तथापि नास्मीसहस्रनाम संख्या विद्यातिका ॥ नामशब्दस्य प्रातिपदिकमात्रेश

१८४ केसलं द्वे द्रमात्रेरात्रश्चथ्यर्के निवेशितवस्वामामायाः संख्यायात्रनुपरीधान ॥ ३३ ॥ ननुशब्दो ऽपि
पुनरुक्तिरूपलक्षणत एवेत्याशंक्यपरिहरति ॥ मतिवारदाकांता दावकारयोगेन रक्तवर्णादौ । आ
